Printed by G. L Shah at the Anand Press, Station Road, Bhavnagar,

AND

Published by Newton Mohun Dutt, Curator of Libraries, Baroda, on behalf of the Government of His Highness the Maharaja Gaekwad of Bāroda at the Central Library, Baroda.

Price Rs. 5-0-0

# PREFACE.

The *Mânava Grhya Sûtra* with extracts from the commentary of Astâvakra, was first edited by Dr. Friedrich Knauer at St Petersburg in 1897. The full text of the *Sûtra*, as well as that of the commentary, are now being printed in the *Gaekwad's Oriental Series*.

The subject matter of almost all the Grhya Sûtras is arranged according to a certain plan. Two especially important epochs in the domestic life of a Hindu are, on the one hand, the *Upanayana* which marks the beginning of the period of studentship of the young Brahmacârin, and on the other hand, marriage, which besides has a special importance for the Grhya ritual from the circumstance that as a rule the *cultus* of the domestic sacrificial fire begins with marriage Hence, we find that many of the Grhya Sutras begin with the description of marriage, which is followed by the *Samskâras* in due order, namely, conception, birth, the ceremony of giving a name to the child, first feeding, cutting the hair, investing him as a student and so on A few of the Grhya Sutras follow the other order, namely, beginning with the *Upanayana* they describe the [illegible] that the ceremony of marriage occupies the middle of the work The *Mânava Grhya Sûtra* however, instead of beginning with [illegible] *Upanayana* or [illegible] first of all gives the rules to be observed by a Brahmacârin The commentator [illegible] this fact and he has tried to offer [illegible] for this [illegible] beginning.* The marriage ceremony [illegible] at I. 7. [illegible] the *Upanayana* comes at the end of the first [illegible]

[illegible] *Mânava Grhya Sûtra* [illegible] belongs to the [illegible] School of the [illegible]

* P 2 [illegible]

such the rules given therein are to be followed by the adherents of that school The *Sûtra* however, appears to have three different names *Maitrâyanîya Gṛhya* as mentioned in the beginning of the commentary, *Maitrâyanîya Mânava Gṛhya* and *Mânava Gṛhya* each preceding name being older than the following Similarly instead of the usual designation of the *Adhyâya* we find here the strange designation of *Puruṣa*. The commentator also at the end of each section uses the peculiar name *Purana* ( इति पूरणाख्यास्याने...दाग ). Dr. Knauer conjectures that *Puruṣa* means Mânava and that the " पूरणाख्यो भाग " is the same as ' मंत्रागणीयो भाग ' He further discusses the question whether the three names Maitrâyanîya, Maitrâyanîya–Mânava and Mânava are only variations of an original name or whether they represent the relation of three different schools Are we to suppose Maitrâyanîya as the original name or was there some other name unknown to us ? This is not an idle question, for, according to Von Schroeder's conjecture,* Maitrâyanîya is a later name for Kalâpa and so the *Maitrâyanîya Gṛhya Sûtra* also might have had another name for it. Some of the Mantras cited in the *Maitrâyanîya Mânava Gṛhya Sûtra* with *Pratîkas* are not found in the Maitrâyanîya Samhitâ. The Maitrâyanîya Samhitâ might have stepped in the place of the Kâlâpaka Samhitâ and such a change signifies not merely a change in the name but also a change of redaction, however small or great it might be It would only be a distinguished teacher who would dare to give a new redaction of an older text book The teacher who handed down orally what existed before was forgotten in course of time, but the teacher who prepared a new redaction was epoch-making and his name survived. The commentator of the *Mânava Gṛhya Sûtra* mentions Mânavâcâryya as the author of our *Sûtra*.† The word

* Z. D M G. Vol XXXIII, p 202.

† सरस्वत्याः प्रसादेन यथैतत्कृतवान् पुरा ।
भगवान् मानवाचार्यं पूरणाख्य प्रयत्नत ॥

M G S., p. 105.

Mânavâcârya can mean a teacher named Mânava[*] although the word elsewhere and in itself can mean 'a teacher of the Mânavas'. Just as a teacher Mânava of the Maitrâyaṇîya school is the founder of the Mânava Śâkhâ, similarly a Kâlâpa named Maitrâyaṇi might have been the founder of the Maitrâyaṇîya Śâkhâ Of-course, this does not mean that every writing which goes under the name of its founder must originate with him. However, even *Puruṣa* and *Purâṇa* themselves might have been the names of the teachers of the Mânava and Maitrâyaṇîya schools, respectively.

The *Mânava Gṛhya Sûtra* therefore seems to be a product of different schools As such it is quite natural that the Sûtra must have received several additions at different times and from different hands. Thus the opening sections which give the व्रतचर्या and सन्ध्या as well as the next four sections appear to be later. The *Śîmantonnayana* ceremony is mentioned twice at 1 12. 2. and 1. 15. At the end of the First *Puruṣa* we find several *Dîkṣâs* mentioned which do not appear to be directly connected with Gṛhya ritual. In the second *Puruṣa* we find the ज्येष्ठाकल्प ( II 13. ), a rite consisting of *Sthâlîpâka* offerings not mentioned in the other Gṛhya Sûtras. Section II. 14 contains the interesting worship of the Vinâyakas They are represented as demons which have a malicious influence on the life and work of men. They are four in number, and this section gives an account of the signs by which the demons manifest themselves, and explains the ceremony by which they may be appeased and the evil consequences averted

*The Mânava Gṛhya Sûtra* points to a very ancient state of Indian society. In the opening section the Brahmacârin is enjoined not to eat meat and partake of wine † This shows that meat-eating was not forbidden wholesale but only in certain cases In the *Madhuparka* rite the killing of a cow is a necessary and the

---

* Bühler, *Manu Smṛti*, S. B. E. Vol. XXV, p. LXIII

† न मद्यमांसे प्राश्नीयात्—M. G., 1. 1. 12

author quotes the Śruti 'अगमो मधुपर्को नापशुः' I. 9. 22. However, an option is given later and the cow instead of being killed might be let loose. A strange rite is mentioned in connection with the selection of the bride. Eight lumps of earth brought from different places were to be placed before the girl. If she were to take the one brought from the cemetery, or from the square, or from a barren land, she was to be rejected. In the *Upanayana* ceremony the author only says 'सप्तमे नवमे वोपनयनम्' I. 22. 1. The elaborate rules about the *Upanayana* of the four different castes are not given in this Sûtra. The killing of a cow was also compulsory at the time of another rite namely the final *Astaka* ( उत्तमायां पर्वणि चतुष्पथेऽष्टको गां कारयेत् । गो न आलभेतान्यो नस्मै दद्यात् ) II. 9. 1-2

The *Mânava Gṛhya Sûtra* appears to be a part of the great corpus of Sutras of the Mânava school. There seems to be a great parallelism between the literature of the Maitrâyaniya and the Mânava schools. These two schools do not only belong to the Black Yajurveda but to the same branch of it, as may be seen from the *Caranavyûha*, which work classes both the Kaṭhas and the Cârâyaniyas on the one hand, and the Mânavas together with the six or five other sections of the Maitrâyaniyas on the other hand, as subdivisions of the Caraka Śâkhâ of the Black Yajurveda. The *Mânava Gṛhya Sûtra* agrees with the *Kâthaka Gṛhya Sûtra* very closely, both the works have not only several entire chapters in common ( e g, the chapter on व्रतचर्या, वैश्वदेव, etc. ) but concur everywhere in the arrangement of the subject matter and in the choice of expression and Mantras.* According to Dr. Jolly† the Kathas and the Maitrâyaniyas and the Mânavas were originally neighbours and hence he remarks that the Sûtras of a Śâkhâ which appears to have sprung up near the primitive home of Aryan civilization in India, which was probably

---

* For details see Dr. Jolly's paper '*Das Dharma Sûtra des Vishnu and Das Kâṭhaka Gṛihya Sûtra*' Z D. M G., Vol. XXXVI, p. 445

† Dr. Jolly. Introduction to *Vishnu Smṛiti*, S. B. E, Vol. VII, p. xvii

the original home of the Kathas at the same time, may be far older than those of mere Sûtra schools of the Black Yajurveda, which have sprung up in South India. The *Mânava Gṛhya Sûtra* seems to have supplanted the older Maitrâyaṇîya Gṛhya and hence it cannot claim the same antiquity. However, it appears to be older than the Gṛhya Sûtras of the later Sûtra schools like those of Âpastamba, Hiraṇyakeśi Bharadvaja which originated in the South, i. e., older than 4th or 5th century B. C.

The commentator, as usual, has given no information about himself. Even the reference to his name, which is supposed to be Aṣṭâvakra, is rather doubtful. At the beginning of commentary to the second *Puruṣa*, we find the following stanzas :—

सरस्वत्या प्रसादेन यथैतत्कृतवान् पुरा । भगवान मानवाचार्य. पूरणाख्य प्रयत्नतः ॥
अष्टावक्रेण देवेन तां दृष्ट्वा तु सरस्वतीम् । शते पूर्णे तु वर्षाणामृतौ शिशिरसंज्ञिते ॥

The commentator has made frequent references to *Manu Smṛti*, *Vasiṣtha Dharma Śâstra* and several other Śrutis without mentioning their names. He appears to be also well-versed in the sciences of Grammar and Mîmâṃsâ. The commentary is mainly concerned with giving a full explanation of the text. It is only on very few occasions that the author enters into an elaborate discussion about the minute details of a particular rite.

BARODA,
*13th. May. 1926.*

B. C. LELE.

# प्रस्तावना.

वेदो यन्निःश्वसितं स सदा श्रीसूर्यमण्डलान्तस्थः ।
सूर्यश्च यस्य नयनं स शिवो नः शिवपरां दत्तात् ॥ १ ॥

इदमत्र प्रस्तूयते यत्किल मैत्रायणीयशाखोपयोगि मानवं गृह्यसूत्रं विद्यते तन्महामहिम्ना श्रीमदष्टावक्रदेवेन व्याख्यातं तद् भाष्यसमेतं संगृह्य प्रसिद्धिं नीयते तत्र सूच्यते संक्षेपेण कथ्यते विपुलोऽर्थो यत्र तत्सूत्रम्, तदुक्तम्—

मानवगृह्यसूत्र शब्दविचार

" अल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखम्
अस्तोभ्यमनवद्यं च सूत्रं सूत्रविदो विदुः " इति

एतल्लक्षणकानि सर्वाणि सूत्राणि तानि च सर्वशाखाणां सन्तीति तेभ्योऽन्यदिदमिति बोधयितुं गृह्येति विशेषणं गृह्यपदार्थश्च योगरूढः । गृहाय गृहस्थाश्रमधर्माय हितो गृह्य इति यौगिको रूढस्तु खादिरगृह्ये—" यस्मिन्नग्नौ पाणि गृह्णीयात्स गृह्यः " ( १–५–१ ) अथवा " यस्मिन्वान्त्यां समिधमादध्यात् " ( १–५–२ ) इति लक्षणलक्षितः । गृहम्, उपासनम्, आवसथश्चेति सूत्रोक्ता गृहपर्याया यथाऽस्मिन्नेव मानवगृह्ये—" ०–स्वान् गृहान् व्रजेत् " (१–२–१८) " रथादध्योपासनात्० " ( १–१४–१५ ) " ०–आवसथं प्रतिपद्यते० " ( १–१४–६ ) इति सूत्रेषु गृहीतास्ततश्चोक्तव्युत्पत्त्या गृह्य औपासन आवसथ्य इति तिस्रः संज्ञाः स्मार्ताग्नेः । तत्र क्रियमाणानां कर्मणामपि गृहा दारा इति वद् गृह्यसंज्ञेति तेषां कर्मणां संक्षेपेण कथनं गृह्यसूत्रं तच्च शाखाभेदादनेकमुनिप्रणीततयाऽनेकविधं तद्यथा—काठकगृह्यं कापिष्ठलगृह्यमापस्तम्बगृह्यमाश्वलायनगृह्यं वाराहिगृह्यं गोभिलगृह्यं खादिरगृह्यमित्यादि तेभ्यो व्यावर्तयितुं मानवमिति विशेषणम्. मनुनाप्रणीतं मानवं तच्च श्रौतमप्यस्ति तद्व्यावर्त्तयितुं गृह्यमिति विशेषणं तथा च मानवं गृह्यसूत्रमिति फलितम् ।

स्वशाखोक्तकर्मविचार

एतत्सूत्रं मैत्रायणीयशाखोपयोगीत्युक्तं तच्छाखीयं कर्मैतत्सूत्रोक्तविधिना विधेयमन्यथा प्रत्यवैति तथा च मनुः—

" स्वसूत्रे वर्त्तमानेतु परसूत्रे प्रवर्त्तते
ब्रह्महत्या–समं पापं भवेत्सूत्रापमानतः "

न्यायवादोऽपि ' [illegible]
[illegible] "

जाबालिश्च—" [illegible]
[illegible] " [illegible]

एतद्रूपमेव [illegible]:

" [illegible]
[illegible] "

अन्यशाखीयकर्मकरणे [illegible]:

" [illegible]
[illegible] "

इत्यादिभिर्वचनै [illegible] । तानि तु कर्माणि [illegible], [illegible], ते हि [illegible], [illegible] । [illegible] कापिष्ठलापस्तम्बगोभिलाश्वलायनप्रभृतय. [illegible]

मनुर्मैत्रायणीय

भगवान् मनुरपि [illegible], यद् भगवता मनुनाप्यायजुर्वेदशाखिना मैत्रायणीयशाखानुगता [illegible] भवितव्यमिति तथा मानवगृह्योक्त-उपनयनप्रकारकर्मणां क्रमस्य, मनुस्मृत्युक्त-उपनयनादिकर्मणां क्रमस्य च साम्यं पर्यालोच्यते तथाहि मानवगृह्ये प्रथमत ' उपनयनप्रभृति व्रतचारी स्यात् " ( १–१–१ ). मनुस्मृतौ धर्मादिकथनप्रसंगे द्वितीयाध्याये " कृतोपनयनस्यास्यव्रतादेशनमिष्यते " ( २–१७३ ) इत्युक्तं मानवगृह्ये ब्रह्मचारी त्रिप्रकारक. " मुण्ड' शिखाजट सर्वजटो वा " ( १–२–६ ) तथा मनुस्मृतौ " मुण्डो वा जटिलो वा स्यादथवा स्याच्छिखाजटः " ( २–२१० ) इति त्रिविधः । मा० गृह्ये—" सर्वाणिसास्पर्शिकानि स्त्रीभ्यो वर्जयेन " ( १–१–१० ) " न मधुमांसे प्राश्नीयात्० " ( १–१–११ ) मनुस्मृतौ " वर्जयेन्मधु मांसं च गन्धं माल्यं रसान् स्त्रिय. " ( २–१७७ ) मानवगृह्ये

---

१ अत्र शपो लुगभाव आर्ष ।

" वर्षासु[1] श्रवणेन स्वाध्यायानुपाकुर्यात् " (१-४-१) मनुस्मृतौ—" श्रावण्यां प्रोष्ठपद्यां वाप्युपाकृत्य यथाविधि " (४-९५) इत्यादीनि विषयसाम्यविषये बहून्युदाहरणानि विद्यन्ते विस्तरभयान्न लिखितानि इति एवं पर्यालोचनायां मानवगृह्यप्रणेता मानवधर्मशास्त्रप्रणेता च भगवान् मनुरनन्य एवेति सिध्यति युज्यते चैतत् प्रायो गृह्यसूत्रकृदापस्तम्बादीनां स्मृतिनिर्मातृत्वाधिगमात्. एवं द्वयोरेककर्तृत्वे संभवति कतरस्य प्राथम्यमिति विचारे अविस्तृतत्वेन मानवगृह्यस्यैव प्रथमोद्भाविता वक्तुं शक्या, मनुस्मृतेस्तुविस्तरवत्त्वाद् भृगुलिखितत्वाच्चानन्तर्यमभिधातुं न किंचिद्बाधकं नयनपथमायाति.

ननु गृह्यान्तरेषु क्वचिद् विवाहस्य क्वचिज्जातकर्मणः क्वचिदन्यस्यैव संस्कारस्य प्राथम्यं मानवगृह्ये उपनयनानन्तरभाविनो ब्रह्मचारिव्रतस्य कथं प्राथम्यमिति तु न शङ्कनीयं स्वतन्त्रस्य मुनेरपर्यनुयोजनीयत्वात् । किं च सर्वेपि संस्कारा प्राक्तनसंस्कारसापेक्षा इति निरपेक्षतया तावदुपनयनसंस्कारस्य प्राथम्येन विधानं नोपन्यसितुं शक्यं तत्पूर्वभाविना जातकर्मादिना सापेक्षत्वात् जातकर्मादिसंस्कारव्यतिरेकेणोपनयनेऽनधिकारात् । एवं जातकर्मणोऽपि प्राथम्यं निगदितुमनुचितं पुत्रोत्पत्तिमन्तरा तदनौचित्यात् विवाहविधिं विना तादृशपुत्रोत्पत्तेरसंभवात् एवं विवाहविधेरपि अग्रतयाऽभिधानं न संभवति अविप्लुतब्रह्मचर्यस्यैव विवाहार्हतायां सर्वमुनीनामैकमत्यात् । अथ न व्रतमपि निरपेक्षित्वेन अग्रगण्यतां प्रतिपद्यते उपनीतस्यैव व्रतेऽधिकारितायाः समस्तस्मृतिसंमतत्वात् । एकतमस्य निरपेक्षतयाभिधाने चक्रकापत्ति, युगपत्सर्वसंस्काराऽऽलेखनमसंभवीति मुनेरपर्यनुयोजनीयत्वमेव सर्वेषां शरणीकरणीयम् ।

(मनूक्तव्रत प्राथम्यसमर्थनम्)

वस्तुतस्तु अनुपदोक्तदोषपरिहारायान्यमेव पन्थानमास्थितवान् भगवान् मानवगृह्यप्रणेता स चायमित्यवधार्यते—चत्वारो वर्णाश्चत्वारश्चाश्रमास्तत्कर्मसंग्रहसौकर्याच्च आश्रमक्रमेण कर्मविधिनिर्देशश्चिकीर्षित इति प्रथमाश्रमपरिग्रामविधेयकर्मणाम् "उपनयनप्रभृति व्रतचारी स्यात्" (१-१-१) इति उपक्रम्य क्रमेण विधेयता दर्शिता. अनुसृतश्चमनुनिर्दिष्टोऽयमध्वा लघुहारीतस्मृतौ तृतीयेऽध्याये, औशनसस्मृतौ द्वितीयेऽध्याये, संवर्तस्मृतौ प्रथमेऽध्याये, बृहत्पराशरस्मृतौ चैकादशेऽध्याये, इति तत एवावधार्यम्, न च प्रदर्शितस्मृति-

(आश्रमानुरोधेनग्रथनम्)

---

१ वर्षासु भाद्रपदस्य सत्वात् तत्र श्रवणेऽपि ।

वर्त्मपर्यालोच्य मनोः प्रवृत्तिरितिभ्रमितव्यम् स्मृतिकारेषु मनोराद्यत्वेन परिगणितत्वात् तदाह याज्ञवल्क्यः—

"मन्वत्रिविष्णुहारीतयाज्ञवल्क्योऽशनोऽङ्गिराः" (१–४) इति। अत्र विषये सृष्टिक्रमोद्भवसरणिरपि अनुकूलतामावक्ष्यति तथा च पुराणे धातुरिच्छया मानसिकसृष्टिरूपेण समुद्भूतवता भगवता मनुना ब्रह्माज्ञया ब्रह्मचर्यमास्थाय तप-आचीर्णम्, ततः शरीरं विभज्य दाम्पत्येन सृष्टिक्रम आरेभे इति सार्वजनीनं ब्रह्मचर्याश्रमस्य प्राथम्ये "[1]ब्रह्मचारी भूत्वा गृही भवेत् गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेत्"। "[2]चत्वार आश्रमा ब्रह्मचारि–गृहस्थ–वानप्रस्थ–परिव्राजका." इत्यादयः श्रुतिस्मृतयः प्रमाणं तदनुरोधेन उपनयनप्रभृतीत्याद्यारब्धमनुसंधेयम्.

पुरुषसंज्ञाप्रयोजनादि.

व्रताचरणाद्याकाङ्क्षामुत्तरोत्तरां पूरयन्नाचार्यः सूत्राणि विरचयांचकार तेषां सूत्राणां तत्तत्कर्मसंवन्धिक्रामिकविभागानां खण्ड इति संज्ञा संकेतिता तादृशा खण्डा. प्रकृतगृह्ये एकचत्वारिंशत् ते च भागद्वये विभक्ताः, तयोर्विभागयोः पुरुषसंज्ञा कृता तत्र प्रथमे पुरुषे त्रयोविंशतिः खण्डाः द्वितीये च पुरुषेऽष्टादशखण्डा निहिताः ननु इतरे गृह्यप्रणेतारस्तादृशखण्डनिचयविभागानामध्यायप्रपाठकादिसंज्ञया व्यवहारं कुर्वन्ति ततो विभिन्नव्यवहारोऽत्र निष्प्रयोजन इति शङ्काया नास्त्यवसरः पुरुषसंज्ञायाः सप्रयोजनत्वात् संस्कारोहि द्विविधः स्वसंस्कारोऽन्यसंस्कारश्च समिदाधानोपाकर्मवेदव्रतादीनि कर्माणि स्वसंस्कारः, विवाहोत्तरक्रियमाणानिगर्भाधानादारभ्योपनयनान्तानि कर्माणि अन्यसंस्कारः, तत्र स्वसंस्कारककर्माधिकारी ब्रह्मचारी प्रथमः पुरुषः अन्यसंस्कारककर्माधिकारी गृहस्थो द्वितीय. पुरुषः अत्र ब्रह्मचार्यधीनकर्माभिधायकसूत्राणां निचयस्य गार्हस्थ्योचितकर्मकलापाभिधायकसूत्राणां निचयस्य च सत्वेन पुरुषसंज्ञा इदं च सूचितं संक्षेपतः प्रथमसूत्रे भाष्यकृता श्रीमदष्टावक्रदेवेनेति सप्रयोजनोऽयं पुरुषसंज्ञाव्यवहारः।

पूरणसंज्ञासंभव

द्वितीयपुरुषव्याख्यानस्य मङ्गले "पूरणाख्यं प्रयत्नत" इति तथा खण्डसमाप्तौ च। "पूरणव्याख्याने" इति निर्दिशति भाष्यकृत् तेनास्य गृह्यस्यापरा पूरण संज्ञापि प्रतीयते तत्र कारणं तु लोके विवाहाद्युत्सवे सर्वदेशेषु व्यवह्रियमाणाः शकटारोहण–चक्रपूजन–वधूस्नपनवस्त्रा-

१ जाबालिश्रुति.। २ वसिष्ठस्मृति. (अ० ७).

संस्कारदानप्रभृतयोऽन्यगृह्येऽनवलोक्यमाना बहवः सदाचारा अत्रोपनिबद्धाः दरीदृश्यन्ते तदपि संमान्यते.

इतरगृह्येभ्योऽत्र विशेषोऽप्युपलभ्यते यथा विवाहे—" ददानि प्रतिगृह्णामीति त्रिर्ब्रूहदेया " (१–८–६)। शौल्कविवाहे तु० " सहिरण्यानञ्जलिनावपति धनायत्वेति दाता, पुत्रेभ्यस्त्वेति प्रतिग्रहीता " (१–८–७) एतदपिलक्ष्यादिविनाप्यस्ति। एवं विवाहकारणेष्वपि " ०—वित्तं रूपं विद्या प्रज्ञा बान्धव इति " (१–७–६). इत्यादयो बहवो विशेषाः, तथा उत्पात–प्रदर्शने ' मूर्ध्नि हसनं रोदनं चलनं स्थानात्स्थानान्तरगमनं स्थाल्याः स्थाल्यन्तरसंसर्गादिकं, गृह्यान्तरानुक्तमेव एवमेव गृह्यान्तरेऽनुपलभ्यमाना विनायकशान्ति[2]स्त्र द्वितीयपुरुषस्य चतुर्थे खण्डे उपनिबद्धा तद्विधिश्चाश्चर्यजनक इव मनस आकर्षको रसोत्पादकश्चेत्यादिकं नविषयनारोहति.

इतरगृह्य दत्र विशेषः.

शाखाभेदविचारः

सर्वाणि गृह्यसूत्राणि शाखावलम्बीनि शाखाश्च बह्व्यस्तत्परिगणना कृता महाभाष्ये पस्पशाह्निके भगवता पतञ्जलिमहर्षिणा " एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेदः, एकविंशतिधा बाह्वृच्यम्, नवधाऽऽथर्वणो वेदः " इति शाखाभेदकारणं तु शिष्यपरंपरयाऽध्यापकाऽध्ययनादिभेदः क्वचित्सूत्रभेदश्च मन्त्र–ब्राह्मणयोरन्यतरभेदेन योऽवान्तरशाखाभेदः सोऽध्ययनभेदकृतः, यथा शाकलबाष्कलयोः शाखयोः स्वाध्यायो यत्किंचिद्भिद्यते सूत्रं त्वाश्वलायनमेकमेव, तथा काण्वमाध्यन्दिनशाखयोरध्ययनभेदेऽपि पारस्करगृह्यमेकमेव, तैत्तिरीयशाखायां समानपाठयानपि बौधायनापस्तम्बहिरण्यकेशिप्रभृतिसूत्रभेदाच्छाखाभेदः। यथा च समानपाठयानपि मैत्रायणीयशाखायां मानव–दुन्दुभ–वराह–प्रभृतिसूत्रभेदान्मानवा दौन्दुभा वाराहादयः शाखाभिद्यन्ते. राणायनीय कौथुमिशाखयोरध्ययनभेदात्सूत्रभेदाच्च शाखाभेदः। एवं च क्वचिन्मन्त्राध्ययनादिभेदात् क्वचित्सूत्रभेदात्क्वचिदुभयभेदाच्च शाखाभेदः समजनि सर्वोऽप्ययं शाखाभेदो व्यासकृतवेदविभागानन्तरमेवेति प्रतिभाति तत्समयश्चोक्तो विष्णुपुराणे—

" शाखाप्रणयनं चैव द्वापरे समनूदित "

इति स भेदो व्यासशिष्यपरंपरयैवदृश्यते हि पैलो वैशम्पायनो जैमिनिः सुमन्तुश्चेति चत्वारो व्यासशिष्यास्ते च शिष्यपरंपरया अध्यापयन्तः नाना वेदशाखा वितेनुः तत्र

१ इदं [illegible] । २ इदं [illegible].

वैशंपायनमहर्षिर्यज्ञप्रधानीभूताध्वर्यवकर्मसंपादकमन्त्रादि शिष्यप्रशिष्यद्वारा आद्ययजुर्वेदस्य षडशीतिशाखा विस्तारयामास तथा च ब्रह्माण्डपुराणे पञ्चत्रिंशेऽध्याये.

"वैशंपायनशिष्योऽसौ यजुर्वेदमकल्पयत्
षडशीतिस्तु तेनोक्ता संहिता यजुषां शुभा
शिष्येभ्यः प्रददुस्ताश्च जगृहुस्ते विधानतः.
एकस्तत्र परित्यक्तो याज्ञवल्क्यो महातपाः.
षडशीतिस्तथा शिष्याः संहितानां विकल्पकाः
सर्वेषामेव तेषां वै त्रिधा भेदाः प्रकीर्तिताः
त्रिधाभेदास्तु ते वेदभेदेऽस्मिन्नवमे (?) शुभे
उदीच्या मध्यदेशाश्च प्राच्याश्चैव पृथग्विधाः
श्यामायनिरुदीच्यानां प्रधानः संबभूव ह
मध्यदेशप्रतिष्ठाता आसुरिः प्रथमः स्मृतः
आलम्बिरादिः प्राच्यानां त्रयो देशादयस्तु ते
इत्येते चरकाः प्रोक्ताः संहितावादिनो द्विजाः.

इमाः सर्वाः शाखा अधीयानाश्चरका इति तासां शाखानामपि चरकशाखात्वेन प्रसिद्धिः । अध्येतॄणां चरकत्वं तु—आद्ययजुर्वेदनिधेर्भगवतो वैशंपायनमहर्षेः कदाचित् प्रासंगिको द्वादशाब्दप्रायश्चिताचरणेनापनोद्यपापः परीवादः प्रादुरभूत् तमपनेतुं प्रायश्चित्ताय प्रवृत्तमाचार्यं प्रति तत्काले सन्निहिताः शिष्याः प्रोचुः । भगवन् द्वादशवार्षिकस्यैतद्व्रतस्य षष्ट्युत्तराणि त्रीणि शतानि प्राजापत्यानि भवन्ति तानि सर्वे वयं भवत्पापक्षयार्थं चराम इति प्रतिनिधितयौचित्यमावहद्भिः शिष्यैः संप्रार्थितो महर्षिर्वैशंपायनोऽनुमेने तत्तथास्त्विति तदाह व्यासः

वैशंपायनशिष्यास्ते चरकाध्वर्यवोऽभवन्
यच्चेरुर्ब्रह्महत्यांहः—क्षपणं स्वगुरोर्व्रतम्

तथा वायुपुराणे एकषष्टितमेऽध्याये—

"ब्रह्महत्या तु यैश्चीर्णा चरणाच्चरकाः स्मृताः
वैशंपायनशिष्यास्ते चरकाः समुदाहृताः."

---

१ वैशंपायनगोत्रोऽसौ इति वायुपुराणपाठः । २ प्रतिष्ठा नामासुरिः इति वायुपुराणपाठ

एवं चाध्वर्युत्वेन प्रसिद्धाना तत्तच्छाखावतां शिष्याणां षडशीतिः संख्या संवृत्तेति ' षडशीतिस्तथा शिष्या ' इत्युक्तं प्राक् ( पृ. ६ पं. ७ ) तेषां नव नामानि गणितानि " कलापिवैशंपायनान्तेवासिभ्यश्च " ( पा. ४–३–१०४ ) इति सूत्रे शब्देन्दुशेखरे श्री नागेशभट्टेन–' १ आलम्बिः २ कलिङ्गः ३ कमल ४ रुचाभ ५ आरुणि ६ ताण्ड्य ७ श्यामायन. ८ कठ. ९ कलापीति, कलापिनश्च चत्वार शिष्यास्ते १ हरिद्रु २ छागलः ३ तुम्बरुः ४ उलपश्चेति, पुराणप्रमाणानुसारेण तित्तिरिर्वैशंपायनशिष्य । गृह्योपोद्घाते प्रो० पी० वी० महोदयेन वैशंपायनशिष्यस्य शिष्य उक्त. । तदधीताश्च सर्वाः शाखा यद्यपीदानी नोपलभ्यन्ते तथापि ये भेदा ग्रन्थेपूपलभ्यन्ते ते कतिचिन्निर्दिश्यन्ते ताः शाखा आह चरणव्यूहे चरकानां द्वादशभेदाः यथा–चरका आह्वरका. कठाः प्राच्यकठाः कापिष्ठलकठाः, चारायणीया वारतान्तवीया श्वेता श्वेततरा औपमन्यवा. पाताण्डिनेया मैत्रायणीयाश्चेति–मैत्रायणीया अपि मानवा वाराहा दुन्दुभा छागलेया हारिद्रवीयाः शामायनीयाश्चेति षड्भेदवन्त. तत्र शामायनीयानां शामायनिमूलकत्वं प्रतिभाति शामायनिश्चोदीच्यानां प्रधानस्तदुक्तं वायुपुराणे एकषष्टितमेऽध्याये––

" शामायनिरुदीच्यानां प्रधानः संबभूवह "
मध्यदेशप्रतिष्ठानामारुणिः प्रथमः स्मृत
आलम्बिरादिः प्राच्यानां त्रयो देश्यादयस्तुते "

एवं तिसृषु दिशासु व्याप्निमन्तस्ते चरकाः वैशंपायनशिष्याः । शामायनीयामैत्रायणीयान्तर्गता । महाभाष्योत्पत्तिसमये कठकलापशाखयोरधिकप्रसिद्धिरवगन्यते यत " अनुवादेचरणानाम् " ( पा. २–३–१०३ ) इति सूत्रे कठकलापयोर्द्वन्द्वं कृत्वा 'उदगात्कठकालापम्' इत्युदाहृतवान् भगवान् पतञ्जलिः । तथा " तेनप्रोक्तम् " (पा. ४–३–१०७) इति सूत्रे 'ग्रामे ग्रामे कलापकं काठकं च प्रोच्यते ' इत्याह तेन तदानीं कठकलापशाखयोर्व्यापकता संभाव्यते, मैत्रायणीयशाखायां हारिद्रवा. छागलेयाश्च विद्यन्ते ते वैशंपायनशिष्यपरंपरायामायान्ति तद्यथा वैशंपायनशिष्यः कठ कलापी च तत्र कठशिष्यः खाडायनो महाभाष्ये दर्शित । हरिद्रुः कलापिशिष्य इति (पा. ४–३–१०४) सूत्रकौमुद्यां स्पष्टमुच्यते काशिकायां तु––

१ आलुरिरिति ब्रह्माण्डपुराणे पाठ ।

" हरिद्रुरेणां प्रथमस्तत्र छागलस्तदनन्तरम्
उलपेन चतुर्थेन कालापकमिहोच्यते "

इति चत्वारः कलापिशिष्या. प्रदर्शितास्ते मैत्रायणीयाः तथा करनान्दे निरुक्तव्याख्याकारेण दुर्गेण हारिद्रवीयस्य मैत्रायणीय-शाखीयत्वमुक्तम् । मैत्रा यणीयशाखा व्याप्तिमती च्यासीदित्यर्थकम्—

" मयूर पर्वताच्चैव यावद्गुर्जरदेशत
व्याप्ता वायव्यदेशात्तु मैत्रायणी प्रतिष्ठिता "

इति वेदविचार वचनमुद्धृत्य गृहोपोद्घाते शर्मोपाख्यपण्डितश्री प्रो. कावरमहोदयेन तथा तैत्तिरीयशाखार्थमप्युल्लिखितं तत्रैव ।

"आन्ध्रादि दक्षिणाग्नेयी गोदासागर आवधि
यजुर्वेदस्तु तैत्तिर्यो ( र्ये ) आपस्तम्बो ( म्बः ) प्रतिष्ठितः
सह्याद्रिपर्वतारम्भाद्दिशां नैर्ऋत्यसागरान्
हिरण्यकेशिशाखा च पर्शुरामस्य सन्निधौ "

एतच्छाखानामपि आद्ययजुर्वेदसंबन्धित्वेन षडशीत्यामन्तर्भावः महर्षि याज्ञवल्क्योपलब्धस्यापरयजुर्वेदस्य तु पञ्चदश शाखाः शिष्यसंख्यया समभूवन् तदुक्तं वायुपुराणे एकषष्टितमेऽध्याये—

" याज्ञवल्क्यस्य शिष्यास्ते कण्व—वैधेय—शालिनः
मध्यन्दिनश्च शापेयी विदग्धश्चाप्य उद्दलः ( २४ )
ताम्रायणश्च वात्स्यश्च तथा गालव—शैशिरी
आटवी च तथा पर्णी वीरणी सपरायणः " ( २५ )

आभिः पञ्चदशशाखाभिः सह संयोजिता आद्ययजुर्वेदस्य शाखानां षडशीति. संख्या महाभाष्योक्ता 'एकशतमध्वर्युशाखाः' संपद्यन्त इति संगतम् । अत्र प्रासंगिकत्वेनोद्धृतानामृक्सामाथर्वणां शाखानां विचारो विस्तरभयान्न क्रियते.

वेदविभागविचारः

एवमुक्तः शाखाभेदो व्यासकृतवेदविभागानन्तरमेव व्यासकृतवेदविभागो हि ब्रह्माज्ञया तदुक्तं वायुपुराणे षष्टितमेऽध्याये—

१ तैत्तिरी.

" अस्मिन् युगे कृतो व्यासः पराशर्यः परंतप.
द्वैपायन इति ख्यातो विष्णोरंशः प्रकीर्त्तितः
ब्रह्मणा चोदितः सोऽस्मिन्वेदं व्यस्तं प्रचक्रमे
अथ शिष्यान् स जग्राह चतुरो वेदकारणात् "

शिष्यनामान्युक्तानि तत्रैव—

" जैमिनिं च सुमन्तुं च वैशंपायनमेव च
पैलं तेषां चतुर्थं तु पञ्चमं रोमहर्षणम् "

अत्र नामक्रमो व्यत्यासेनास्ति तथा चोक्तमग्निपुराणे—

" प्रथमं व्यासशिष्यस्तु पैलो ह्यृग्वेद पारगः "

इत्यादि पुराणान्तरेषु पैल—वैशंपायन—जैमिनि—सुमन्त्विति क्रमदर्शनात्—

वेदस्य एकत्वे याज्ञवल्क्यस्मृतौ—

" वेदोऽखिलो धर्ममूलम् "
" श्रुतिस्तु वेदो विज्ञेयो० " इत्येक वचननिर्देशः

सचैको यजुर्वेदनामा आद्यश्च तदुक्तं विष्णुपुराणे तृतीयांशस्य षष्ठेऽध्याये—

" आद्य एको यजुर्वेदस्तं चतुर्धा व्यकल्पयत्
चातुर्होत्रमभूत्तस्मिंस्तेन यज्ञमकल्पयत् "

वायुपुराणे षष्टितमेऽध्याये—

" आद्यो वेदश्चतुष्पाद. शतसाहस्रसंमितः
पुनर्दशगुणः कृत्स्नो यज्ञो वै सर्वकामधुक् "

ब्रह्माण्डपुराणे चतुस्त्रिंशत्तमेऽध्याये—

" आद्यो वेदश्चतुष्पाद. शतसाहस्रसंमितः
एक आसीद्यजुर्वेदस्तं चतुर्धा व्यकल्पयत्
चातुर्होत्रमभूत्तस्मिंस्तेन यज्ञमकल्पयत् "

तथाऽग्निपुराणे पञ्चाशदधिकशततमेऽध्याये—

---

१ अस्मिन्निति वेदविचारनामक ग्रन्थे पाठः ।

" आद्यो वेदश्चतुष्पादः शतसाहस्रसंमित.
एक आसीद्यजुर्वेदस्तं चतुर्धा व्यकल्पयत् "

कूर्मपुराणेऽपि एक आसीद्यजुर्वेद इत्यादि विष्णुपुराणवत् व्यवस्थास्ति सा तत एव ज्ञेया ।

वेदे हि मुख्यानि कर्माणि चत्वारि आध्वर्यवं हौत्रमौद्गात्रं ब्रह्मत्वं चेति तान्युक्तानि विष्णुपुराणे षष्टितमेऽध्याये, ब्रह्माण्डपुराणे चतुस्त्रिंशत्तमेऽध्याये, अग्निपुराणे च पञ्चाशदधिकशततमेऽध्याये—

" आध्वर्यवं यजुर्भिस्तु ऋग्भिर्हौत्रं तथैव च
औद्गात्रं सामभिश्चक्रे ब्रह्मत्वं चाप्यथर्वभिः " इति

एवं विभक्तस्याद्यजुर्वेदस्य चत्वारो भागाः समजनिषत, तेषां नामानि कर्म-मन्त्रानुसारेण परिकल्पितानि तदुक्तं ब्रह्माण्डपुराणे चतुस्त्रिंशत्तमेऽध्याये—

" ततः स ऋच उद्धृत्य ऋग्वेदं समकारयत्
हौत्रं प्र(प्रा)कल्पयत्तेन यजुर्वेदं जगत्पतिः
सामभिः सामवेदं च तेनौद्गात्रमकल्पयत्
राज्ञस्त्वथर्ववेदेन सर्वं कर्माण्यकारयत् "

अयमर्थः—स जगत्पतिस्तत आद्य यजुर्वेदात्, ऋचः ऋग्रूपान्मन्त्रानुध्धृत्य–विविच्य ( पृथक् कृत्वा ) तादृशमन्त्रसमुदायात्मकम् आद्ययजुर्वेदभागं नाम्ना ऋग्वेदमकारयत्, तेन ऋग्वेदेन हौत्रं होतृकर्म अकल्पयत् एवं सामभिः परिज्ञातान् मन्त्रानुद्धृत्य पृथक् कृत्वा तादृशमन्त्रसमुदायात्मकमाद्ययजुर्वेदभागं सामवेदं समकारयत् नाम्नेति शेषः। तेन सामभागेन औद्गात्रम् उद्गातृकर्माकल्पयत् तथा पृथक् कृतेनाथर्ववेदेन तदाख्यभागेन राज्ञो राजसंबन्धीनि सर्वाणि कर्माणि अकारयत् । यतस्त्रयो वेदा उध्धृतास्तेन ध्रुवेणावशिष्टेनाद्ययजुर्वेदेन आध्वर्यवं कर्म कर्तव्यमिति स्थितं यथा श्रीभागीरथ्या गङ्गायाः सकाशादनेककुल्यानामुद्धारे सति स्वल्पप्रवाहाया अपि भागीरथ्या गङ्गाव्यवहारस्तथाऽस्याप्याद्ययजुर्वेदव्यवहारोऽनुस्यूतो युक्त एव । तद्वद् आध्वर्यवं कर्म प्रधानं तदुपकारकाणि हौत्रादीनि कर्माणि इति प्रधानस्य श्रेष्ठतया तत्साधकानां यजुषां सर्वोत्तमत्वेनाद्यवेदस्य यजुर्वेदसंज्ञा संप्रतिपन्ना

स चायमाद्यो यजुर्वेदो यथावद्रूप एव समग्रो भगवता व्यासेन श्रीमते वैशंपायनमहर्षये प्रादायि (दत्तः) स महर्षिस्तु शिष्यपरंपरया वेदकल्पतरोः शाखा विस्तारयामास । तत्र

" यजुर्वेदतरोः शाखाः सप्तविंशन्महामतिः
वैशंपायन–नामासौ व्यासशिष्यश्चकार ह "

इति विष्णुपुराणवचनादवगम्यते । इयं शाखानां सप्तविंशतिः संख्या, पूर्वं प्रदर्शिता ब्रह्माण्डपुराणोक्ता षडशीतिः संख्या च परस्परं विरुध्यते, तत्र षडशीति–संख्यायां चरणव्यूहादीनि बहूनि प्रमाणानि सन्ति. वायवीये च (६१) अध्याये—

" वैशंपायन–गोत्रोऽसौ यजुर्वेदमकल्पयत्
षडशीतिस्तु येनोक्ताः संहिता यजुषां शुभाः
शिष्येभ्यः प्रददौ ताश्च जगृहुस्ते विधानतः
एकस्तत्र परित्यक्तो याज्ञवल्क्यो महातपाः
षडशीतिश्च तस्यापि संहितानां विकल्पकाः "

इति स्पष्टमुक्तत्वाद् वैष्णवं वचनमाग्नेयं च वचनं मुख्यशिष्यपरतया प्रारम्भपरतया वा नेयमिति भाति अन्यथा भाष्योक्तसंख्यापूर्तेरभावः स्यात् सा च संख्या वायवीयेऽपि ६१ अध्याये ।

" शतमेकाधिकं कृत्स्नं यजुषां वै विकल्पकाः "

तत्र शिष्यसमुदायान्तःपाती गृहीतशाखो महातपा याज्ञवल्क्य एको गुरुणा वैशंपायनेन परित्यक्तः स्वशिष्यपरिगणनायामनर्हः कृत इत्यर्थः । तदैतिह्यं गृहीतमा–र्यविद्यासुधाकराद्यनेकग्रन्थात् अस्माकं परमगुरु श्रीमद्यज्ञेश्वरशास्त्रिचरणैः । तथाहि

एष किल आद्य यजुर्वेदस्यान्यतमया शाखया समुपजात–जातकर्माद्युपनय–नान्तसंस्कारो महर्षेर्वैशंपायनस्य भागिनेयो दण्डकमण्डलूपलक्षित–

शुक्लयजुर्वेदाविर्भावः

ब्रह्मचर्यः स्वयमप्रकटितप्रतापः प्रतापनिधिः सुवर्णशिखरमिव श्रीयाज्ञवल्क्यः सर्वयजुषां निधानं स्वमातुलं भगवन्तं वैशंपायनमुपवसे, ततः स्वल्पेन कालेन ग्रहणविधया मेधयाऽधिगतसकल–स्वशाखाध्ययनो महाप्रतापः संबभूव, अथ कदाचित् स स्वाप्तशिष्यौ द्वादशवार्षिकस्य व्रतस्याचरणाय गुरुणादिष्टा निवदन् स्वर्धिष्णानालोच्य श्रीवैशंपायनमभ्युपेत्य निवेदयामास । भगवन् ! आज्ञापय

१ मतं इत्यर्थः । २ इदं वच चतुर्दशे ६१ अध्याये । ३ इदं मतं पूर्वोक्तम् (व–६)

मामेतद् परीवादापनोदाय व्रतमाचरितुम्। अहमेव सकलं व्रतमाचरिष्यामि, किमेभिर्वराकैरिति, तदाकर्ण्य समुत्पन्नमन्युर्भगवान् वैशंपायनोऽभिहितवान् अलं त्वया ब्राह्मणावमानिनाऽभिमानिना शिष्येण, यदधीतं मत्तस्तत्त्यजाश्विति,

सोऽपि किमहं निगीर्णमन्नमिव वमामीत्युपहासवादं वदन्, गुरुणा तथास्त्विति प्रत्युक्तो यावद्वमितवांस्तावद्वाङ्मयं वेदज्योतिर्मूर्त्तं खादिराङ्गारकल्पं पुरस्ताद्भुवि विप्रकीर्णमपश्यत् स्वयं च न किंचित्ससार एवं याज्ञवल्क्यपरित्यक्तं कं चन वेदभागं गुर्वनुज्ञया येऽगृह्णंस्ते तैत्तिरीया अभूवन्। अथ यजूंषि प्राप्तुकामो महर्षिर्याज्ञवल्क्य उग्रेण तपसा सूर्यमुपासांचक्रे प्रसन्नाच्च भगवत आदित्यादयात यामानि यजूंषि प्राप्तवान्। तदुक्तं वायवीये ( ६१ ) अध्याये—

अपरयजुर्वेदशाखा.

" ततो यानि गतान्यूर्ध्वं यजूंष्यादित्यमण्डलम्
तानि तस्मै ददौ तुष्टः सूर्यो वै ब्रह्मरातये
अश्वरूपाय मार्त्तण्डो याज्ञवल्क्याय धीमते
यजूंष्यधीयते यानि ब्राह्मणा येन केन च
अश्वरूपाय दत्तानि ततस्ते वाजिनोऽभवन् " इति

इमानि यजूंष्यधीयानाः काण्वादयः पञ्चदश ते याज्ञवल्क्यशिष्याः प्रथमं शाखाविचारेऽभिहिताः। आद्ययजुर्वेदादपर एवायं सूर्यमण्डलादागतो मन्त्रभागरूपो वेद इति स्पष्टं प्रतीयते तस्य प्राचीनवेदसमानतापादनेन स्वमातुलस्य वेदभागमुद्वमयतो वैशंपायनस्य मनसि अप्रियमुत्पादयितुमपरवेदस्य ब्राह्मणमाविर्भावयांचकारेत्युक्तं महाभारते शान्तिपर्वणि—

शतपथोत्पत्ति

" ततः शतपथं कृत्स्नं सरहस्यं ससंग्रहम्
चक्रे सपरिशेषं च हर्षेण परमेण ह
कृत्वा चाध्ययनं तेषां शिष्याणां शतमुत्तमम्
विप्रियार्थं सशिष्यस्य मातुलस्य महात्मनः " इति

अयं पञ्चदशशाखोऽपरो यजुर्वेदः। एतेनापरवेदस्य सप्तदशशाखावादिनश्चिन्तनीयाः। ये तु अपरवेदस्य पञ्चदशशाखानां षडशीत्यामन्तर्भावं कुर्वन्ति ते

---

१ परीवादश्चोक्तो वायुपुराणे "कार्यमासीदृषीणां च किंचिद् ब्राह्मणसत्तमाः मेरुपृष्ठे समासाद्य तैस्तदात्विति मन्त्रितम्॥ यो नोऽत्र सप्तरात्रेण ना गच्छेद् द्विजसत्तम स कुर्याद् ब्रह्मवध्यां वै समयो नः प्रकीर्तितः॥ ततस्ते सगणाः सर्वे वैशंपायनवर्जिताः प्रययुः सप्तरात्रेण यत्र संधिः कृतोऽभवत् " इति.

महाभाष्योक्तसंख्याविरोधादुपेक्ष्या: । तथा विभक्तानां वेदानां प्रथमोभाग ऋग्वेद इति व्यवहारे तस्य प्राथम्यमुपपद्यते केचित्तु भाषास्वारस्याभिनिवेशिनः तत्तारतम्येन ऋग्वेदस्य प्राथम्यं कृतकत्वं च प्रतिपादयन्तस्तदुद्भवसमयभेदं वर्णयन्ति । प्रमाणाधीनमतयः प्रामाणिकास्तु जगदाप्तमहर्षिप्रदर्शितां विभागव्यवस्थामेव वास्तवीं मन्यन्ते.

युज्यते चैतत् यतो विभक्तेषु वेदेषु विभागसमये गायत्रीमन्त्राऽपोहिष्टा, उदुत्यं जातवेदसम् इत्यादयो बहवो मन्त्रा. समानानुपूर्विका यथावस्थिता गृहीता दृश्यन्ते. अतएव शाखानां भेदेपि केचिन्मन्त्राः स्वल्पेनापि भेदेन विनाऽनुभूयन्त- इति नाविदितं विदुषाम् । यदि सर्वे वेदाः पृथगुत्पत्तिमन्तः पृथगवस्थिता भवेयुस्तदा तादृशानां बहूनां मन्त्राणां समानानुपूर्वी दुर्लभा पाश्चात्यसंग्रहे तु न्यूनतेति सुधिय एव विभावयन्तु.

यजुर्वेदस्य शुक्लकृष्णविचारः

अथ इदानींतनाः केचन कृष्णशुक्लभेदेन यजुर्वेदद्वयं मत्वा मैत्रायणीयशाखा शुक्लयजुर्वेदस्य वा कृष्णयजुर्वेदस्येति भ्राम्यन्ति तद्विषये न किंचित्प्रमाणमुपलभ्यते सर्वासां श्रुतीनां समानेऽपि प्रामाण्ये याज्ञवल्क्योपलब्धस्य अपरयजुर्वेदस्य औत्कृष्ट्यार्थं शुक्लत्वमितिमन्यमानैस्तद्वेदमधीयानैः स्वसंतोषायान्यस्मै हेतवे वा समुद्भावितोयं प्रवादो गतानुगतिकतया प्रसृतः परिवर्तते व्यवहारे, तं व्यवहारं सत्यापयितुमनेकव वैदिका विवदन्ते क्लिश्यन्ति च तन्मुधैव. ये तु तत्प्रतिपत्तये—

“ शुक्लं कृष्णमितिद्वेधा यजुश्च समुदाहृतम्
शुक्लं वाजसनेयं स्यात्कृष्णं स्यात्तैत्तिरीयकम् ”

इति स्मृत्यन्तरवचनं पुरस्कुर्वन्ति तन् नाद्यवेदव्यवहारापलापाय दृढतरो हेतु तद्वचनस्य प्रायशोऽनुपलम्भेन निर्मूलत्वात् समूलत्वेपि तैत्तिरीयकशाखाया एव कृष्णात्वव्यवहारेण तदितरशाखात्मक—वेदस्याद्यजुर्वेदतयैव व्यवहारस्यौचित्यात् सर्वसाधारणकृष्णात्वव्यवहारस्तु गड्डलिकान्यायेन बोध्यः । नायं व्यवहारोऽपरवेदाविर्भावात्पूर्वेकाप्युपलभ्यते । अतएव ग्रन्थान्तरे प्राचीन—यजुर्वेद इति व्यवहृतम् । महाभारत टीका प्रणेत्रा सर्वतन्त्रस्वतन्त्रेण श्रीमन्नीलकण्ठस्वामिना हरिवंशस्य भविष्यपर्वणि चतुर्विंशत्यध्याय टीकायां ‘ आद्ययजुर्वेदिनाम् ’ इत्युक्तमुपलभ्यते.

अथाद्ययजुर्वेदान्तर्गताया मैत्रायणीयशाखाया: प्रामाण्येन ग्रहणं बहुषु ग्रन्थेषु दृश्यते यथा वेदविचारनामकग्रन्थे निर्णयसिन्धौ जीवत्पितृक श्राद्धविषये निर्णयामृते, संस्कारकौस्तुभे नान्दीश्राद्धप्रसंगे, कात्यायनसूत्रभाष्यादौ च। मैत्रायणीयशाखाया भेदेषु प्रथमा मानवा मानवसूत्रानुसारिणामेषां सर्वे संस्कारा सुज्ञेया यथा स्युस्तथा कर्तुं मानवगृह्यसूत्र भाष्यं विरचितं श्रीमदष्टावक्रदेवेन स हि भट्टकुमारं व्याख्याकर्तारं निर्दिशति (पृ. १७–३) तथा (पु. २–१–२) भाष्ये अन्यशब्दनिर्देशेनखण्डनं करोति ततोऽवगम्यते कदाचिदेतद् गृह्यस्य टीकान्तरं स्यात्। तद्वत् प्रो. श्रीकावरमहोदय उपोद्घाते लिखितवान् एकं वचनं यथा—

समयविचार:

" अष्टावक्रेण वक्रोक्त्या भाष्यमेतत्प्रकीर्तितम्
श्रौतसाम्यानुकारित्वाद्विस्पष्टीक्रियते मया "

तेन निर्धार्यते यदेतद्भाष्यस्य व्याख्यापि वर्तते परं सा नोपलभ्यत इति विषाद:। एतद्भाष्यप्रणेता भट्टाष्टावक्रदेवो द्वितीयपुरुषे—

" शते पूर्णे तु वर्षाणामृतौ शिशिरसंज्ञके "

इत्यालिखति ततोऽस्य कियान् समय इति नाध्यवसातुं शक्नुम: किमत्र शककर्तु: शतवर्षपूर्तिरभिप्रेता आहोस्विदन्यस्य ? नतावदन्यस्य वक्तुं शक्याऽसंभवात् यदि भाष्यकारवयसो मानमित्युच्येत तथापि प्रकृतानुपयोगि शककर्तुरन्तिमापि शतवर्षपूर्तिर्न, तदधिकवर्षोपरिलिखितस्य च संज्ञकपुस्तकस्य सत्वात् ततश्चेदमनुमातुं शक्यते यदि बाधकं नायायात् शतशब्दो पञ्चदशवाची श–कारस्य पञ्चवाचकत्वात् त–कारस्यैकवाचकत्वादङ्कानां वामतो निवेश:। तथा च संवत्–वर्षाणां पञ्चदशके शतके पूर्णे शिशिरर्तौ द्वितीयो भाग: (पुरुष:) आरब्धो व्याख्येयतयेति १५०० संवद्वर्षस्य सांप्रतम् ४८२ द्व्यशीत्यधिकशत चतुष्टयी समपद्यत इति खिस्तीयं पञ्चदशतमं शतकमेतद्भाष्यनिर्माणकाल: प्रतीयते पराशरगृह्योपरि विश्वनाथनिर्मितं तु भाष्यं १६९२ तमे वर्षे लिखितमिति स्वयं दर्शयति यथा—

" संवन्नेत्रग्रहकलामितेऽब्दे चोत्तरायणे,
समाप्तिमगमद्भाष्यं माघे भूते सिते कुजे "

इति गुजराती मुद्रालयाधिपतिना श्रीखिस्तीये १९१७ वर्षे मुद्रितस्य ४०३ पत्रेऽस्ति ततश्चाष्टावक्र: प्राचीन:। तदभिजनाद्यवगमाय तु न किंचिदुपलभ्यते.

गृह्यसूत्रसमयः प्रायः कलेरारम्भ संभवति यत. स्वशाखामन्त्रान् प्रतीकरूपान् परशाखामन्त्रान् समग्रानादर्शयन्ति गृह्यप्रणेतारः, ततो गृह्यसूत्राणि शाखावलम्बीनि शाखाश्च वेदविभागोत्तरमभूवन् वेदविभागो व्यासकृतः व्यासस्तु द्वापरान्ते इति सुप्रसिद्धं स्वीयान्तेवासिनो वैशंपायनस्य भागिनेयेन वैशंपायनादधीतं वेदं परित्यजता श्रीयाज्ञवल्क्येनाविष्कृतं ब्राह्मणं वर्णितवान् महाभारते शान्तिपर्वणि व्यास , व्यासादीनां लोकान्तर गमनं तु नोपलभ्यते चिरजीवित्वात् परंतु भगवान् व्यासो भारतं युद्धं वर्णितवान् तदवधिस्तु दृष्टसंचारोऽस्य निर्विवाद । राजतरंगिण्याम्.

" शतेषु षट्सु सार्धेषु त्र्यधिकेषु च भूतले ( ६५३ )
कलेर्गतेषु वर्षाणामभवन् कुरुपाण्डवाः "

एवमुक्तम् । ततस्तु व्यासस्य पूर्वभावित्वमित्यत्र न कस्यापि विवाद एतावता व्याससमयः ख्रीस्तारम्भात्पूर्वं प्रायस्त्रिसहस्राधिको बोध्य समुपष्टम्भकं चात्र सात्त्विकानां संशोधननिपुणानां गवेषणम् । ते हि 'चन्द्रगुप्तसभा' 'पुष्पमित्रसभा' 'पुष्पमित्रो-यजते' याजका याजयन्ति इत्यादीनि महाभाष्यगतान्युदाहरणान्यवष्टभ्य पुष्पमित्र-राज्ये तदनन्तरं वा पतञ्जलेः समयमनुमाय ख्रिस्तीयात्पूर्वं पञ्चशतशतानि परिकल्पयन्ति.

युज्यते चैतद् आनन्दाश्रममुद्रिते वायुपुराणे ९९ अध्याये श्लो. २९९ त ३३७ श्लोकपर्यन्तमष्टपञ्चाशद्राज्ञां वर्षाणि भारतोत्तरं परिगणितानि तानि विपश्चिषु वेदनेत्र ( २४५० ) मितानि सम्पद्यन्ते.

तत्रान्त्यो नरपतिः पुष्पमित्र. स च पूर्वोक्तान् [illegible] पञ्चशताभ्यधिक इति सिद्धः प्रागुक्तो व्याससमय । एतेन वेदविभागसमयोऽपि [illegible] व्यासस्य एव व्यासशिष्याणां पैलवैशंपायनप्रभृतीनां गुरोरपेक्षया न्यूनानि [illegible] न पृथक् लिख्यन्ते.

वैशंपायनादधीतं वेदं परित्यज्यादित्याद्वगतो वेदमुपार्जयतो [illegible] समयस्तु वैशंपायनान्न्यून इत्यर्थादायातम् [illegible] श्रीयाज्ञवल्क्य [illegible] पर्यन्तं तु न [illegible] [illegible], [illegible] [illegible] संभूता इति [illegible]

1 [illegible]
[illegible]-११-[illegible]

नोपतिष्ठेत्तर्हि महाभारतसमकालिकत्वं महर्षेर्याज्ञवल्क्यस्य प्रतिभाति यदि सीरध्वजसमकालिकत्वं स्यात्तर्हि याज्ञवल्क्यमातुलवैशंपायनमहर्षेस्तद्गुरोर्वेदव्यासस्य च सीरध्वज जनकपूर्वभावित्वं तत्समकालिकत्वं वा परिकल्पनीयम् तच्च पुराणेतिहाससंमतं स्यान्नवेति विभावनीयं तद्विवेपणानैपुण्यवद्भिः ।

इदं मानवगृह्यं वाराहगृह्यात्प्रथममिति अवधारयितुं वाराहगृह्यप्रस्तावनायां दर्शितं कारणम् आर् एस् शास्त्रिमहोदयेन ततोऽधिकं कारणं सर्वसंस्कारेषु बहूनि मानवगृह्यसूत्राणि गृहीतानीत्यपि संभवति.

अस्मिन् कार्ये सहायार्थं मिलितानां कादिचान्तानां पञ्चानां क, ख, ग, घ, च, संज्ञकानां पुस्तकानां समयादिकं तु सर्वमधो निर्दिष्टानुसारेण—

१ प्रथमं वे. शा. सं. ग. ग. श्रीमदमदावादनिवासिनः पाठकोपाव्हयस्य रामकृष्णशास्त्रिणः पुस्तकं तत् "संवत् १९६१ सन् १९०५ वर्षे इटावानगरे पण्डितप्रवरश्रीभीमसेनशर्मणा वेदप्रकाशनाम्नि मुद्रालये मुद्रितं भाषानुवादसहितं" पुरुषद्वयात्मकं शुद्धम् क संज्ञकम् ।

२ श्रीमदमदावादनिवासिनः पाठकोपाव्हयस्य वे. शा. शं. रा. रा. रामकृष्णशास्त्रिणः प्रथमः पुरुषः सप्तदशपत्रात्मकस्तदन्तिमे पृष्ठे "संवत् १८३६ ना वर्षे माघमासे कृष्णपक्षे ३ तिथौ बुधवासरे लिखितं मोढज्ञाति चातुर्वेदिमशरपि(पी)ताम्बरेण ल(लि)खितं पठनार्थ प्रयो(परो)पकारार्थे शुक्लश्री ९ शु. अंबरजित छे" इति लिखितं तथा द्वितीयः पुरुषश्चतुर्दशपत्रात्मकस्तदन्तिमे पृष्ठे "इति मैत्रायणीये गृह्यस्य द्वितीयः पुरुषाख्यो भागः समाप्तम् (:) श्रीरस्तु संवत् १८८३ कार्तिक शुद १ शनौ अद्येहशोद(र)थाग्राममधे(ध्ये) वास्तव्ये मोढज्ञाति शुक्ल ९ कृष्णाजी शुक्लश्री ९ वि(वी)रेश्वर सु० शुक्लश्री ९ अंदरजी कनीष्टभ्रातृ दयालजी ल(लि)खितं ॥ आत्मपठनार्थं" इति मिलित्वा ३२ पत्रात्मकं पुस्तकं शुद्धम् ख संज्ञकम् ।

३ इदं श्रीमन्महामहिमश्रीगायकवाडनरेन्द्रश्रीमत्सयाजीरावमहाराज संस्थापित विशाल संस्कृतपुस्तकालयस्याधिकारिणा श्रीविनयतोषभट्टाचार्य महोदयेन प्रेपितम् पुस्तकं विंशतिपत्रात्मकं सम्पूर्णं पुरुषद्वयं सुवाच्याक्षरं लेखनसमयरहितं प्रायः शुद्धम् ग संज्ञकम् ।

---

१ इमे अपेक्षितानि पुस्तकान्यविलम्बेन प्रयच्छन्ति ।

४ इदं श्रीपीजग्रामनिवासिनो मोढज्ञातीयस्य याज्ञिकावटङ्कस्य श्रीगोकलभाइसूनो ग. रा. श्रोच्छ्वलाल शर्मणा पुस्तकं तत्र श्रीऋष्यदेशे सन् १८९७ वर्षे पेरीसनगरे प्रो. क्रावर महोदयेन मुद्रितम् तद्भाषया विस्तृतप्रस्तावनया समेतं पाठान्तरयुक्तं चतुःषष्टिपत्रात्मकमतिशुद्धम् घ संज्ञकम् ।

५ इदं श्रीनासिकक्षेत्रे पञ्चवटीवास्तव्यस्य जानोरीकरोपनामकश्रीयज्ञेश्वरात्मजस्य वे. शा. सं. ग. रा. **श्रीमनोहरशास्त्रिणो** यत्प्रथमः पुरुष एकचत्वारिंशत्पत्रात्मक तत् "संवत् १८८८ शके १७५३ वर्षे खरनाम संवत्सरे माघकृष्णाष्टम्यां भृगुवासरे नारायणभट्टात्मजमोरभट्टेन कष्टेन लिखितम्" तथा यद्द्वितीय पुरुष षोडशपत्रात्मक तत् "शके १७२३ दुर्मती(ति)नामाब्दे श्रावण–कृष्ण ३ सौम्यवारेदं (इदम्) पुस्तकं समाप्तम् । गंगातीरे चान्द्रावतीनगरे गंगाधरेण लिखितम्" इति मिलित्वा सप्तपंचाशत्पत्रात्मकं पुस्तकं शुद्धं च संज्ञकम् ।

तेषामेव भाष्यपुस्तकानि क्रमेण कादिसंज्ञकानि–तेषां स्वरूपादि यथा––

१ क संज्ञकं पूर्वोक्त श्रीरामकृष्ण–शास्त्रिणः पुस्तकं केवलप्रथमपुरुषव्याख्यामात्रम् अष्टपञ्चाशत्पत्रात्मकम् १७३७ शके नासिकक्षेत्रे लिखितस्य प्रतिकृतिरूपम् प्रायः शुद्धम् ।

२ ख संज्ञकं श्री. म. गा. पुस्तकालयस्य पुस्तकद्वयं तत्र प्रथमं नवपत्रात्मकम् प्रथमपुरुषस्य चतुर्थखण्डव्याख्यावधिकं सुवाच्यं शुद्धं च तस्य लेखनकालस्तु अपूर्णत्वान्नोपलब्धः, तथा तदीयमेव द्वितीयं पुस्तकमग्रे तत्स्थाने विनियुक्तं प्रायः शुद्धम् द्वितीयपत्रमारभ्य त्र्युत्तरशतपत्रात्मकं द्वितीयपुरुषस्य नवमखण्डपर्यन्तमपूर्णत्वाच्छकादिरहितमतिजीर्णत्वादनुमेय–शतद्वयवर्षसमयकं तदपि ख संज्ञकम् ।

३ ग संज्ञकं श्री. म. गा. पुस्तकालयस्य पुस्तकमुभयपुरुषव्याख्या––रूपं नात्यशुद्धं संपूर्णं च पुस्तकसमानत्वेन कदाचित्तत्प्रतिकृतिरूपेण संभाव्यमानं सप्ततिपत्रयुत षष्टिपत्रं तत्र "शके १७६२ शर्वरीनाम संवत्सरे चैत्रमासे संगमनेरकरोपनामकेन धांदरफलग्रामान्तर्गत जोशिग्रामवासिना महिपतिभट्टेन लिखितः" (पुरुष) एवमुभयत्र ।

४ घ संज्ञकम् श्रीमदोच्छ्वलाल शर्मणा ऋष्यदेशे इ० स० १८९७ वर्षे पेरीसनगरे प्रो० क्रावर महोदयेन मुद्रितं यावन्मुद्रितं तावत् सुशुद्धम् बहुषु सूत्रेषु

---

१ इदं केवलं पत्रप्रेषणमात्रेण स्वीयं पाठभेदं [illegible] महोदयेन प्रेषितं [illegible] मोच्छ्वलाल शर्मणो [illegible] ।

[illegible] पुस्तकव्याख्यारूप [illegible] (६८) [illegible] एकचत्वारिंशद् [illegible] संपूर्णम् ।

[illegible] संज्ञकं पूर्वप्रदर्शित–श्रीमन्नोहरशास्त्रिणः पुस्तकं प्राय शुद्धं सुवाच्यं च [illegible] भागद्वयेन विभक्तम्. तत्र " शके १७२३, दुर्मतिनाम संवत्सरे [illegible] कृष्ण [illegible] भृगुवासरे [illegible] काशीदेवज्ञसुतजोश्युपनामक-नत्थु-शर्मणा [illegible] " [illegible] ६० पत्रात्मक प्रथमो भाग. ।। तथा " शके १७२३ दुर्मतिनाम-संवत्सरे, [illegible] भौमवासरे [illegible] काशीदेवज्ञसुतजोश्युपनामक-नत्थु-शर्मणा [illegible] समाप्तिं गमितम् " तत्र चत्वारिंशत् पत्रात्मकम् ।

[illegible] —श्रीमद्रघु [illegible] संशोधितमपि [illegible] पुस्तकान्तर- [illegible] परित्यक्तम् ।

[illegible] (?) [illegible]

[illegible] दर्शितम्

[illegible] ( ) [illegible] निवेशितम्

[illegible] [ ] [illegible] प्रदर्शितम्

[illegible]

[illegible]

[illegible]

"संवत् १६४२ वर्षे हेमन्तर्तौ पौषमासे कृष्णपक्षे प्रतिपत्तिथौ भृगुवासरे काशीवास्तव्य **मोढज्ञातीय** ......आत्मपठनार्थम्" तथा "संवत् १८२४ वर्षे आश्विनमासे शुक्लपक्षे द्वितीयायां तिथौ गुरुवासरे ......**मोढज्ञातीय** शु० विशरामात्मज–कृष्णजीसुत–वीरेश्वरात्मज–दयालजीलिखितं पुत्रपौत्रादि पठनार्थम्" इत्यादिकमस्ति ।

मैत्रायणीयानां सर्वाणि कर्माणि मन्थनोत्पन्नेऽग्नावेव क्रियन्ते, तथाचारः ब्रह्मक्षत्रियेष्ववलोक्यते, तेन हेतुना तेऽपि मैत्रायणीयशाखावन्तो भवेयुरिति अनुमानमुत्पद्यते, यथा कथंचिद् भवतु प्रायः मैत्रायणीयशाखिनोऽत्र गुर्जरेषु प्रमादाद्वा तादृशकर्मकाण्डविज्ञाभावाद्वा साधनाभावाद्वान्यस्माद्धेतोर्वा बहवः परशाखाश्रिता दृश्यन्ते, ते चेतः पुनः स्वशाखां प्रतिपत्स्यन्त इत्याशास्महे ।

एतच्छाखायाः कर्मग्रन्था आर्षाः पौरुषेयाश्च प्रायो नष्टप्राया इव न सर्वत्रोपलभ्यन्ते तत्समये मानवगृह्यसूत्रसिद्धिकरणेन शाखोद्धारं समारभ्य महान्तमुपकारभारमाहवन्त प्रजाविद्योदयवृद्धिमिच्छन्तः श्रीमन्नरपतिप्रवराः **श्रीमत्सयाजीरावगायकवाडमहाराजाः** सुखिनो भवन्तु ।

अत्र कार्ये पुस्तकप्रदानादिना सहायं कुर्वतां महाशयानां, निजपुस्तकमन्ये माद्राक्षुरिति संगोपयितुं पत्रोत्तरदानेऽपि बिभ्यतां परममहाशयानां च स्वशाखाहितमुदारतां वा वर्णयितुमनेकजिह्वं विना नान्यः क्षम इत्यावेद्य विरमामि ।

पूर्वदर्शितपुस्तकाधारेण यथामति शोधितेऽप्यस्मिन् ग्रन्थे यदि कचिन् विषयानवगमान्मतिमान्द्यान्मनुजधर्मतया प्रमादतो वा जातं स्खलितं क्षन्तव्यम् पण्डितप्रवरैरिति सप्रश्रयं भूयोभूयः प्रार्थ्यते । यतः—

"गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः"

इति निवेदयति मैत्रायणीयशाखी—

पूर्णेन्दु स्वद्गुणेभनिधि भूमितेऽब्दे
१९८३ मार्गशीर्ष शुदि
पञ्चदश्यां भानुवासरे

विद्वद्वशंवदो
**हर्षजीतनुजनू रामकृष्णशास्त्री पाठकः**
श्रीमन्नरदारदुर्गनिवासी.

---

१ अनेन श्रीमद्गुजरतीन्द्रविलासे [illegible] पुस्तकानि लिखितानि [illegible] मेरवो नगरम् ।

# श्रीमानवगृह्यविषयानुक्रमः

## प्रथमः पुरुषः

इति मानवगृह्यविषयानुक्रमः



॥ श्रीरस्त्वत्र ॥

# श्रीमैत्रायणीयमानवगृह्यसूत्रभाष्यम् ।

## प्रथमः पुरुषः ।

### प्रथमः खण्डः ।

अथ मानवगृह्यसूत्रप्रारम्भः ।

ॐ उपनयनप्रभृति व्रतचारी स्यात् ॥ १

अथ मैत्रायणशाखीयगृह्यसूत्रभाष्यं लिख्यते—

यस्याः प्रसादान्मनुना शब्दशास्त्रमिदं कृतम् ।
सरस्वत्यूनानि कल्पयतु सा नः पातु सरस्वती ॥ १ ॥

'उपनयनप्रभृति व्रतचारी स्यात्' त्रिपदमिदं विधिसूत्रम् । उपनयनं व्रतबन्धस्तत्प्रभृति व्रतानि चरेत् । उपशब्दः समीपवचनः । नयतेर्ल्युडन्तस्य भावे नयनम् । वेदग्रहणायाचार्यसमीपे नयनम् । उपनयनात्प्रभृति उपनयनप्रभृति व्रतचारीति चरतेर्गत्यर्थात्ताच्छील्ये णिनिः । उपनयनात्प्रभृति उपनयनप्रभृति क्रियाविशेषणत्वान्नपुंसकलिङ्गमित्यर्थः । उपनयनप्रभृति व्रतानि चरेदिति वक्तव्ये स्यात् व्रतचारी स्यात् । उपनयनादनन्तर व्रतचरणशीलत्वसत्तामात्मनि संपादयेदित्यर्थस्त्वस्तेर्लिङन्तस्यार्थः । एतेन व्रतानामात्मसंस्कारार्थतामपि द्योतयति । तथा च व्रतस्नातकस्स्मृतौ च दर्शितः । आत्मसंस्कारमध्ये गणनात् । स्वयमपि 'एतेन धर्मेण द्वादशेत्युपक्रम्य (१-२-६) ब्रह्मचर्यं चरत इत्यात्मसंस्कारार्थतां व्रतानां वक्ष्यति । अध्ययनार्थतामपि व्रतानां वक्ष्यति 'एतेन धर्मेण साध्वधीते' (१-२-७) इति ।

---

१-३. ० घ. । २ त्वुपमानानि ग । ४-५. ० क. । ४-६, ० घ. ।

**मार्गवासाः संहतकेशो भैक्षाचार्यवृत्तिः सशल्कदण्डः सस।**
**मुञ्जीं मेखलां धारयेदाचार्यस्याऽप्रतिकूलः सर्वकारी ॥ २ ॥**

ननु चोपनीतस्याध्ययनेऽधिकारादुपनयनं पूर्वं वक्तव्यं पश्चादध्ययनव्रतानीति गम्यते। सत्यं गर्भाधानादिषूपनयनान्तेषु संस्कारेषु पितुरधिकारः। 'योगधर्मेण इति। अध्ययनव्रतेषु स्वयमधिकारो 'गुरूपदिष्टेषु तु' तस्माद्भिन्नाधिकारत्वात्पूर्वं वोच्यतां पश्चाद्वा को विशेषः। नैतत्सारं भिन्नाधिकारत्वेऽप्येकत्र द्रव्येषु द्रव्याणां समावेशाद्यः पूर्वभावी संस्कारः स पूर्वो वक्तव्यः स्यादित्युपनयनं तावत्पूर्वं वक्तव्यमिति न्याय्यम्। सत्यम्। उपनयनमेवाऽत्र पूर्वं सूत्रयितुमुपक्रान्तम्। यतो जातपुत्रस्य जातकर्मादिषूपनयनान्तेषु पितुरधिकारः। तदनुज्ञया वाऽन्यस्य कस्यचित्। गर्भाधानमपि लब्धभार्यया सव्यपेत्तं स्त्रयादिव्यत्यासं जपतीत्यादि। भार्या चोद्वाहोक्तेन विधिना 'भार्यां विन्दते' (१-७-३) इत्यादिना भवति। भार्यावेदने चाधीतवेदोऽधिक्रियतेऽचलव्रतश्च तथा च वक्ष्यति 'एतेन धर्मेण द्वादशचतुर्विंशति। (१-२-६) रिति उपक्रम्य 'स्नात्वा स सर्वं विन्दते यत्किंचिन्मनसेप्सती'-ति गार्हस्थ्यं प(पा)रिव्राज्यं वा यत्किंचेति। मनुनाऽपि षट्त्रिंशदाब्दिकमित्युपक्रम्य 'अविप्लुतब्रह्मचर्यो गृहस्थाश्रममावसेदिति' (म० ३-२) वसिष्ठेनापि 'चाविप्लुत ब्रह्मचर्योपसंकेतमावसेदिति'। 'अतोऽधीतवेदो भार्यां विन्दत' इति स्थापितोऽध्ययनाद्युपनयन-पर्यन्तेष्वेकोऽधिकारीति। तस्मादुच्यते प्राग्व्रतेभ्यः पितुरधिकारो व्रतादौ तु स्वयमिति। उपनयनप्रभृतिगृहणात् प्रागपि वेदस्यारम्भाद्व्रतचारी स्यादिति गम्यते। तच्च प्रागध्ययनारम्भाद्भैक्षचरणं नास्तीति वृद्धैरयुक्तमुक्तम् ॥ १ ॥

इदानीं व्रतान्युच्यन्ते

मृगविकारो मार्ग, मार्गं वस्ते इति मार्गवासाः। औणादिकोऽसुन्प्रत्ययः। मार्गं वासो यस्येति वा इदं चोत्तरीयं वास इत्यौपचारिकं वास इव वासः। मुख्ये हि वासस्त्वे मार्गस्योत्तरीयत्वेऽभ्युपेते द्विवस्त्रता स्यात् ततश्च 'द्विवस्त्रोऽत ऊर्ध्वं' मिति (१-२-१७) विरुध्येत। स्मृतौ तु विशेषः

१-२, ० घ. । ३-६, ० घ. । ४ त्यत उ, ख. । ५ रेवा ख. ।

# यदेनमुपेयात् तदस्मै दद्याद् बहूनां येन संयुक्तः ॥ ३ ॥

'कार्ष्णरौरवबास्तानि चर्माणीति' (म० २-४१)। व्रतचारी स्यादिति सामान्यविधिः सर्वत्राऽधिकृतोऽत्र प्रकरणे-तेन मार्गवासाः स्यात्संहतकेशः स्यादिति परिसमापनीयं वाक्यम्। संहतकेशः संहताः कृन्ताः केशा यस्येति यद्वा संहताः संगता जटीभूताः केशा यस्येत्युभयमप्येतत्प्रमाणम्। तृतीयोऽपि पक्षोऽस्ति 'शिखाजट' (१-२-६) इति वक्ष्यति, मुण्डः शिखाजटः सर्वजटो वेति। भैक्षाचार्यवृत्तिः—भिक्षाणां समूहो भैक्षं, भैक्षं चाचार्यश्च भैक्षाचार्यौ तौ वृत्ती यस्य स भैक्षाचार्यवृत्तिः। भैक्षवृत्तिश्च स्यादाचार्यवृत्तिश्च स्यादित्यर्थः। भैक्षाऽलाभे वा आचार्याद्वृत्तिः। वृत्तिशब्दस्य व्यर्थता यदोभयं नियम्यते तदा वाक्यभेदः स्यात्। इदमेव युक्ततरं व्याख्यास्यामः। नन्वाचार्यानुवर्त्तकत्वं वक्ष्यति च 'आचार्यस्याप्रतिकूलः सर्वकारी'ति। स्मृत्यन्तरेऽप्युक्तम् 'अलाभेऽप्यन्यगेहाना'मित्यादि (म० १-१८४)। सशल्कदण्डः सह त्वचा दण्डः स्यादित्यर्थः। 'ब्रह्मणो बैल्वपालाशा'वित्यादि स्मृत्यन्तराद्विशेषः। सप्तमुञ्जां मेखलां धारयेत्। मुञ्ज शब्दः शरमुञ्जमाह। 'मुञ्जाभावे तु कर्त्तव्या कुशाश्मन्तक वल्वजै'रिति तेन सप्तमुञ्जा शरमय्येव न पुनर्दर्भवीरणानाम्। सप्तमुञ्जामिति सप्तानां मुञ्जानां विकारः सप्तभिर्मुञ्जैर्वा निर्वृत्ता या तां बिभृयात् कटिदेशे, स्यादिति वर्त्तते तेन धारयतेर्विधिप्रत्ययोऽनुवादः सार्थकं पुनर्वचनमनुवादः। आचार्यस्याप्रतिकूलः। अप्रतिरोद्धा गुरोः स्यादित्यर्थः। अलीकनिर्बन्धवर्ज्जीति यावत्। सर्वकारी सर्वं मृदुदकाहरणादि यत्कृत्यमाचार्यस्य गृहे तत्कारी स्यादनाज्ञातोऽपि सर्वं प्रेष्यकर्म कुर्यात् ॥ २ ॥

यदेनमुपेयात्तदस्मै दद्यात् ॥ यद्धनं पित्रादेर्निधिलाभाद्वा ब्रह्मचारिणमुपनयेत्तद्धनं तस्मै आचार्याय दद्यात् बहूनां येन संयुक्तः— बहुशब्दोऽनेकोपलक्षणस्तेन द्वयोरपि येन संयुक्तः स्याद्बहूनामाचार्याणां येनाचार्येण व्यापारसंबन्धेन युक्तस्तस्मै एव दद्यात्। न विभज्य सर्वेभ्य इति परिसंख्यानार्थं वचनं कामचारप्राप्तेः ॥ ३ ॥

१-२, ० घ.

नास्य शय्यामाविशेत् ॥ ४ ॥ न सञ्चरयेत् ॥ ५ ॥ न रथमारोहेत् ॥ ६ ॥ नानृतं वदेत् ॥ ७ ॥ न मुषिताःस्त्रियं प्रेक्षेत ॥ ८ ॥ न विहागर्यो जल्पेत् ॥ ९ ॥ न रुच्यर्थं किंचन [illegible] ॥ १० ॥

'नास्य [illegible]माविशेत्' [illegible] शय्यासने [illegible] [illegible] । [illegible] सामर्थ्यात्प्रतिषेधः उपवेशनो- [illegible] [illegible]। अस्य ग्रहणादन्यशय्यावेश- [illegible] [illegible]मनोपलक्षणार्थमपि ॥ ४ ॥

न [illegible] । 'न रथमारोहेत्' [illegible] नानुवर्तते रथग्रहणं [illegible] ॥ ६ ॥

[illegible] [illegible] निषेधः । [illegible] [illegible] ॥ ८ ॥

[illegible] ॥

[illegible]

[illegible]

[illegible]

सर्वाणि साꣳस्पर्शिकानि स्त्रीभ्यो वर्जयेत् ॥ ११ ॥ न मधुमाꣳसे प्राश्नीयात् क्षारलवणे च ॥ १२ ॥ न स्नायादुदकꣳ वा भ्यवेयात् ॥ १३ ॥ यदि स्नायाद्दण्ड इवाप्सु प्लवेत ॥ १४ ॥

---

'सर्वाणि सांस्पर्शिकानि स्त्रीभ्यो वर्जयेत्' संस्पर्शः संप्रयोगः संस्पर्शनिमित्तानि सांस्पर्शिकानि स्त्रीभ्यः स्त्र्यर्थे यानि स्त्रीसंस्पर्शोत्पादकानि स्त्रीवर्णन काव्यश्रवणं स्त्र्यभिधानं स्त्र्यवयवः स्तनकक्षानितम्बोरुवदनचक्षुरादेरीक्षणं नृत्यगेयादीनि च वर्जयेत् । स्त्रीभ्य इति पञ्चमी वा संस्पर्शभावानि कण्डूयनोद्वर्त्तनादीनि कारणप्रतिषेधेन गृहीतस्य संस्पर्शनस्य कार्यस्य प्रतिषेधः ॥११॥

'न मधुमांसे प्राश्नीयात्क्षारलवणे च' मधुमांसक्षारलवणानीत्येकस्मिन् समासे क्षारलवणशब्दः कर्मधारयत्वेन मन्दधीभिराशङ्क्येत तत्र क्षारस्य यवक्षार गुड सर्जिकादेः प्रतिषेधो न स्यात् लवणस्य च सैन्धवस्येत्येतत्समासद्वयं कृतम् । अपर आह साहचर्यज्ञापनाय समासद्वयम् । तेन यत्र मांसप्रतिषेधस्तत्र मधुनोऽपीति यथोपव(स)त्स्वशने मांसप्रतिषेधाद्राजन्यवैश्ययोरर्थान्मधप्रतिषेध इति ॥ १२ ॥

'न स्नायात्' नित्यकाम्य यादृच्छिकानां स्नानानां प्रतिषेधोऽयम् । न स्नायाश्चर्यनिमित्तजस्येति युक्तम् । 'उदकं वाभ्यवेयात्' नेति वर्त्तते वा शब्दस्य चकारार्थत्वात्तेनायमर्थः । उदकं च नाभ्यवेयात्—उदकमध्ये च तरन्वाऽतरन्वा न गच्छेत् । यदा त्वभ्यवेयात्तदा स्नानकाले उदकसमीपमाचमनार्थं गच्छेदित्यर्थः । वा शब्दश्चशब्दस्यार्थे ॥ १३ ॥

'यदि स्नायाद्दण्ड इवाप्सु परिप्लवेत' यदि वा स्नायात्स्नायाद्वेत्यर्थः । विकल्पो व्यवस्था वा । श्राद्धादौ दण्ड इवेति मलापकर्षमुद्वर्तनादि न कुर्यादित्यर्थः ॥ १४ ॥ केचिदत्र खण्डसमाप्तिं कुर्वन्ति ।

---

१–२, ० घ । ३–४ ० घ । ५–६–० घ । ७–८–० घ ।

प्रागस्तमयान्निष्क्रम्य समिधावाहरेद्धरिण्यौ ब्रह्मवर्चसकाम इति श्रुतिः ॥१५॥ इमꣳ स्तोममर्हत इत्यग्निं परिसमुह्य पर्युक्ष्य परिस्तीर्यैधोस्येधिषीमहीति समिधमादधाति, समिदसि समेधिषीमहीति द्वितीयाम् ॥१६॥

---

'प्रागस्तमयान्निष्क्रम्य समिधावाहरेत्' समिदाहरणस्य कालनियमार्थं वचनम्। 'हरिण्यौ ब्रह्मवर्चसकाम इति श्रुतिः' हरितवर्णे शामे समिधौ ब्रह्म वेदस्तस्य तत्वावबोधो वर्चस्तेजो धर्माऽधर्मप्रकाशकत्वाद्वर्चसः। तत्कामस्य प्रशस्त इति श्रुतिग्रहणं गोचरार्थमात्मनः । अथवा हरितवर्णे पीतवर्णे ते च स्वभावशुष्के पीते भवतो नतु विलन्ने, ते हि शुष्के श्यामे भवतः तथा च स्मृत्यन्तरम् आर्द्रमन्नकामः पुष्टिकामस्तेजस्कामो वा, ब्रह्मवर्चसकाम उपवाताम् । उपवातां हि स्वभावशुष्कामित्यर्थः ॥ १५ ॥

'इमं स्तोम मर्हत इत्यग्निं परिसमुह्य पर्युक्ष्य परिस्तीर्यैधोस्येधिषीमहि इति समिधमादधाति। समिदसि समेधिषीमहीति द्वितीयाम्' समूहनमन्त्रलिङ्गात् तेन तूष्णींकरणं पर्युक्षणपरिस्तरणयोः । परिसमूहनं संमार्जनं हस्तेन समूहिन्या वा । अग्निशब्दोऽग्निसमीपवचनोऽत्र नह्यग्नौ संमार्जनादि संभवति पर्युक्षणेनोपशाम्येताऽग्निः परिस्तरणं दह्येत । स्वाहाकारं केचिदिच्छन्ति समिदाधाने। सायं प्रातश्च जुहुयात्ताभिरग्निमतन्द्रित इति वाक्ये जुहोति शब्दात्। अनुवादोऽसौ। तत्राऽप्युत्पत्तिवाक्ये समिदाधानं चेत्यादधाति प्रयोगः । तस्माद्यथा हविरग्नौ प्रक्षिपति जुहोतीत्युच्यते । एवं समिदाधाने प्रक्षेपसामान्याद्धोमशब्दः । कथं तर्हि शाकलहोमे तत्राप्यादध्यादित्युत्पत्तिवाक्यमस्ति ग्रहयज्ञे च कावार्ता । एवं तर्हि यत्रोत्पत्तिवाक्ये जुहुयादिति श्रुतं तत्र काष्ठैरप्यनदनीयै होमः । ग्रहेभ्य एकैकस्मिन् समिधो जुहुयादर्कादीनामित्युत्पत्तिवाक्यम् । आधानेऽपि क्वचिद्वचनात्स्वाहाकारो भवति । यथा इत्येऽताभिस्तिसृभिः स्वाहाकारान्ताभि रादधाति इति ॥ १६ ॥

---

१ द्वि. ग. । २ बोधोस्य वर्च ग. । ३–४ ० घ । ५–८, ० घ । ६ वाक्ये–पक्षे क ख. । ७ शब्दः=शब्दं क. ख. ।

अपो अद्यान्वचारिषमित्युपतिष्ठते ॥१७॥ यदग्ने तपसा तपो ब्रह्मचर्यमुपेयमसि। प्रियाः श्रुतस्य भूयास्मायुष्मन्तः सुमेधस इति मुखꣳ विमृष्टे ॥१८॥ भद्रं कर्णेभिः शृणुयाम देवा इति श्रोत्रे अभिमृशति ॥१९॥ भद्रं पश्येमाक्षभिर्यजत्रा इति चक्षुषी ॥२०॥ स्थिरै रङ्गै स्तुष्टुवाꣳ सस्तनूभि र्व्यशेम देवहितꣳ यदायु रित्यङ्गानि ॥ २१ ॥ इह धृतिरिह स्वधृतिरिति हृदयदेशमारभ्य जपति ॥२२॥ रुचं नो धेहीति पृथिवीमारभते ॥ २३ ॥ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषमगस्त्यस्य त्र्यायुषम् । यद्देवानां

---

'अपोऽद्यान्वचार्ष ( रिष ) मित्युपतिष्ठते' लिङ्गात् । यदग्ने तपसा तपो ब्रह्मचर्य मुपेयमसि प्रियाः श्रुतस्य भूयास्मायुष्मन्तः सुमेधस इति मुखं विमृष्टे' मुखावमर्शनं पाणिना । भद्रं कर्णेभिः शृणुयाम देवा इति श्रोत्रे अभिमृशति। श्रोत्राभिमर्शनमृक्पादेन दक्षिणेन पाणिना दक्षिणं श्रोत्रं पूर्वपश्चादुत्तर मुभाभ्या मुभयो र्वा सह द्वितीयेन पादेन चक्षुषी तथैव उत्तरेणार्द्धर्चेन शिरःप्रभृतीन्यङ्गानि ॥१७॥१८॥१९॥२०॥२१॥

तथैव 'इह धृतिरिह हृदयदेशमारभ्य जपति' हृदयदेशं चित्तदेशमारभ्येत्यर्थः ॥ २२ ॥

'रुचं नो धेहीति पृथिवीमारभते' पाणिना सामर्थ्यान्नह्यनारभ्य पृथिवीं केनचिदासितुं शक्यते ॥ २३ ॥

त्र्यायुषं जमदग्नेरिति भस्मना शिरःप्रभृतीनामङ्गानां संस्पर्शः । आपोहिष्ठीयाभिरिति समुदायात्करणविभक्तिरेकतमेत्यस्य च युगपदधिकरणवचनेनैतत्तिसृभिर्ऋग्भिः सकृन्मार्जनम् । अथ वा आपोहिष्ठेन त्र्यृचेन मार्जनमिति सिद्धे यदापोहिष्ठीयाभिरिति बहुवचनं तन्मार्जनत्रयं प्रत्यृचं बहुवचनाद्गम्यते

---

१ उपेर्मसि. क. । २-३-० घ. । ४-९, ० घ. । ६-७, ० घ.

त्र्यायुषं तन्मे अस्तु त्र्यायुषमिति भस्मनाङ्गानि संस्पृश्या-
पोहिष्ठीयाभिर्मार्जयते ।।२४।। इति प्रथमः खण्डः ।। १ ।।

ने पुनरापोहिष्ठीयो यावत्य इत्यनेनैकवाक्यता युक्ता, उत्पत्तेर्भेदात्तत्रापो-
हिष्ठीयकरणकं मार्जनम् इतरत्र तु तेजःपरिशेषणमापोहिष्ठीयजपः । मार्जने
तु कर्तृविशेषणमिति नैकवाक्यता । अथ कथं प्रातरग्निकार्यं यस्मात्प्रागस्तमया-
न्निष्क्रम्य समिधावाहरेदिति वचनात्सायमेव स्यात् । उच्यते सन्ध्योपासना-
दुत्तरकालमग्निकार्यं सामर्थ्यादिह लभ्यते । यद्यत्पूर्वं पठति तद्ज्ञापयति
प्रातरप्यस्तीति समिधौ प्रातरेवाहरिष्यति । कथं पुनः संध्योत्तरकालमग्नि-
कार्यमुच्यते सन्ध्योपासनं समिदाहरणं च प्रागस्तमयान्निष्क्रमणं सन्ध्योपा-
सनार्थं समिदाहरणं च तन्त्रेण सम्बध्यते यतो गृहेऽग्निकार्यं बहिःसन्ध्या
प्रागस्तमयान्निष्क्रान्तो नानुपासितसन्ध्यो गृहं प्रविशेत् । इतरथा समिधा-
वाहरेदिति ब्रूयात्तस्मादनुष्ठानादेव न्याय्यादनुक्तमपि प्रातरग्निकार्यं स्यात् ।
अक्रमसूचनादसमाससूचनादर्थग्रहीतसूचनादपठितं परमतं गृह्यते ह्यविरुद्धम् ।
तथा स्मृत्यन्तरं ' सायं प्रातश्च जुहुयात्ताभिरग्निमतन्द्रित ' इति ।। २४ ।।

इति पूरणव्याख्याने प्रथमः खण्डः ।। १ ।।



१–३, ० घ. । २ आपोहिष्ठीयं जपतीत्यनेन. ग० । ४ दिवासमिधौ ग० ।
५ अनुक्रम ग० । ६–७, ० घ. सूत्रार्थ कोविदातु सायमेवाग्निकार्यमाह सूत्रान्तर दर्श-
नात् । तथा चापस्तम्बः ' सायमेवेत्येके ' इति । सायं प्रात: क्रियमाणे तूपन्यासा-
नामसंबन्ध प्रलापात् । इति ग पुस्तकेऽधिकम् ।

# द्वितीयः खण्डः ।

## ॐ अथ संध्यामुपास्ते ॥ १ ॥

ॐ 'अथ संध्यामुपास्ते' अथ शब्दोत्र सन्ध्योपासनप्रक्रियोपन्यासार्थः । सन्ध्याशब्दः प्रक्रियार्थः । वक्ष्यमाणं सन्ध्याप्रकरणमिति प्रतीयते तेनैव प्रातस्तिष्ठन्नुत्तरतो ग्रामस्य पुरस्ताद्वा अन्यो (नयो) रतिदेशः । उपास्त इति लिङर्थे लेट् । स्यादित्यनुवृत्तेः सन्ध्याशब्दे एकस्मिन्प्रक्रियार्थे कृते सन्ध्याप्रकरणसिद्धौ यद्वाक्यप्रकरणार्थमथ सन्ध्यामुपास्त इत्युपन्यस्यते तद्ज्ञापयति यथा संस्कारा अनुपनीतस्य वृथा एवं सन्ध्याहीनस्य व्रतानीति तदुक्तं च 'नानुतिष्ठति यः पूर्वां' मिति सन्ध्योपासिनः कर्मस्वधिकारः स्यादिति वाक्योपन्यासप्रयत्नः । यद्वा अथ शब्द आनन्तर्ये आपोहिष्ठीया अर्थेन्यानन्तर्याऽभिधायिना सन्ध्याङ्गतया बोधयति । यद्वा समुच्चयार्थोऽथशब्दस्तेन प्रातःसन्ध्यावदग्निकार्यं सिद्धम् । अथ केयं सन्ध्या नाम किंचोपासनमिति कालविशेषः सन्ध्या । आस् उपवेशने तदा सन्ध्यायामुपविष्टः स्यादित्यर्थः । अधिकरणसप्तम्यां द्वितीया समग्रसंध्याकालव्यापनार्था । यावत्सन्ध्यामुपासीनः स्यादित्यर्थः । अथोपासनं विद्या गृह्यते । यावत्सन्ध्यं सवितारं मनसि निवेशयेत् । मनो वा सवितरि । अथोपसृष्टस्याप्यास्तेः सकर्मकत्वात्कर्मापेक्षया द्वितीया तदा सन्ध्यामेव विषयान्तराद् अध्याहृत्य तेन मनसा ध्यायेत् । अथवा नामधेयं सन्ध्या । यथा अष्टका दर्शपूर्णमासाविति वत् तदा सन्ध्यामुपासीत सन्ध्याकर्म कुर्यादित्यर्थः । किं पुनर्युक्तं कालवाची सन्ध्याशब्द इति ब्रूमः । कुतः । नामधेयत्वे लक्षणाप्रसङ्गः । न च मुख्ये संभवति लक्षणा युक्ता उपास्तेरपि प्रसिद्धोऽर्थ उपवेशनमुपासनामाश्रितो भवति तत्र सन्ध्यामिति यदि कालाध्वनोरिति द्वितीया तदा सवितुरुपासना । कर्मणि द्वितीया चेत् सन्ध्यामेव द्वितीयाभवन्ती-मुपासीत सताहितेन

प्रागस्तमयान्निष्क्रम्योत्तरतो ग्रामस्य पुरस्ताद्वा शुचौ देशे निपद्योपस्पृश्यापामञ्जलिं पूरयित्वा प्रदक्षिणमावृत्य 'आयाहि

---

हृदा सन्ध्या हि कालः सावित्रः स एव सविता सर्वस्य प्रसविता 'आत्मा सर्वं देवस्यैतत्' श्रुतेः । ननु उपासनार्थे सत्युपवेशनं न लभ्यते तस्मादुपवेशनार्थ एव युक्तः । स्मृतौ 'पश्चिमां तु समासीन' इति (म. २ ११०) वचनात् । उपास्ते समासीनः स्यादित्यर्थः । उपासना तु सवितुः । गायत्रीमन्त्रस्य विवक्षितार्थत्वात्स्यात् संवत्सरो वै गायत्री संवत्सरावयव एव सन्ध्येति सन्ध्योपासनार्थतामुपास्ते । अत 'एवं प्रातास्तिष्ठन्निति' ( १-२-५ ) वक्ष्यति । अथ सन्ध्यामिति कर्मनामधेयमेवाष्टकादिवत् । लक्षणापि लोके दृश्यते गङ्गायां घोष इति । तेनायमर्थः सन्ध्याकर्म कुर्वतीति (अयमर्थः ?) आसिरालभेतिवद्द्रष्टव्यः । यथा पशुयागे यागाङ्गभूत आलभतिरनूद्यते एवं सन्ध्याकर्माङ्गभूत उपास्तिः ॥ १ ॥

प्रागस्तमयान्निष्क्रम्योत्तरतो-ग्रामस्य पुरस्ताद्वा शुचौ देशे निपद्योपस्पृश्यापामञ्जलिं पूरयित्वा प्रदक्षिणमावृत्य-आयाहि विरजे देव्यक्षरे ब्रह्मसंमिते । गायत्रीं छन्दसां मातरिदं ब्रह्म जुषस्व मे[10] ' इत्यावाहयति[11] ' तत्र प्रागस्तमयादिति निष्क्रमणे कालविषयो गृहस्थस्य प्रादुःकृताग्नेर्निष्क्रमणं नेच्छन्ति[12] । तत्र केचित् । उत्तरतो ग्रामस्य पुरस्ताद्वेति दिङ्नियमः । ग्रामस्य ग्रामावयवस्य गृहस्येत्येके । गृहावयवस्यापि प्रधानशालायां ग्रामावयवादित्यपरे तदसत् प्रसिद्धार्थपरित्यागे कारणाभावात् प्रागायतस्य ग्रामस्य पश्चादुत्तरा या दिक् सा गृहस्य पूर्वा यद्गृहस्य पश्चिमाऽपि सर्वग्रामस्योत्तरैवेति यो[13] दोषः शेद्वावगमे वा शब्दो विकल्पे 'शुचौ देशे' इत्यैतिशयादशुचावप्राप्तत्वात् । अशुचिप्रसङ्गश्चाग्नीन्धनादेः[14] । स्वभावशुचावित्यपरे तदसत् प्रयत्नेन शुचिः स्याच्छुचिदेशासंभवे

---

१-२ ० घ. । ३-४-० घ. । ५-६-० घ. । ७-८-० घ. । ९-१०-० घ. । ११-१२ ० घ. । १३ यो=को. घ. । १४ शब्देऽवगमे घ. । १५-१६-० घ. ।

विरजे देव्यक्षरे ब्रह्मसंमिते । गायत्रीं छन्दसां मातरिदं ब्रह्म जुषस्व मे ' इत्यावाहयति ॥ २ ॥ ओजोऽसीति जपित्वा कस्ते

---

शुचिदेशस्य निषद्येत्यनुवादः । उपस्पर्शनाङ्गत्वेन प्राप्तेः । आसननिर्वन्धनात्यागी प्रक्षाल्येत्याद्युपस्पर्शनविलक्षणार्थं तथा शुचौ देश इत्यपि । अथ वा निषद्य—उपविश्य सन्ध्यामुपासीत इति प्रधानेन संबन्धः । प्रधानार्थत्वात्संबन्धस्येतिकर्तव्यताकलापस्य तथा च प्रातस्तिष्ठन् । एवं प्रातस्तिष्ठन्नित्याह । 'अपामञ्जलिं पूरयित्वा' अद्भिरिति सामर्थ्यात्संबन्धः । अपामिति तृतीयार्थे विपरिणता षष्ठी । 'प्रदक्षिणमावृत्य' प्राङ्मुखेनोदङ्मुखेनवावर्तनं कृत्वा तत्राधोत्सवितारं प्रत्यावर्तयेत्प्राप्तेः । प्रदक्षिणमिति नियम्यते । ततः सवितुरुत्थानगतिकालमिति । इतरथा प्रदक्षिणमावृत्यापि पुनः प्राङ्मुखो भवेत् । तत्रादृष्टार्थमावर्तनं न च तदुक्तं दृष्टे संभवति । सन्ध्यापि सवितृसकाशे लभ्यते । सन्ध्या वर्तते न वेति संशयापनुत्तये उदयास्तमये दिशमीक्षते यतः । 'आयाही'त्यनेन भगवत्या गायत्र्या आवाहनं लिङ्गात् सवितृमण्डले तु स्थितायाः । तत्र हि तस्याः स्थानमित्याचक्षते ब्रह्मवादिनः । अथ कथं राजन्यवैश्ययोरावाहनं त्रिष्टुप्छन्दसां जगतीच्छन्दसामित्यूहः । अनूहो वा वाग्वैगाय । अथैव वाक् सर्वाणि च्छन्दांसीति कृत्वा ॥ २ ॥

'ओजोऽसीति जपित्वा कस्ते युनक्तीति योजयित्वा ॐ भूर्भुवः स्वस्तत्सवितुर्वरेण्यमित्यष्टौ कृत्वः प्रयुङ्क्ते' ओजोऽसीति जपित्वा गायत्रीं स्तुत्वेत्यर्थोऽवगम्यते । गायत्रीप्रकरणान्न्याय्यत्वात् । विवक्षितार्थत्वे मन्त्राणां विनियोगानुपपत्तेः (?) । 'कस्ते' उक्तं च—ॐकारपूर्वं कस्ते युनक्तीति योजयित्वा गायत्रीमावाहनान्तकृत्वा । ॐ भूर्भुवः स्वस्तत्सवितुरिति प्रणवप्रभृतीनि इतिकारेण स्वरूपतां द्योतयति तेन प्रणवप्रभृतीनामावृत्तिरिष्टा । उक्तं च 'एतदक्षरमेतां च जपन् व्याहृतिपूर्विकाम् । सन्ध्ययो'रिति । 'छन्दोगानां कामा' इति शब्दः प्रकारार्थः । एवं प्रकारा ये छन्दोगाः कामा इत्यर्थः । ह ॰ गायत्रीकल्पे । अष्ट(ष्टौ) कृत्वः प्रयुङ्क्ते गायत्रीं सविता ब्रह्मवर्चसकामस्येत्यादयः । उपनीतस्याधिकारः ।

युञ्जत इति जगतिं॰ वैश्यस्य ॥ ३ ॥ उदुत्यं जातवेदसमिति द्वे निगद्य कस्ते विमुञ्चतीति विमुच्योदकाञ्जलिमुत्सृजति ॥ ४ ॥ एवं प्रातस्तिष्ठन् ॥ ५ ॥

---

वैश्यर्थो द्रष्टव्यस्तेनायमर्थः सूचितो यदि राजन्यवैश्ययोर्ब्राह्मण एवोपनयनादि करोति नान्यस्तदुक्तम्—

'प्रब्रूयाद्ब्राह्मणस्त्वेषां नेतराविति निश्चयः' इति

तस्मादागमपाठो य एव तत्र प्रयत्नः कर्तव्यो न तु स्वबुद्ध्या पाठान्तरकल्पना। सावित्री ब्राह्मणादिवर्णानां गायत्री त्रिष्टुब्जगती च क्रमेण 'गायत्रो वै ब्राह्मणस्त्रैष्टुभो राजन्यो जागतो वैश्य' इति जपेदित्युपासीनाधिकारान्मन्त्रप्रकाश्यदेवतोपासितव्या। देवतालम्बनध्यानानुष्ठानाभ्यासो नैव मन्त्रावृत्तिं विना। अतो देवतालम्बनमेतदर्थं जपावृत्तिरर्थोऽभिमता। ततश्चोच्चारणद्वारा मन्त्रावृत्तिर्न साक्षान्मन्त्रस्य द्रव्यत्वात्। उच्चारणं जपक्रिया। एवं च प्राप्तेऽभ्यासे गुणविधिरष्टौ कृत्व इति। सावित्री होमे च प्रणवव्याहृतिपूर्विका प्रयोक्तव्या इह दर्शनात् इति करणावच्छिन्ननिर्देशाभ्येतव्याहोमेऽपि सावित्रीत्रिष्टुब्जगत्यः ॥ ३ ॥

'उदुत्यं जातवेदसमिति द्वे निगद्य कस्ते विमुञ्चतीति विमुच्योदकाञ्जलिमुत्सृजतीति'। निगदनमुच्चैरुपांशोः सकाशात्। ततश्चोपांशु गायत्री प्रयोक्तव्येत्यर्थादुक्तं भवति। कस्ते विमुञ्चतीति विमुच्य गायत्रीं तस्या एव योजितत्वात् त्रिष्टुब्जगत्योर्वा उदकाञ्जलिमुत्सृजति। उदकपूर्णो(र्णो)ऽञ्जलिरुदकाञ्जलिः। पूर्वपदप्राधान्यम्। उत्सृजति सत्वाद् पूर्णस्य [illegible] त्सर्गः। उत्सर्जनं पूर्वपदार्थः (स्य) स्यादित्यर्थः। एवं चोदकपूर्णाञ्जलिना जप(पि)तव्यम् ॥ ४ ॥

'एवं प्रातस्तिष्ठन्' सन्ध्यामुपासीतेति वाक्यशेषः। प्रातरेव तिष्ठन् गायत्रीति नियमार्थमिदम् [illegible] [illegible] [illegible]

स्थानमेव प्रकृतिग्रहणमिति दर्शनात्। [illegible]

---

एतेन धर्मेण द्वादशचतुर्विꣳशतिꣳषट्त्रिꣳशतमष्टाचत्वारिꣳशतं वा वर्षाणि यो ब्राह्मणो राजन्यो वैश्यो वा ब्रह्मचर्यं चरति मुण्डः शिखाजटः सर्वजटो वा मलज्जुरवलः कृशः स्नात्वा स सर्वं

इति मन्यते । अत्र चोक्तं निषद्योपविश्येति निपूर्वः सदिरुपवेशनमाह याग्निहोत्रादिस्मृत्या निषीदेदित्युपविशेदित्यर्थः एवमिति पूर्वोक्तविधिं निर्दिशति किं तु वालव्रतानां निष्क्रमणं सामर्थ्यात् । अग्निकार्यं च सन्ध्योपासनवत् । तत्र सायमेवाग्निकार्यं 'सायमेवाग्निं समर्चयेत इति' गृह्यान्तरम् ॥ ५ ॥

विन्दते यत्किंचिन्मनसेच्छतीति ॥ ६ ॥ एतेन धर्मेण साध्वधीते ॥ ७ ॥ छन्दस्यर्थान्बुध्वा स्नास्यन् गां कारयेत् ॥ ८ ॥

---

अधिकारः। न पुनः खेचरत्वादि मनसेच्छया लभते। न संहोद्रष्टा(महाद्रष्टा)दि वा। यथा संयत इति वक्तव्येयन्मनसेच्छतीति वाचो युक्त्या योगशास्त्रोक्तं चरितव्रतस्यैवेति दर्शयति। द्वादश वर्षादि क्रमं प्रतिवेदं केचित् मन्यन्ते। ब्रह्मचर्यं च ब्रह्मार्थं व्रतानि ब्रह्मेति व्रतानां मन्दसंस्कारत्वं पक्षे वर्णितम्। न पुनरास्ताम् (?) ॥ ६ ॥

'एतेन धर्मेण साध्वधीते' ननु च पुनर्वचनमनर्थकं पूर्वसूत्रेणैवाध्ययनमात्रतोक्तं स सर्वं विन्दत इति॥ साधुत्वेऽध्ययनस्य तदर्थानुष्ठानात्स्वर्गापवर्गप्राप्तिर्नियमार्थीतं नान्तरमिति वचनादेवं तर्हि यावदधीते तावदेतेन धर्मेणेति पक्षान्तरार्थमिदमुक्तम् (मनुना अ० ३-१)। "ग्रहणान्तिकमेव वा" इति च स्मृतेः ॥ ७ ॥

'छन्दस्यर्थान्बुध्वा स्नास्यन् गां कारयेत्' 'आम्नायस्त्रिवृच्छन्द' इति प्रातिशाख्यसंज्ञासूत्रम्। आम्नाये वेदस्य गुणश्छन्द उच्यते तस्मिन्नर्था स्तांस्तथावक्ष्यमाणधर्मेण स्नास्यन् गां प्रवरां गां कारयेत्। मधुपर्कार्द्धा भूतां गां कुरुतेति प्रेष्यन् कारयतीत्युच्यते। नन्वाचार्यमर्हयेदिति सिद्धे किं कारयेदिति ग्रहणेन उत्सर्गनिवृत्त्यर्थं चेन्नादृष्टार्थकल्पनाप्रसङ्गात्तन्माभूत्–अन्येन वादिनाऽर्हणमिति मधुपर्कलक्षणार्थं गामित्युक्तम्। अर्थानिति बहुवचनमर्थविध्यर्थवादकल्पनाप्रसङ्गात्तन्माभूत्। अन्ये वक्ष्यमाणेच्छानामधेयभेदात्। व्याकरणमीमांसादीनां सामर्थ्यादगृहीतं परिज्ञानम्। तद्विना वेदार्थावबोधो न शक्यस्तदुक्तम्

"अनधीत्य शब्दशास्त्रं शिष्यत्वे यापि योग्यता
निषिद्धा सापि यास्केन वक्तृत्वे तस्य का कथा" इति.

---

१-४ ० घ. । २ सहाद्रष्टा, ग. । ३ दिकम्, क. ख. । ५-६ ० घ । ७ मधुपर्के सिद्धे, ग. । ८ सामर्थ्यगृहीतम्, क. ख. घ. । ९-१० ० घ. ।

**आचार्यमर्हयेच्छ्रोत्रियः ॥ ९ ॥ अन्यो वेदपाठी न तस्य स्नानम् ॥ १० ॥**

---

न चामीमांसको विध्यादेः स्वरूपं जानाति । उक्तं च कल्पकारेण "न्याय्यं कर्मोपांशु तथा ऊह्यमूहेतेति[1]। ततो यथार्थं कर्मसन्निपात इत्यादि। न्यायादनपेतं न्याय्यम् । ऊहार्थमूह्यम् । यथार्थं यथाप्रयोजनम् । न चैवमादि अमीमांसकोऽवैयाकरणश्च शक्नोति ज्ञातुम्[3] ॥ ८ ॥

'आचार्यमर्हयेदिति' यः श्रोत्रियः । श्रोत्रियश्छन्दोधीते ( पाणिनिः ५-२-८४ ) इति निपातनात् । छन्दोऽध्यायी श्रोत्रियो नमृद्वारिशुचिः श्रोत्रियग्रहणमनधीतवेदस्यार्थावबोधनाधिकारनिरासार्थम् । स्वाध्यायाध्ययनविधेरर्थावबोधपर्यवसायित्वादर्थावबोधस्य चाऽध्ययनानन्तर्याच्चेति[5] ॥ ९ ॥

'अन्यो वेदपाठी न तस्य स्नानम्' द्विविधो ब्रह्मचारी उपकुर्वाणको नैष्ठिकश्च तत्रोपकुर्वाणस्य स्नानम् । अन्यस्य ब्रह्मचर्येणैव निष्ठेति । अन्य उपकुर्वाणाद्वेदपाठी ब्रह्मचारीत्यर्थावबोधादनन्तरं न तस्य स्नानम् । एतच्च[6] परिपक्वकषायस्य यस्मात्स्नातकस्याग्निहोत्रादिष्वधिकारः कृतस्नानस्य । आधाने तु कृतविवाहस्य। उद्वाहे च रागतः प्रवृत्तिरिति। विरक्तस्तु नैव विवाहेऽधिक्रियते रागप्रवृत्तिविधेरौदासीन्यादिति कृत्वा न तस्य स्नानमित्युक्तम् । अपिवेपत्त्यक्तकषायोऽप्यग्निहोत्रादिभिः श्रेय इच्छन् भार्यावेदनाद्यारभते तत्रावान्तरमपत्योत्पादनकुटुम्बभरणनियतधनार्जनोपायादिष्वधिक्रियते । तत्रा-(त्म)वृत्तौ कुटुम्बभरणकृतोद्यम इतश्चेतश्च धावन्नग्निहोत्रादिदं स्वार्थमपि सेवित्वा[7] तु कुटुम्बभरणत्वमेव स्यात् ततो धर्मादेः पुरुषार्थाभावाद् वृथाऽध्ययनविज्ञानप्रयासः स्यादिति यो मन्यते[8] न तस्यापि स्नानमिति ॥ १० ॥

---

१-३-० घ. । २ ऊहते, क. ख. । ४-५-० घ. । ६-९-० घ । ७ सेविता, क. ख. । ८ मन्येत, क. ख. ।

आपो हिष्ठेति तिसृभिर्हिरण्यवर्णाः शुचय इति द्वाभ्यां स्नात्वाऽहते वाससी परिधत्ते ॥११॥ वस्वसि वसुमन्तं मा कुरु सौवर्चसाय मा तेजसे ब्रह्मवर्चसाय परिदधामीति परिदधाति ॥१२॥ यथा द्यौश्च पृथिवी च न विभीतो न रिष्यतः। एवं मे प्राण मा विभ एवं मे प्राण मा रिष इत्याङ्क्ते ॥१३॥ हिरण्यमाबध्नीते ॥१४॥

आपोहिष्ठेति तिस्रो हिरण्यवर्णाः शुचय इति द्वे स्नानार्थं चोपादानाद् ऋग्भिरित्याह्रियते। पञ्चभि ऋग्भिरेकं स्नानमिति प्रथमतृतीयान्तत्वे स्नानावृत्ति राशङ्क्यते। द्विश्चोदनाभेदान्महासंख्यामुपाक्रियमाणावयवादित्वावृत्त्या केचिच्चार (?) मिच्छन्ति। अन्यस्त्वाह स्नानस्य प्राधान्यान्मन्त्रस्य तदर्थकत्वादेकमेव स्नानं युक्तम्। द्विश्चोदना त्रिर्न पाठकास्नानादत एव मन्त्रप्रतीकार्थं प्रथमैव कृता इति शब्दश्च न तु तृतीयासामर्थ्यात्तृतीयार्थो द्रष्टव्यः। 'स्नात्वाऽहते वाससी परिधत्ते' स्नात्वोदककलशेन शुचौ देशेऽनुलिप्ते गुरुमतेन यवौषध्यादिव ( ? ) ति ततोऽहते वाससी परिधत्ते नवे अन्यत्राऽनुपयुक्ते ॥ ११ ॥

'वस्वसि वसुमन्तं मा कुरु सौवर्चसाय मा तेजसे ब्रह्मवर्चसाय परिदधामीनि परिदधाति' केचिदेतं मन्त्रं परिदानार्थं मन्यन्ते। आचार्यस्य परिददामीति पठन्ति। अन्ये तु वस्त्रपरिधानार्थं स्नातकस्य परिदधामीति परिदधातीति पठन्ति एतदेव युक्तं वसुमन्तं मा कुर्वित्याशीःपदमात्मानं ब्रूते मन्त्रे ॥ १२ ॥

यथा द्यौश्चेत्यादि आङ्क्ते इत्यन्तमञ्जने मन्त्रः प्रत्यहमञ्जनं स्नातकस्य मन्त्रेण संधि प्रति मनुष्यान् आञ्जते। शलल्या अपरमिति श्रुतेः। अन्यस्तु दक्षिणं पूर्वं दक्षिण मक्षि पुराञ्जते तथापरमिति विवाहे वचनात् ॥ १३ ॥

'हिरण्य माबध्नीते' शुभकुण्डले स्मृत्यन्तरात्। अन्यदपि कटकादि यथासंभवमविशेषात् ॥ १४ ॥

---

१ चोपपादनात्. क. ख. । २ न. ग घ. । ३ ङ, ग. । ४–६–० घ. ५ भेदान्महा=भेदमाह. । ७–९–० घ. । ८ त, ख. । १० मयुक्तं, क. ख.

छत्रं धारयते स्रजं मालां गन्धान् ॥ १५ ॥ प्रतिष्ठे स्थो दैवते द्यावापृथिवी मा मा संताप्तमित्युपानहौ ॥ १६ ॥ त्रि-वस्त्रोऽत ऊर्ध्वं भवति तस्माच्छोभनं वासो भर्तव्यमिति श्रुतिः ॥१७॥ आमन्त्र्य गुरून् गुरुवन्धूंश्च स्वान् गृहान्व्रजेत् ॥१८॥

'छत्रं धारयते। गन्धं मालां स्रजम्' स्रजं स्वर्णं गन्धमाल्यं स्वहस्तार्थतयाऽपि जगतःसिद्धं विधानात् [illegible] पालाशादिनिर्देशार्थं वैयर्थ्योपलक्षणार्थं पुनर्वचनम्। [illegible] ॥ १५ ॥

प्रतिष्ठे इति उपानहौ धारयतीति प्रकृतेन सम्बन्धः। मन्त्रलिङ्गाद् उपानहोः। एतज्ज्ञानयोगाद्धे धारणे न प्रतिधारणे सम्भवति न च धारयेत् स्मृत्यन्तरे निषेधात् ॥ १६ ॥

अयं क्रमोऽत्र जटावपनं मुख्येनमन्त्रस्नानान प्रभृतयो मन्त्रानुक्रमा परिधानशब्दपक्षे। आचमनं परिवास धानाद्वृतम् ( वासः परिधानाद्वम् ) गन्धानुलेपनादिति 'तस्माच्छोभनं वासो भर्तव्यमिति श्रुतिः' स्नानमुत्तरतरं शोभनं श्रेष्ठं विमलादिनाहतं वृत्या धारयेत्पापयेत्र तथा प्रयत्नं कुर्या यथा शोभनं भवति। एतच्च सति विभवे स्मृत्यन्तरवचनात्। संभवश्च द्रव्यशरीरकृतो विज्ञेयः। श्रुतिग्रहणमाप्तत्वख्यापनार्थम्। श्रुतिशब्दश्च क्वचित्प्रथमान्तः श्रूयते क्वचित्षष्ठ्यन्तः। यत्र प्रथमान्तस्तत्रावयवापेक्षया। यत्र षष्ठ्यन्तस्तत्रावयव्यपेक्षया ॥ १७ ॥

'आमन्त्र्य गुरून् गुरुवन्धूंश्च स्वान गृहान्' पाक्षिकोऽयं पिता हि मुख्येऽभिहितस्तस्यैव पुत्रानुशासनेऽधिकारात् तदभावेऽन्यो गुरुस्तन्मते वा गुरूनिति बहुवचनम् पाक्षिकं बहूनां ये नेति ( १–१–३ ) संभवान्न पूर्वार्थः। केचिदेकवचनान्तं पठन्ति। गुर्ववरांश्च गुरुवत्पादमामन्त्र्य विज्ञाप्य स्वान्गृहान् व्रजेत्। गुरुणाऽनुज्ञातस्तदधीनैः स्वगृहागमनं वेदार्थानुष्ठानार्थं तदर्थत्वाद्बुध्याः स्नातस्य स्वान्गृहानिति पितृगृहान् भावाभावात् (?) ॥१८॥

---

१ धू, क. घ. । धूं, ख. ग. । २ रच, क, ख. । ३ यर्थे, ख. । ४ धारणना. ग. घ. । ५ लेपनमाल्यादि, ग. । ६ मतेवा=मत्वा, क. । ७ क्वचित्, क. । ८ भवाभावात, ग. ।

प्रतिषिद्धमपरया द्वारा निष्क्रमणं मलवद्वाससा सह सं- वस्त्रणं रजः सुवासिन्या सह शय्या गुरोर्दुरुक्तवचनमस्थाने शयनं स्मयनं [1]सरणं [2]स्थानं यानं गानं तस्य चेक्षणम् ॥ १९ ॥ पौर्णमास्याममावास्यायां वाग्नेयेन पशुना यजेत ॥ २० ॥

इदानीं स्नातकनियमानाह—' प्रतिषिद्धमपरया द्वारा निष्क्रमणम् ' भित्तिकाद्वारेण निःसरणान्तर्वाटोपवाटेन निष्क्रमणनिषेधः । ' मलवद्वाससा सह संवस्त्रणम् ' मलिनवाससा जन्तुना सह निर्मलमपि न संवस्त्रं ( स्त्रणं ) न संवस्त्रयेत् । संवस्त्रणमाच्छादनम् । ' रजः सुवासिन्या सह शय्या ' न शोणितदिग्धवस्त्रिण्या सह शयनम् । अरजः स्ववर्णमय्यापि । इतरया संभाषणस्यापि निषेधात् । 'गुरोर्दुरुक्तवचनम् ' गुरुरत्र मात्रादिविद्यागुरुश्च विशेषाद् गुरूक्तवचनमवा[3]च्यभाषणम् । ' अस्थाने शयनम् ' । स्मयनं निष्प्रयोजनं हसनं गर्वो वा स्मयनम् । सरणमकारणं वृथाऽटनम् । स्मरणमिति केचित्पठन्ति तदा अस्थाने वेदार्थस्मरणम् । स्थानं निष्प्रयोजनं स्थितिमिच्छा ( स्थितीच्छा ) जिज्ञासाकुलैर्वा परं रथ्यारोहणमनवसरे । अथवा म्लेच्छादिस्थानगमनम् ॥ गानमध्ययनविज्ञानाभ्यासस्य प्रतिकूलत्वात् । शुष्कवादो वा गानम् । कै [4]गै शब्द इति साहचर्यान्नृत्याद्युपलक्षणं गानम् । [5]तेन " नेहेतार्थान्प्रसङ्गेन " इत्यादि स्नातकव्रत कलापो गृहीतस्तथा चानुवदिष्यति ' यद्यचरणीयान्वाचरेद् ' ( १-३-४ ) इत्यादावशनादीनि च स्नातकाङ्गतयोक्तानि[6] । तस्य चेक्षणं परेणापि क्रियमाणे गमनादाववेक्षणादि प्रतिषिद्धम् । चकारोऽनुक्तसमुच्चयार्थस्तेन[7] नेहेतार्थानित्यादि परिग्रहः[8] । १९॥

' पौर्णमास्याममावास्यायां वाऽऽग्नेयेन पशुना यजेत ' स्नानसमनन्तरं पशुयागोऽयं क्रमात् । ब्रह्मचर्यादौ पाकयज्ञपशूक्तेन विधानात् ( २-५-६ ) ॥ २० ॥

१ स्मरणं, क. ख. । २ स्थानं पानं. क. ख. । ३ वाच्य, क. ख. । ४ कै गै रै. ग. । ५-६-० घ. । ७-८ ० घ.

तस्य हविर्भक्षयित्वा यथासुखमत ऊर्ध्वं मधुमांसे प्राश्नीयात्क्षारलवणे च ॥ २१ ॥ इति द्वितीयः खण्डः ॥

' तस्य हविः क्षारलवणे चेत्यन्तं ' सूत्रम् । किमयं भक्षणविधिः क्षत्रियविडर्थं ब्राह्मणं एव हविःशेषमित्यप्राप्तेरुत यजमानभागानुवादः ? । क्षत्रियविडर्थं युक्तं तस्य हवि-र्भक्षयित्वा यथासुखमत ऊर्ध्वं मधुमांस-भक्षणेऽधिकारात् अनुवादपक्षेऽपि क्षत्रियवैश्ययोरस्ति मध्वादि लक्षणेऽधि-कारानुवादत्वे तस्य हविर्भक्षयित्वा तेनेष्ट्वा मध्वादि प्राश्नीयादित्यर्थः । अनि-ष्ट्वानेन पशुना मांसादि भक्षणेऽनधिकारात् । भक्षयेत् प्रायश्चित्ती स्यात् । श्राद्धादिनियुक्तोऽपि मध्वादेः प्रसवं प्रति यथासुखं [२] स्यादित्येवरूपमपि प्रतिप्रसुवस्वदानेन त्वथ भूतवदनादिति [३] (?) ॥ २१ ॥

॥ [४] इति पूरण [५] व्याख्याने द्वितीयः खण्डः [६] ॥

# तृतीयः खण्डः ।

यमेवꣳ विद्वाꣳस मभ्युदियाद्वाभ्यस्त मियाद्वा प्रतिबुध्य जपेत्

पुनर्मा मैत्विन्द्रियं पुनरायुः पुनर्भगः

पुनर्द्रविणं मैतु मां पुनर्ब्राह्मणं मैतु माम्

अथोयथेमे धिष्णायासो अग्नयो यथास्थानं

कल्पयन्ता मिहै-वेत्यभ्युदितः ॥ १ ॥

पुनर्मात्मा पुनरायुरैतु पुनः प्राणः पुनराकूतिरैतु

वैश्वानरो वावृधानो वेरणान्तस्तिष्ठतो मे मनो अमृतस्य केतुः

इत्यभ्यस्त मितः ॥ २ ॥ उभावेव वाभ्युदितो जपेदुभावेव

वाभ्यस्तमितः ॥ ३ ॥

---

स्नातकव्रतातिक्रमे प्रायश्चित्तप्रकरणमधुनेष्यते यमेवं विद्वांस मित्यादि ब्रह्मचारिणोऽप्येतत्प्रायश्चित्तान्तरानाम्नानात् यमेव विद्वांसं प्रतिबुध्य जपेद् यमेवं विद्वांसमित्यनुवादः प्रकृतत्वाच्छन्दोऽधीते सुप्तेति स्वपन्नेवार्थ वा एवं शब्दात् । एतेन धर्मेण नाध्यधीत इति नाऽनुग्रहणञ्च । तस्मात्त्रिविधः स्नातकः साधुरसाधुर्मध्यमश्च । अव्रताध्यायी असाधुः । द्वादशवर्षाध्यायी द्वादशवर्षादिव्रतचारी साधुः । समस्तव्रतविद्यो मध्यमः । तत्र मध्यमसाधुपरिसंख्यानार्थं यमेवं विद्वांसमिति तयोः स्मार्त्तश्रौतप्रायश्चित्तं द्रष्टव्यम् । यद्यपि [illegible]–प्रायश्चित्तमेतद्विद्वांसोऽ [illegible] [illegible] प्रतिबुध्य जपेद् [illegible] अभ्युदियादस्तं इति स्मृत्यन्तरात् । [illegible] प्रतिबुध्य पठात् । यत्रा [illegible]

यद्यचरणीयान्वाचरेदनाक्रोश्यान्वाक्रोशेदभोज्यस्यवान्नं म-
श्नीयादक्षि वास्पन्देत्कर्णौ वाक्रोशेदग्निं वा चितिमारोहेत्स्मशा-

क्रान्तसंध्योपायं सूर्योऽस्तमयोदयाख्यौ व्याप्नुयात् । स विद्वान्प्रतिबुध्य । एतद्व्यतिक्रमात्ततः स्वरादिं[3] श्रुतिं जपेत् । किं तदाह पुनर्मामैत्विन्द्रियादि । उभा-वेवावधारणे पूर्वकल्पनार्थप्रसङ्गात् । विकल्पस्य तु सूत्रद्वयात्तद्भावे सिद्धे एवकारो वाक्यपूरणार्थः ॥ १ ॥ २ ॥ ३ ॥

'यद्यचरणीयान्वाचरेत्' अपरद्वारानिष्क्रमणादीन्यकर्तव्यान्या-चरति चोद्यत्सूर्यदर्शनादीनि । 'अनाक्रोश्यान्वाक्रोशेत्' आक्रोश्यान-र्हान्यद्याक्रोशेत् । आक्रोशनं तर्जनं परुषवचनानि परिवादनिन्दादि तत्तुल्यादि त्वात् अनाक्रोश्यानिति व्यवच्छेदो भार्यापुत्राद्यर्थः । आक्रोश्यप्रकृत्या-क्रोशनार्थो वा तस्माच्छिद्रार्थमाक्रोशः प्रायश्चित्तं प्रत्याक्रोश्येव क्रोशनके (?) । 'अभोज्यस्य वान्नमश्नीयात्' अनान्तस्याऽभोज्यस्य अभोज्या-न्नस्य वार्धुषिकादेः स्मृतौ-"सप्तरात्रं यवान्पिबेत्" (मनु० ११-१५३) इत्यादि तस्य गुरुत्वादस्मिन्विषये लब्धे तदुक्तमिति चेत् । यमेवं विद्वांसमित्यधिकारविशेषः । उक्तं च—

"तथा ज्ञानाग्निना पापं कृत्स्नं दहति वेदवित्"

इति वेदविदपि विप्रोस्येत्यर्थवादाद्विदुष एतत् रहस्याधिकारो वाऽयम् । 'अक्षि वा स्पन्देत्' स्फुरेदित्यर्थः अक्षिकर्णस्पन्दनशब्दोत्र (व ? च ?) कर्मणि पच्मणि तत्र विनापि समीपेक्षा अनिष्टसूचकत्वात्तदुपशमार्थं प्रायश्चित्तम् । तत्र एव वा समीक्ष्येच्छन्ति' 'कर्णौ वा क्रोशेत्' शब्दायेतेत्यर्थः । अक्षिकर्णयोः स्पन्दनं क्रोशनक्रियायां कर्तृत्वमौपचारिकम् 'रेतसो[12]वा स्कन्देत्' रेतसः षष्ठी निर्देशान्निद्रायां स्कन्दने प्रायश्चित्तम् । केचित्प्रथमान्तं पठन्ति । तत्राप्यविशेषान्नैमित्तिकम् । 'शूर्पं वोपस्पृशेत्' ऊर्ध्वं चरुहोमादित्युक्तम् । 'श्मशानं वा गच्छेत्' मृतमनुगच्छेदित्यर्थः । यदि वा शवदाहकाले[14] 'अग्निं वा चित्यमारोहेत्' परिगीत-

१ र्णौ, ख. । २ त्य, क. घ. । ३ दिना, ग. घ. च. । ४-५-० घ. । ६-७-० घ. । ८-९-क. । १०-११ ० घ. । १३ स्व, क. ग. च. । १२-१४ ० घ. ।

न॰ँ वा गच्छेद्यूप॰ँ वोपस्पृशेद्रेतसो वा स्कन्देदेताभ्यामेव मन्त्राभ्यामाहुतीर्जुहुयादपि वाज्यलिप्ते समिधा वादध्यादपि वा मन्त्रावेव जपेत् ॥ ४ ॥ एवमधर्ममाचर्यास्थूलम् ॥ ५ ॥ स्थूले वेषणया विहरेदवस्त्रो लोमत्वगाच्छादोऽग्निमारोहेत्संग्रामे वा

---

मिति केचित् तदयुक्तं क्रत्वर्थोऽसौ तिष्ठेत्ततस्तदतिक्रमेऽनाम्नातप्रायश्चित्तं क्रत्वर्थम् । इदं पुरुषार्थ (र्थे) निषेधस्य पुरुषार्थत्वात् । एवं यूपस्पर्शेऽपि । इतरथा प्रायश्चित्तद्वयं क्रत्वर्थे पुरुषार्थे च स्यात् । नाग्निभ्यो व्यावर्त्तेतेत्यादौ निषेधातिक्रमे क्रत्वर्थमेव प्रायश्चित्तम् । न पुनरिदं प्रतिपुरुषार्थम् अस्य हि यद्यचरणीयान् आचरेदित्यनेन सिद्धे यं यूपं वोपस्पृशेत् एवं सत्य नर्थकं स्यात्तस्मात्सामान्येनायं निषेधः । प्रतिवाक्यं वा शब्दाद्विकल्पार्थात्तेन समुच्चितानां स्मृत्यन्तरविहितं प्रायश्चित्तं ज्ञेयम् । 'एताभ्याम् जुहुयात्' एवकारो वाक्यपरिपूरणार्थः । आहुत्यन्तराभावात् तदभावो जपति शब्दार्त् । आहुतीत्यनुवादो मन्त्रद्वयेनाहुतिद्वयस्य सिद्धत्वात् । तथासौरो (?) जुहोतीति । अन्यस्तु एवकारो मन्त्रान्तरनिवृत्तिद्वारेण प्रकृतमन्त्रप्रशंसार्थः । अपि वाज्यलिप्ते समिधा वादध्यात् । आज्यग्रहणं संस्कारार्थं घृतलक्षणार्थं वा अपि वा मन्त्रावेव जपेत् । एवकारो जपस्तुत्यर्थो नत्ववधारणार्थः पूर्वमन्त्रद्वयानर्थक्यप्रसङ्गात् ॥ ४ ॥

'एवमधर्ममाचर्यास्थूलं' एवं प्रकारमधर्ममाचर्येति केचिदस्थूलग्रहणमनर्थकं प्रकरणवचनेनैव साधितत्वादस्थूलमुपपातकादि अधर्ममाचर्य एताभ्यामित्यादि कुर्यात् । एतच्चैनसि गुरुणि गुरूणीत्यनेन न्यायेन मासं पक्षे वा पापानुरूपेण षण्मासादिकालं वा ब्रह्मचर्यादिनियमस्तु यथोक्तमपि—भ्रूणहनं मासात्पुनन्त्यहरहः कृता इति ॥ ५ ॥

'स्थूले वेषणया विहरेत्' स्थूले महापातके स्वेन आचरते वेषणया तत्पापचिह्नं चरेत् तदुक्तम् "कृत्वा शवशिरोध्वज" मिति विहरेत्पृथिवीम्

---

१ चो, ग च. । २–४–० घ. । ३ वोय. ख. । ५–६–० घ. । ८ कुर्यात् . क. ख ।

# चतुर्थः खण्डः

—•—

## वर्षासु श्रवणेन स्वाध्यायानुपाकुरुते ॥ १ ॥

'वर्षासु श्रवणेन स्वाध्यायानुपाकुरुते' चतुष्पदं सूत्रं वर्षाग्रहणं भाद्रपदे श्रवणेन[1] यथा स्यादित्येवमर्थं कृतं तेन प्रथमातिक्रमे[2] कारणाभावाच्छ्रावण्यामेव युक्तमिति। तत्र किं[3] श्रावण्यां ग्रहणं स्यान्नवर्षास्विति। अन्यस्तु प्रथमे श्रवणेऽनध्यायनिमित्तं विद्युदादि भवति स्तनिताद्यादि न कृतं तदा द्वितीयेऽपि कुर्यादित्येवं ननु वर्षाग्रहणमुभयार्थं वा अनन्यापेक्षं वा तेन यदि प्रथमे श्रवणेऽनध्यायनिमित्तं विद्युदादि भवति तदा नैव कुर्यात्। श्रवणेनेति तृतीयाऽधिकरणे 'नक्षत्रे च लुपीति' (पाणिनिः २,३,४५)। [4]अनध्यायशब्दोऽध्यायन्यायोद्यावेत्यत्र (पा० ३,३,१२२) निपातितः[5]। स्वश्चासावध्यायश्च स्वाध्यायः शोभनो[6]वाध्यायः स्वाध्यायः। संज्ञाछन्दसोर्बहुलमिति दीर्घत्वं बहुलग्रहणात्[7]। उपाकरणं प्रारम्भः। तेन वर्षाकाले श्रवणे नक्षत्रे आत्मीयां शाखा[8]मध्यायार्थमुपाकुर्यादित्यर्थः। प्रकरणात्स्नातको[9]ऽध्यापयिष्यन्निति गम्यते। अन्तेवासिभिर्योगमिच्छन्निति लिङ्गाच्च। प्रथमाध्यापने[10] वैतदन्वारम्भणीयेष्टिवन् न जपेत्। अभ्यासार्थं वा प्रतिप्रसङ्गात्[11]। उपाकृते[12]ऽध्ययने[13] ब्रह्मयज्ञे चेति कोदोप इत्यपरे। अन्यस्तु ब्रह्मयज्ञेन युक्तं विशिष्टनक्षत्रकालश्रवणादत एव न कार्यम्। किंतु संवत्सरे संवत्सरे कर्त्तव्यम् ज्योतिष्टोमवत्। स्वाध्यायानिति पूजार्थं बहुवचनं वेदाभिप्रायं वा प्रपाठकाभिप्रायं वा। अथवा शिष्याः[14] कोशेति मन्त्रलिङ्गात्। स्मृत्यन्तरे चोपाकृत्याधीयीत छन्दांसीति कन्यैक्याच्च। एवं चेदन्ते[15]वासिशब्दः सहाध्यायिनो[16] लक्षयिष्यति। समानाध्यायः स्वाध्यायः स्वाध्यायैर्हितैः सहयोग इष्यते तस्मादन्तेवासिनः सहाध्यायिनोऽपि शक्यन्तेऽवगन्तुम्। दृष्टार्थत्व-

---

१ श्रावणे या. ग. च.। २ म. स. क.। ३ क्वचि. ग. च। ४–५ ० घ.। ६–७ ० घ। ८ ध्ययनार्थं. क. स.। ९ कन. क. न.। १० प्रथमा नैवैतन्द. ग. च.। ध्ययने वै। तदात्वारम्भणीयेष्टिवत्ता. घ.। ११ द्विप्रसङ्गा. ग. च.। १२ उपकुरू (?). ग. च.। १३ न्यार्थे. ग. च। १४–१५ ० घ। १६ न च पव. क. स.।

स जुहोति–

अप्वानामासि तस्यास्तेजोष्ट्रीं गमेयम् ।

अहमिद्धि पितुः परिमेधामृतस्य जग्रभ अहं सूर्य इवाजनि स्वाहा ।

अप्वोनामासि तस्य तेजोष्ट्रं गमेयम् ।

अहमिद्धि पितुः परिमेधामृतस्यजग्रभ. अहं सूर्य इवाजनि स्वाहा ।

सरस्वतीनामासि सरस्वन्नामासि । युक्तिर्नामासि योगो नामासि । मतिर्नामासि मनो नामासि ॥ तस्यास्तेजोष्ट्रीं गमेयम् । तस्य तेजोष्ट्रं गमेयमिति सर्वत्रानुषजति ॥ २ ॥ युजे स्वाहा प्रयुजे स्वाहोद्युजेस्वाहेत्येतैरन्तेवासिनां योगमिच्छन्निति ॥ ३ ॥ प्राक् स्विष्टकृतोथ जपति । ऋतं वदिष्यामि सत्यं वदि

---

मपि सहाध्याययोगेऽस्ति परस्परसहाध्यायित्वादि तद्योगत्वादि वा । मन्त्रलिङ्गात्तु कर्त्रैक्ये तन्मामवतु तद्वक्तारमवत्विति । मा मिति ब्रह्मचारिणं ब्रूते वक्तारमित्युपाध्याय(यं) प्रसिद्धेः ॥ १ ॥

स जुहोति । य उपाकुरुते स जुहोति नाध्वर्युः । तत्र कर्म प्रदर्श्यते यद्युपाध्याय उपाकर्म जुहोति संप्राप्तिं चाह । शालाग्निकरणात्प्राग् जन्माग्नौ निर्मथ्य वा जन्माग्न्यभावे स्यात् । अन्यस्तु जन्माग्नावेव तस्य नित्यत्वात्तदेव निर्मथ्य उच्यते अरणिभ्यां मन्थनविधानाज्जातकर्मादौ । अप्वानामासि तस्यास्तेजोष्ट्रीमिति । अप्वोनामासि तस्य तेजोष्ट्रमिति । इयं व्यवस्था । एभिर्मन्त्रैर्जुहोत्याज्यमनादेशात् स्विष्टकृदर्शनादाज्यभागादि तन्त्रं लभ्यतेयथालिङ्गमनुषङ्गः । यद्यस्य लिङ्गं ततस्यानुषजति सरस्वतीति स्त्रीलिङ्गात्तस्यास्त इति अनुषजति सरस्वानिति पुल्लिङ्गात्तस्य त इति एवमुत्तरत्र ॥२॥३॥

'प्राक् स्विष्टकृतोऽथ जपति' प्राक् स्विष्टकृतो जपतीत्येतावत्युक्तिसिद्धः प्राक् स्विष्टकृतो जपस्ततः किमथशब्देन तत्रैके एतेनान्तेवासिनां योग-

---

१ तत्राग्निं, क. ख. । २ अनावस्था, ग च. । ३ के सिद्धे, ग. च. ।

ष्यामि तन्मामवतु तद्वक्तारमवत्ववतु मा मवतु वक्तारम्। वाङ् मे मनसि प्रतिष्ठिता, मनो मे वाचि प्रतिष्ठितमाविरायुर्मयि धेहि वेदस्य वाणीः स्थ। ॐ भूर्भुवः स्वस्तत्सवितुरिति ॥४॥ दर्भपाणिस्त्रिः सावित्री मधीते। त्रींश्चादितोऽनुवाकान्। को वो युनक्तीति च।

मिच्छन् स्विष्टकृतः प्राक् स्विष्टकृत इति सूत्रच्छेदपरिज्ञानाद्वाथ शब्द इति मन्यन्ते ततोऽथ जपतीति। अथानन्तरमन्तेवासियोगकामहोमादित्यर्थः। ततः स्विष्टकृतादितन्त्रे समापिते। यद्वाऽथशब्दोयमनध्येतव्योऽनर्थकत्वात्। यद्वाऽथशब्दोऽङ्गव्युदासार्थस्तेन स्वाध्यायोत्सर्गे वक्ष्यति अथ जपति ऋतमवादिषमिति तत्प्राक् स्विष्टकृतो न भवति जप एव केवल इति स्थितिरयमेवार्थोऽन्यायान् ॥ ४ ॥

'दर्भपाणिस्त्रिः सावित्री मधीते' दर्भशब्द एकवचनान्तस्समस्यते दर्भः पाणौ यस्येति। पाणि—शब्द एकवचनान्त एवार्थलक्षणत्वाद्बहुव्रीहे रुपादानं दर्भपाणिरित्यधीत इत्यनेन संबध्यते न जपतीत्यनेन काकाक्षिगोलकवद्वोभयेनेति तत्पुनर्विचार्यं पच्छोऽर्द्धर्चशः सर्वमतेनेति केचित्। त्रींश्चादितोऽनुवाकान् वेदादाविषेत्वेत्यादीनधीत आचार्यो जपतीत्यर्थः। ब्रह्मचारी वाचार्याशक्तौ[1] यथाम्नायमभिव्याख्यातम्। को वो युनक्तीति चोपाकुर्महेऽध्यायान्। अध्यायापेक्षं मन्त्रे बहुवचनम्। तथा कुर्महेऽध्यायानिति स्थानानां व्याख्या। प्रथमस्थानमध्वरग्रहाः। उपतिष्ठन्तु छन्दांसीति च जपतीति सबन्धः स्विष्टकृतादिमार्जनान्तम्। स्वयंकर्तृकेऽपि ब्रह्मणे दक्षिणा दीयते। ब्रह्मन् होष्यामीत्यामन्त्रणादेव प्राक् स्विष्टकृत इति लिङ्गात्। अन्यस्तु दक्षिणान्ते नैव भवति। कुतो नित्यत्वे तोऽपि प्रकृतिवत्प्राप्तिः। एतेन स्थालीपाकाः स्थालीपाकेषु पूर्णपात्रविधानादध्वरादिवदुपाकर्मतो दृष्यते तदुक्तं नैमित्तिकत्वात्स्वाध्यायाध्ययनं शिष्याध्यायसंबन्धिनया निमित्त मुपाकर्महोमस्य। स्वाध्यायसंस्कारः पुरुषसंस्कारद्वारकः स्वाध्यायानिति संस्कारनिर्देशात्। अतश्चायमयुक्तः समाचारो नोत्सृजन्ति। उपाकर्मोत्सर्गेण भवितव्यम् अनुत्सृष्टस्य हि उपाकर्मप्रकारेन स्वाध्यायाध्याहवारम्भो नावमानम्।

१ ग्रन्थोद्य ष। २ न्ने, ग.। ३ ग. घ। ४ न्द. घ. इ.। ५—३ ० ८।
१ ज्ञत्न, ग. च.।

उपाकुर्वहेऽध्यायानुपतिष्ठन्तु छन्दांसीति च ॥५॥ तस्यानध्यायाः समूहन्वातो वल्मीकत्तारप्रभृति वर्षे न विद्योतमाने न स्तनयतीति श्रुतिराकालिकं देवतुमुलं विद्युद्धन्वोल्काऽत्यत्तराः शब्दाः। आचारेणान्ये ॥ ६ ॥ अर्द्धपञ्चमान्मासानधीत्योत्सृजति पञ्चार्द्ध-

---

शब्दतस्तु सदृशे कालवती अदृष्टार्थे एते कर्मणी। तदुक्तं मनुपाध्यायस्यै राजन्यादेश्च स्यात्। अस्तु चे त्किमत्रप्रमाणम् ॥ ५ ॥

'तस्यानध्यायाः' तस्याध्यापयितुरधीयानस्य वा एकस्यानध्याये सति इतरस्य सामर्थ्यात्स्यात्। यद्वा तस्य वेदस्यानाध्याया इति कुत एतत्। उपाकृत्योत्सृज्य वेति उपाकरणानन्तरं त्र्यहं पञ्चरात्रं वा नध्ययनं ततश्चतुरहे षडहे वा वेदारम्भणं ततः पञ्चाहे सप्ताहे वा काल (?) मनध्यापने वारम्भस्तत उत्तरेणाध्याया स्तेषां सामर्थ्यात्। वेदस्य न विद्यतेऽध्यायोऽध्ययनं येषु तेऽनध्यायाः कालास्तानाह समूहन्वातः। वायौ पांसुं समूहति पांसुसंयुक्तवायौ वहति सतीत्यर्थः। वल्मिकत्तारप्रभृति वर्षे पटलप्रान्तश्रावादारभ्यानध्यायो भवतीत्यर्थः। न विद्योतमाने। यावद्विद्योतते तावदनध्यायः। न स्तनयतीति श्रुतिः। यावत्स्तनयति तावदित्यर्थः। श्रुतिग्रहण मादरार्थम्। अकालिकं देवतुमुलं विद्युद्धन्वोल्काऽत्यत्तराः शब्दाः इतिहासप्रसिध्या देवादीनां युद्धं निर्गुणात्मकत्वाद्देवानां युद्धं तुमुलं भाव्येत ग्रहयुद्धं वा ज्योतिःशास्त्रप्रसिध्या देवतुमुलं स्यात्। आकालिकं द्वितीयेऽन्हि तात्कालिकं यावत्। विद्युद्धन्वो(द्धनो)ल्का महोल्केत्यर्थः। धन्वेति पाठे इन्द्रधनुर्दर्शने। उल्कामहोल्का सूक्ष्माया अवर्जनीयत्वात्। अत्यत्तराः शब्दा अतिक्रान्तात्तरा ये गोमायुरुतादयः। सामध्वनिरपि योऽक्षराण्यतिक्रम्य वर्तते। आचारेणान्ये। आचारो यदि समाचारस्तदा रथ्यादौ वृषलसन्निधानादौ चानध्यायो न स्यात् तस्मादाचारेणाचाराभिधायकेन मन्वादिना येऽनध्याया अभिहितास्ते ततोऽवगन्तव्या इत्यर्थः ॥६॥

**अर्द्धपञ्चमान् मासानधीत्योत्सृजति।** अर्द्धपञ्चमाः। अर्द्धं पञ्चमस्य येषां मासानां तेऽर्द्धपञ्चमाः। अधीत्य ब्रह्मचारी। इतरथाऽध्याप्येति ब्रूयात्।

---

१–४–० घ. । २ तदप्युक्तम्, क. ख. । ३ श्र. ग. । ५ शुं, ग. । ६ त्रिगु, ग. घ. । ७ लः, क. ग. च. ।

षष्ठान्वा ॥७॥ अथ जपति ऋत मवादिषं सत्य मवादिषं तन्मा-वीत् तद्वक्तारमावीदावीन्मामावीद्वक्तारम् । वाङ् मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितं माविरायु र्मयि धेहि । वेदस्य वाणीः स्थ । ॐ भूर्भुवः स्वस्तत्सवितुरिति ॥ ८ ॥ दर्भपाणिस्त्रिः सावित्रीमधीते । त्रींश्चादितोऽनुवाकान् को वो विमुञ्चतीति विमुच्योत्सृजामहेऽध्यायान्प्रतिश्वसन्तु छन्दासीति च ॥९॥ प्रतिपदं पक्षिणीं रात्रीं नाधीयीत नात ऊर्ध्वमभ्रेषु ॥१०॥

---

उत्सृजति कति दिवसान्नाधीयीतेत्यर्थः। न पुनः स्वाध्यायमुत्सृजेत्तदुत्तरत्रान-ध्ययनविवाधनार्त् । अन्यस्तूत्सर्गसंज्ञकं कर्म करोति ।तदुपरिष्टाद्वक्ष्यति तथाच स्मृत्यन्तरम्. ( या० अ० १.१४३ )

" पौषमासस्य रोहिण्यामष्टकायामथापि वा
जलान्ते छन्दसां कुर्यादुत्सर्गं विधिवद्बहिरिति "

ततोऽर्धाद् गृह उपाकर्म कर्तव्यम् । पञ्चार्द्धषष्ठमासान्[१] सार्द्धपञ्चमासा-नित्यर्थः । तथाऽर्द्धं षष्ठस्य मासस्य येषां तेऽर्द्धषष्ठाः । अधीत्योत्सृजतीति संबन्धः । मासेषु[२] तुल्यो विकल्पो नतु कृतार्थतयेति । [३]अध्ययनविधि ( धे ) राश्रयणाद्[४] विना कृतार्थतेति नास्ति प्रमाणम् ॥ ७ ॥

उत्सर्ग माह अथजपति । स इति कृते कर्मणि प्राक् स्विष्टकृत इति एतंमन्त्रं जपति । अहं पञ्चरात्रं वाऽनध्यायस्तदनन्तरं शिथिलं स्वाध्यायः प्रवर्तते वेदाङ्गानां सहाध्ययनात् ॥ ८ ॥ ९ ॥

उत्सर्गोत्तरकालेऽनध्यायानाह-प्रतिपदं पक्षिणीं रात्रीं नाधीयीत प्रतिपदं रात्रीमुभयतो वामरात्र पठेत् । अत्यन्तसंयोगे द्वितीया नात ऊर्ध्व-मभ्रेषु सत्सु नाधीयीत । एतच्च ज्योतिरावरणेष्वभ्रेषु द्रष्टव्यम् । स्मृत्यन्तरात् अत ऊर्ध्वग्रहणे समाप्तपाठादेवोत्सर्गादूर्ध्वं स्यात् । तस्मादतः पक्षिण्येवप्रति-पद्रात्र्यां ऊर्ध्वमित्येवमर्थं वक्तव्यम् । तेन न सर्वा काचित्प्रतिपद् गृह्यते । अद्वे-विद्धेऽनुपपत्तेः सर्वस्यास्तस्मादाद्यप्रतिपद् गृह्यते ॥ १० ॥

---

१ विधानात्. घ. । २ ज्ञा. ग. घ. । ३-४ ० ग. घ. च. । ५ संवत्सरे संवत्सरे. ग. च. । ६-८ ० घ. । ७ मन्त्रवर्णान्विता. ग च. । ९ ० क. । १० रात्रेः. क. । रात्राद् ग. । ११ दिम ?, ग. च. ।

**आकालिको विद्युत्स्तनयित्नुवर्षेषु ॥११॥ गोनामेषु मन्त्र-ब्राह्मणकल्पपितृमेधमहाव्रताऽष्टापदी॰ वैषुवतानि दिवाधीयीत वैषुवतमार्द्रपाणिः ॥१२॥ रुद्रान्न नक्तं न भुक्त्वा न ग्रामे ॥१३॥**

---

आकालिकाविद्युत्स्तनयित्नु[1] वर्षेषु[2] अत ऊर्ध्वमित्येव प्रागुत्सर्गात्तु एष्येते तात्कालिका उक्ताः । अयमाकालिकार्थ आरम्भस्तेन वलीकधारवर्षे स्यान्न कतिपयबिन्दुमात्रे ॥ ११ ॥

गोनामेषु-दिवाधीयीतेत्यन्तं सूत्रम् । नामेष्विति छान्दसः समासान्तः । तेषु यन्मन्त्रब्राह्मणकल्पं तद्दिवाधीयीतेत्यर्थः । मन्त्रो वसीयस्येहीति ब्राह्मणं प्रजापतिर्वा इत्यादि कल्पाश्चातुर्होत्रा गोनामिकमित्यादि[3] कल्पे पौरुषेयत्वादनित्ये नियमेन युक्त इति चेत्प्रवाहनित्यत्वाच्छिष्यादीनाम् । तथा च षडङ्गो वेद इति नित्येयमाख्या कल्पग्रहणं कुर्वन् दर्शयत्यङ्गानामपि वेदवदनध्याया भवन्ति इति[4] पितृमेधं मन्त्रब्राह्मणकल्पम् मन्त्रमत्रपितर इत्यादि । ब्राह्मण मिक्षुशलाकाद्यनुवाकत्रयम् । कल्पश्च प्राक् दक्षिणाचाराः पितृयज्ञ इत्यादि । पितृमेधश्चायं पट्कपाला[5] येन पितृयागः । महाव्रतम् आयाहीकं महाव्रतमुपदधात्यादिकल्पः । य वा अयवा इत्यस्मात्प्राक् महाव्रतं पचदिति च ब्राह्मणं शाखान्तरे महाव्रतकर्मनामधेयत्वात् मन्त्राणां नामधेयत्वाच्च अविशेषेणनिर्देशादेवं व्याख्यानम् । अष्टापदी ब्राह्मणमथ इषाष्टापदीति । कल्पोष्टापदी स्यादिति । वैषुवन्तं ब्राह्मणं शाकलं कल्पश्चैकविंशोऽग्निष्टोम इत्यादि । ऊर्ध्वं विषुवत इत्यस्मात्प्राक् महाव्रताष्टापदी वैषुवतानीति समासपाठः । वैषुवतमार्द्रपाणिः । अधीयीतेतिशेषः । विषुवानाम ऋतुस्तस्य मन्त्रब्राह्मणेषु वैषुवतमार्द्रपाणिरधीयीतेत्यर्थः । कल्पेऽपि स्वर उदात्तादिरस्ति ॥ १२ ॥

'रुद्रान्न नक्तं न भुक्त्वा न ग्रामे'-रुद्राणां मन्त्रोऽष्टावनुवाकस्थानम् । ब्राह्मणं रुद्रं वै देवा यज्ञादनन्तरं यन्नित्यादि । कल्पतंस्तस्यां श्रोणाविति गवीधुकाते[13]ः । यदि रुद्रैर्भान्तीति च ॥ १३ ॥

---

१ द्युत क. । २ वर्षके, ग. । ३ दि चातुर्होतृक गोनामिक मप्यनाहिताग्नि द्वादशरात्रं त्रिरात्रमेकरात्रं वा पाकयज्ञोपचारादग्निमुपचरति, इत्यधिकं घ. । ४-५ ० घ. । ६ लेन, क घ. । ७ धाती, क. ग. घ. ग. च. । ८ ० क घ. । ९-१० अधिकं घ. । ११ ० क. घ. । १२ ० क घ. । १३ ती, क. ग. घ. ।

शुक्रियस्य प्रवर्ग्यकल्पे नियमो व्याख्यातस्त्रयोविंशं तु संमील्य ॥ १४ ॥ गवां तु न सकाशे गोनामानि गर्भिणी-नामसकाशेऽष्टापदीं रेतो मूत्रमिति च ॥ १५ ॥ शुनाशीर्यस्य च सौर्ये चक्षुष्कामस्य चक्षुर्नो धेहि चक्षुष इति सूर्योऽपोऽ—

शुक्रियं च नक्तं न भुक्त्वा न ग्राम इति च शब्दः । गायत्रीमित्यादि पञ्चविंशतिरनुवाकमन्त्राः । कल्पो वातःप्रवर्गेत्यादि शाखान्तरे ब्राह्मणं प्रवर्ग्य-कल्पे नियमो व्याख्यातः स्वाध्यायमध्येष्यमाण इत्यत्र दिक्कालादिनियमो व्याख्यातः । नियमशब्दो व्रतेऽपि आरण्यं वर्तते । त्रयोविंशं तु संमील्य अधीयीतेति संबन्धः । त्रयोविंशं शुक्रियानुवाक प्रकरणं संमील्याक्षिणी[3] इति गम्यते । तु शब्दो विशेषणार्थः शुक्रियनियमादधिकोऽस्य नियमविशेषो-यम् ॥ १४ ॥

गवां तु न सकाशे गोनामानि पूर्वसूत्रवदिदमपि व्याख्येयम् । गोना मानीति मन्त्रसमाख्याने तु गोनामान्येव काम्येत्यादीनि सामान्योपदेशाद्विजे[4] विक्षेप इत्यादीनि च गर्भिणीनामसकाशेऽष्टापदी अष्टासंज्ञां गर्भिणी पशुः प्ररूढगर्भपादैश्चतुर्भिस्तस्याँ अभिधायकं ब्राह्मणमष्टापदीत्युपचर्यते । असकाशे नामाधीयीतेति नायं विधिः सत्रिणाममकाशेऽथ वाध्ययनस्य तस्माचत्सका-शेऽष्टापदीमधीयीतेति अधीयानं च मुक्त्वा रेतोमूत्रमिति च चकारोऽसकाश इत्यनुकर्षणार्थस्तेन रेतोमूत्रसकाशे नाधीत इत्यर्थः । उपलक्षणार्थं च सर्वा-शुचीनां पुरीषादीनाम् । विषुवतमार्द्रपाणिः । अधीयीतेति शेषः । विषुवान्ना-मक्रतुस्तस्य मन्त्रब्राह्मणेषु विषुवतमार्द्रपाणिरधीयीतेत्यर्थः । कल्पेपि स्वर उदात्तादिरस्ति पञ्चदुर्यो येह्यन्वेमि यांगा भावात् ( १०-१२ पर्यन्तो भागो द्वादशसूत्र व्याख्यारूप इति ज्ञेयम् ) ॥ १५ ॥

'शुनासीर्यस्य ' सौर्ये चक्षुः कामस्य चक्षुर्नोधेहीत्यारभ्यदिवाधी-यीतेत्यन्तं सूत्रम् । इतरथा आर्द्रपाणिरधीयीतेत्यनुवर्तते ततश्चार्द्रपाणेरध्यनं

१ निक ग. च. । २ था. घ । ३ क्षीणि, क. । ४ जे. ग. च. । ५ जो, क. । ६ नाद, ग. च । ७ स्य, ग. च. । ८ ना, ग. च. । ९ चेति, ग. च. । १०-१२ ० घ. । ११ गो, ग. च. ।

वगाहत इति च आदित्यसौर्ययाम्यानि षडृचानि दिवाधीयीत ॥ १६ ॥ उपाकृत्योत्सृज्य च त्र्यहं पञ्चरात्रमेके ॥ १७ ॥ वेदारम्भणे समाप्तौ चाकालम् ॥ १८ ॥ इति चतुर्थः खण्डः ॥

---

प्राप्नोति । शुनासीर्यदेवत्ये द्वे ऋचौ सप्तत्वोतरणिरिति । चक्षुःकामस्य चकारस्यैक इत्यनुकर्षणार्थः । अग्नये भ्राजस्वतेऽष्टाकपालमिति त्रिहविश्चक्षुःकामस्य तत्र सौर्ये याज्यानुवाक्ये तत्सूर्यस्य भद्रा अश्वा इति प्रातरग्निहोत्राभ्युदितेष्ट्यां पच्यते । इह त्वाद्ययोर्ऋचो रधीतत्वात् । अन्ये पुनश्चक्षुःकामस्येति विशेषणं चक्षु र्नोधेहीत्यस्या इच्छन्ति तदयुक्तं तस्याश्चक्षुर्नोधेहि चक्षुष इति स्वरूपनिर्देशाद्विशेषणमनर्थकं सुसंदृशंत्वावयमित्यर्थ इति । सूर्ये इति विशेषानुवृत्तेः सूर्यो (?) आपोऽवगाहत इति च याज्योपादानमनुवाक्यानिवृत्त्यर्थं सूर्य आदित्ययाम्यानीति कानीत्याह । षडृचानीति । एवं च सौर्यादीनां रात्राविति निषेधः । अथवा सौर्यादित्ययाम्यानि ब्राह्मणानि नपुंसकलिङ्गनिर्देशात्सामान्यापेक्षं वा नपुंसकत्वम् । एवं सति श्रेयोदिवाध्ययनं सिद्धम् । तदेतत्सन्यत्सत्वत्याह तरणि इत्यादीनां सौर्यत्वात् सिद्धे ग्रहणमनर्थकं स्यात् । एवं तर्हि ब्राह्मणापेक्षं नपुंसकत्वम् ॥ १६ ॥

'उपाकृत्योत्सृज्य' त्र्यहं नाधीयीतेति वर्त्तते पञ्चरात्रमेके विकल्पार्थं वचनम् ॥ १७ ॥

वेदारम्भणे समाप्तौ चाकालम् । वेदारम्भो वेदाद्यनुवाकः । वेदसमाप्तिर्वेदान्तानुवाकः । इयेत्वा अग्निमनवंचाकालं कालादारभ्य यावद्द्वितीयेन्हि तत्कालमित्यर्थः । एतयोः प्रत्यारम्भसमाप्तिशब्दयोरयमेवार्थः । न मध्ये ... वा वेद आरभ्य पश्चादादि पठितव्य इति वेदं वापि यथाक्रममित्ये तदनुवचनात् ॥ १८ ॥

॥ इति पुरणव्याख्याने चतुर्थः खण्डः ॥ ४ ॥

—•—

## पञ्चमः खण्डः

अथातोऽन्तरकल्पं[१] व्याख्यास्यामः ॥ १ ॥

' अथातोऽन्तरकल्पं व्याख्यास्यामः '। अथ शब्दो विशेषाधिकारार्थः स्वाध्यायधर्मप्रकरणे। अनध्याया गवां तु न सकाश इत्यादयश्चानध्याया व्याख्याताः। अन्तरकल्पज्ञानादितिकर्त्तव्यता व्याख्याता। अन्तरकल्पस्तु बहुभिः कर्त्तव्यतया युक्तत्वात्पूर्वंवत्स्वाध्यायकर्मणः सकाशाद्विशिष्टतम इति कर्त्तव्यताबहुत्वविशेषणतोऽधिक्रियते। अधिकृतस्य हीतिकर्तव्यता संबन्धः। अन्तरेऽन्तराले राजद्वयस्थण्डिलाग्न्योः कल्पधर्म इति अन्तरकल्पं वक्ष्यमाणकर्मणो नामधेयं राजद्वयाध्यायसमाप्तिनिमित्तं नैतदस्ति प्रवृत्तिनिमित्तं चान्तरशब्द उभयापेक्षत्वात्। व्याख्यास्याम इति गौरवेण श्रेयस्करत्वमव्ययनित्यशब्दत्वेऽप्यस्य सूचयति। अथवाऽवबुद्धवेदार्थो गुरुणाऽनुज्ञातः कश्चित्। स्वान् गृहान्प्रस्थितः शब्दविद्यामधीयानैः पथि संगतस्त्वस्य तैः सह किलैवं वाद आसीत्। येथा अपान्नष्क्रमविनाशेनावयवादिना [यदि न] ... ....... अधीयेहं ततोऽग्नौ प्रवेक्ष्या(क्ष्या)मि इति प्रतिज्ञाय तमधीयानो विनाशितत्वात्प्रतिज्ञार्थनिर्वहणायाग्नौ ...पणोदितैः। ऊरुवर्णाय गुरोर-गृहेऽन्तरा क्षुतद्वयश्रुत इत्यन्तरशब्दयोगः। तथा लोके एवं विधश्चाभानको विधीयते। अन्तरो वित्तायणीयात्वं मातुरिति तस्योपकारायेदमूर्ध्वदैहिकं कल्पितं तैरित्यन्तरकल्प इति। ऐतिहासिकी अन्तरशब्दस्य व्युत्पत्तिर्नचात्रैतदर्थोक्तं किं चोद्येन प्रतिज्ञाकर्त्तव्यमात्महननं निर्वाहितवान्। दुःशाननस्य रुधिरपानमिव भीमसेन इति कथितं तस्योदकदानादि। आत्मघातकानां मन्वादिनिषिद्धत्वादुदकक्रियादेरिति। यस्मादकर्तव्यापि किंचित्प्रतिज्ञाय केनचिन्निमित्तेन तन्निर्वाहने लोके गर्ह्यते प्रायोपवेशनात्प्रत्यवानितदुर्योधनवत् नारायणबलिपातैस्तस्य कुतो भविष्यति प्रत्यहं नित्यन्वात्कर्मणोऽस्य। ऐतिहासपक्षेऽनित्यत्वपरिहारः। अन्यस्तु नायं स्वाध्यायधर्मो नाप्यन्तरं-

१ इ. क.। २—२—२ घ.। ३ ह. ग. च.। ४ ग. ग. च.। ५ घ, ग. च।
६ ग, ग. च.। ७ धंनहिवोदेश (?). ग च.। ८ हे ग. च।

दर्भमयꣳ वासः परिधायाचम्यापां नप्त्र इति तीरे जपि-

स्योदकद्योतकक्रिया । अपि तु स्वाध्यायोत्सर्जनविधिः[२] । तथा च नायं स्वाध्यायधर्मोऽस्त्वाभिवादादाविव । [नैच] तर्कस्योदकक्रियायामाचार्याणां च तर्पणं श्रूयते । आचार्यान्पितृधर्मेण तर्पयन्तीति । तस्मादुत्सर्गविधिरयमुदकसमीपे । तथा च स्मृत्यन्तरम् ( या० १-१४३ )

जलान्ते छन्दसां कुर्यादुत्सर्गं विधिवद्बहिः—

इति विधिश्चायं वक्ष्यमाणस्तथा बहूनां गृह्ये श्रूयते मध्यमायामष्टकायामेताभ्यो देवताभ्योऽन्नेन हुत्वा यो भ्यवयन्ते ताश्चैवदेवतास्तर्पयित्वाचार्यानृषीन्पितृंश्चैतदुत्सर्जनम् । अथातोऽध्यायोपाकरणमित्युपाकरणं मुक्त्वा तदुत्सर्जनमुक्तवान् । मध्यमाष्टका च तैष्या ऊर्ध्वं विज्ञेया । तथा च स्मृत्यन्तरम् ( या० १-१४३ )

' पौषमासस्य रोहिण्यामष्टकायामथापि वेति ' ।

रोहिणी च पौषस्य सितपक्षे दशम्यामेकादश्यां वा भवति । इह चोक्तम् । अर्द्धपञ्चमासानधीत्योत्सृजति पञ्चार्द्धषष्ठान्वा तत्र श्रावण्या आरभ्य तैष्यां पञ्चमासा भवन्ति । अत एव स्मृत्यन्तरम् ( या० १-१४३ )

' पौषमासस्य रोहिण्यामष्टकायामथापि वेति ' ।

यदा तु तस्मिन्काले न केचनोत्सर्गमनुतिष्ठन्तो दृश्यन्ते । तदा किं कुर्मः कमुपलभेमहि । शास्त्रार्थस्तावद्यथाऽस्माभिर्वर्णित इत्यलमतिप्रसङ्गेन प्रकृतमभिधीयते अन्तरकल्प इति कोऽर्थः । उपाकरणात्परतरं भवति तदर्वाक् न भवतीत्यर्थः । अत एवाथातः शब्दौ कृतौ ॥ १ ॥

' दर्भमयं वासः परिधायेत्यादि ' नियमार्थं वचनम् । आचमनं स्मृतिगृहितम् । अपां नप्त्र इत्यनुवाको गृह्यते कल्पस्य मन्त्रत्वात् । वसन्ताय कपिञ्जलानितिवत् । एतदेवेतिहासस्य मूलं मन्यामहे अस्मिन्नेव कर्मणि तैः सह जवाजवानाविनाशितमित्यपि श्रूयते । वेन्नाय अपां नप्त्र इत्यनुवाकमपि जपित्वा वेदजपफलेन युज्यते इति नूनमेतदग्निप्रवेशप्रतिज्ञाने कारणं नेत्येवबुद्धेर्वेदार्थतत्त्वो निष्प्रयोजनेऽध्यापने प्रतिजानीतेऽतोनुवाको जप्त(पित)-

१-१-० घ. । २ धेः, ग. च. । ३ मोन्तक, ग. च. । ४ य, ग. च. । ५-६-० ग. च. । ७ दं, क. । ८ मा, ग. च. । १० ता, ग. । त्ता, च. । ११ नद्य, ग. च. । १२ ध्य, ग. च. ।

त्वाऽपोऽवगाह्य ॐ भूर्भुवः स्वस्तत्सवितुरिति ॥२॥ दर्भपाणिस्त्रिः सावित्रीमधीते त्रीꣳश्चादितोऽनुवाकान् ॥ ३ ॥ आपो देवीर्हविष्मतीरिमा निग्राभ्या स्थ महित्रीणामवोऽस्तु अग्नेरायुरसि देवी रापो अपां नपाद्देवीरापो मधुमतीरग्नये स्वाहा रात्रीꣳरात्रीमित्यष्टौ ॥ ४ ॥ या ओषधयः समन्यायन्ति पुनन्तु मा पितरोऽग्नेर्मन्वे सशेवृधमधिधाः कया नश्चित्र आभुवदूतीति

---

न्योऽनुवाकान्ते हि शुष्कशब्दः। व्याहृतिशब्दात्सतः कपिलशब्दान्तरोच्चारेण विनाएां नप्त्र इति जपयज्ञपक्षस्तत ऊर्जो नप्त्र इति मन्त्रान् जपन् दर्भसमूहानुत्तरस्यादिना पूर्वान्तं जानीयात्। तीरेतीरेर्थे उदकसमीपे अपोऽवगाह्य मज्योन्मज्य वासनं व्याख्यातम्। ॐ भूर्भुवः स्वस्तत्सवितुरिति ॥ २ ॥

'दर्भपाणिः सावित्री मधीत' इति व्याख्यातम्। त्रींश्चादितोनुवाकान् अधीत इति प्रकृतेन संबन्धः ॥ ३ ॥

'आपो देवी रात्री चेत्यष्टौ'। आपो देवीरित्यादयोष्टावनुवाकाः। अनुवाकादि प्रतीकत्वादनुवाकाधिकाराश्च ॥ ४ ॥

'या औषधय इत्यादि' अग्नेर्मन्वन्त इत्यन्तम्। एते चत्वारोऽनुवाकाः। सशेवृधमधिधाः कयानश्चित्र आभुवदिति तिस्रस्तं शंयोरावृणीमह इति मार्जयित्वाऽऽचार्यान् पितृधर्मेण तर्पयन्ति द्वादशानुवाकाश्चाध्येतव्या अपि अधीत इति प्रकृतसंबन्धात्। स एताभिः पञ्चभिर्ऋग्भिर्मार्जनं कृत्वा तत आचार्यान् पितृधर्मेण तर्पयेयुरित्यर्थः। आचार्यशब्दो मन्वादि संबन्धिशब्दत्वेन स्मृतिः। उपनीय तु यः शिष्यमित्यादौ सूत्रकार भाष्यकाराद्याचार्याः। आचार्य आचारं ग्राहयतीत्यादिरिति वचनात् पितृवत्तर्पणमसौ तृप्यध्वं? तस्मै ते स्वधेति चोदकाश्चोदकाञ्जलाञ्जलीन् दद्युः पितृतीर्थेन प्राचीनावीतिनः। तर्पयन्तीति बहुवचनमन्तेवासिभिः

---

१ भ्या. क। २ दिति. क. घ. ३ क्लि. घ.। क्लि, ग. च.॥ ३ ० क. घ.। ४ ज्यान, घ.। ज्ञो, ग. च.॥ ५ ज्ञा, ग. च.। ५-६ ० घ.। ७ तु. क. ग. च.। ८ धी, क.। ९ भू, ग.। १० दू. ग.। ८-१० ० घ.। ११ आ. ग. च.। १२ ० ग. घ. च.।

## षष्ठः खण्डः।

अथाऽतोऽग्निं प्रवर्तयन्ति ॥ १ ॥ उत्तरतो ग्रामस्य पुरस्ताद्वा शुचौ देशे वेद्याकृतिं कृत्वाहवनीयस्थाने सप्तच्छन्दाꣳसि प्रतिष्ठाप्य विष्टरान् दर्भमुष्टीन्वा दक्षिणाग्निस्थाने प्रौगाकृतिं कौशितं खात्वा पश्चादुत्करमपां पूरयित्वा गार्हपत्यस्थानेऽग्निं प्रणीय युञ्जानः प्रथमं मन इत्यष्टौ हुत्वाऽऽकूतमग्निं प्रयुजꣳ स्वाहेति षड्

'अथातोऽग्निं प्रवर्तयन्ति' अथेत्यानन्तर्ये अन्तरकल्पादनन्तरमत इति तद्धेतुकमग्निप्रवर्तनम्। एतदेव मूलं यदग्नेतारोऽपां नप्तृके समाप्तेऽनन्तरमेवाग्निप्रथमाननुवाकानारंभेत्तेन गोदोहनविधिरत्रेति। यैदन्तरमग्निप्रवर्तनकर्मणोरानन्तर्येण तत्कर्मप्रयोजनेऽध्ययने कर्म न लभेत सेद्यचार्चेर्यते (?) ॥ १॥

'कथं कृत्वा प्रवर्तयन्तीत्याह'—उत्तरतो ग्रामस्य पुरस्ताद्वा शुचौ देशे वेद्याकृतिं कृत्वा स्थण्डिलमग्निं प्रवर्तयन्तीत्यर्थः। उत्तरस्मिन्देशे पूर्वस्मिन्वा शुचौ वेद्याकृतिदर्शिन्या सदृशीं वेदादिसंस्कारवर्जितं कृत्वाऽग्निप्रवर्त्तनं कुर्यादित्यर्थः। आहवनीयस्थाने प्राग्देशे वेद्या आहवनीयसदृशदेशे चतुरस्र मायतनं कृत्वा तत्र च्छन्दांसि गायत्र्यादीनि जगत्यन्तान्यक्षरवृद्धिक्रमेण प्रतिष्ठाप्य कथं विष्टरान् दर्भमुष्टीन् कल्पयित्वा सप्तच्छन्दसां प्रतिष्ठानामभावसंज्ञकैः शब्दैर्विष्टरान्दर्भमुष्टीन्कल्पयित्वा स्थापयेत्। विष्टरदर्भपुञ्जस्याकारकृतो विशेषः। दक्षिणाग्निस्थाने प्रौगाकृतिं कौसितं खात्वा प्रौगस्याकृतिं प्राङ्मुखं शकटाकारं ह्रदस्य कौसित इति संज्ञा कौसितान्मार्जयित्वेति व्यवहारार्थम्। अत्र ह्रदे कुसीतयी राक्षसी। वामदेवस्तु तेनाख्यानेनाग्निना प्रवेशितेति कृत्वा कौसितो ह्रद उच्यते पश्चादुत्करं कृत्वेत्यध्याहारः। पालिरुत्करः पश्चात्कौसित इति ह्रदः। अयं पूरयित्वाद्भिः सर्वत्र पूरयेयुरित्यर्थः। सर्वत उक्ता श्रुतिरग्निः प्रवर्तते अन्तर कालापेक्षा गार्हपत्यस्थाने विपर्ययसप्तमी गार्हपत्यस्थाने पश्चात्तस्या वेदेर्गार्हपत्यसदृशमायतनं कृत्वाग्निं प्रज्वाल्य जन्माग्निं चौपासनं वा प्रज्वाल्योद्दीप्य

१ त्वन्. ग. । २ रभेत. ग. च. । ३–४ ० घ. । ५ तिं. घ. । निष्ठ, ग. च । तिनिस, क. । ६ ख. ग. च. । ७–८ ० क घ. ।

जुहोति विश्वो देवस्य नेतु रिति सप्तमीम् ॥२॥ यज्ञियानाꣳसमिधां त्रीꣳस्त्रीन् समित्पूलानुपकल्प्य प्राक्स्विष्टकृतस्तिष्ठन्तो व्याहृतिपूर्वकं खण्डिलस्यादितस्त्रिभि रनुवाकै रेकैकेन स्वाहाकारान्ताभिरादधति ॥ ३ ॥ आपोहिष्ठीयाभिः कौसितान् मार्जयित्वा

---

तस्मिन्नग्नौ युञ्जानः प्रथमं मन इत्यादयः पञ्चदशाज्याहुतीर्जुहुयात् । सर्वत्रानादेशे आज्य मेव ज्ञातव्यम् । स्विष्टकृद्दर्शना दाज्यभागादितन्त्रस्रुवाद्यन्तश्च प्रधानस्थानेत्र स्रुव एव स्रुग्[१] भवति तथोपरिष्टाद्वक्ष्यामः ॥ २ ॥

'यज्ञियानां समिधां स्वाहाकारान्ताभि रादधा(ध)ति'। ततः समित्पूलांस्त्रीं स्त्रीन्यज्ञियानुपकल्प्य पश्चादग्नेस्तिष्ठन्तः प्राक्स्विष्टकृतस्तु आदधति खण्डितस्याग्नेस्थानस्यादितास्त्रिभि रनुवाकै रनुवाकमूलै र्यथासंख्यवीप्सावचन मेकस्य मूलार्थ व्याहृतिपूर्व मनुवाकत्रयस्य चाहुति त्रयेण यथासंख्यमुत समस्ताभिरिति यथासंख्यं व्याहृतिपूर्वमित्येकवचनात् ॥ ३ ॥

'आपोहिष्ठीयेति स्वस्ति वाचयन्ति'। आपोहिष्ठीयै मार्जनं तन्त्रपक्षे विचारणीय मुद्ग्राहवदिति चेन्न तत्र नक्षत्रदेवताद्यपि विधीयते । अनुवादैः कौसितोदके विनोदनार्थः स्यान्मार्जनस्य । अन्यस्तु कौशितानिति तस्यैव मार्जनमुदकस्योद्धारः । अत एवाहवनीयस्थाने छन्दोर्था दर्भमुष्टयो विष्टरा वा तेऽपि प्रवहितव्याः । गार्हपत्यस्थाने पश्चादग्निस्तत्संबन्धिनो भस्मादि इयांस्तु विशेषः कौसितस्य समन्त्रमितरयो स्तूष्णीं धानाभिरिति नियमः । ब्राह्मणान् त्रिप्रभृतींस्त्रीन्वा स्वस्तिवाचोदकपूर्वमेकैकस्मै ब्राह्मणाय धाना दधुः पूर्ववदत्र सहाधिकारो वा वाचयन्तीति वचनात् । तथाग्नि प्रवर्त्तयन्तीति बहुत्वोपक्रमात्सर्वेऽपि तिष्ठन्त आदधतीति बहुत्वं न ब्रह्माद्यपेक्ष मिति । आकृतिं कृत्वैवं ब्रूयाद् गार्हपत्यस्थानेग्निरिति वा सत्रिवदग्निमस्ति वापोऽत्र गार्हपत्यस्थानेऽग्निं प्रज्वाल्येति लिङ्गाल्लौकिकारणेयोग्निरिति गम्यतेऽन्यथाग्निं प्रणीयेति तस्मात्प्रज्वाल्येतिवचनाल्लौकिकं विज्ञाय जातकर्मादयो निर्मथ्य क्रियन्ते मन्थनं च द्वि( नहि ) संस्कारतया किं तर्हि उत्पतिर्न

---

१ स्रुव, ग. च. । ० घ. । २ दम्पति, ग. च. । ३ पू, क. घ. ।
४ द, ग. च. । ५ ० ग. च. । ६ च्यो, घ. । ७-९ ० घ. । ८ द्धि०, क. ।

धानाभि र्ब्राह्मणान्स्वस्ति वाचयन्ति धानाभि र्ब्राह्मणान्स्वस्ति वाचयन्ति ॥ ४ ॥ इति मानवे षष्ठः खण्डः ॥ ६ ॥ .

---

चोत्पत्ति (म्) संस्कारतयापेक्षन्ते भूतानि साग्निका इति ब्रूमः पक्षेऽसंस्कृतेऽग्नौ क्रियन्ते आहृत्यवदध्यान्मथित्वेत्यादिवचनात् । उक्तं चात्र शिविरस्वामि पादै र्नास्ति वचनस्यातिभारः किमिव वचनं कुर्याद्यावन्न प्रामाण्यं संस्कृतेऽग्नौ यथा भवतीति । अन्यस्तु यन्मथित्वारणिपक्षे पैक्षान्तरान्नित्यमेव न वैकल्पिकं ये शाखान्तरीयाद्वचनं तूष्णीं निर्मथ्यो भ्राष्ट्रः संतपनीयेत्र दीप्यमानवचनं तत्र लौकिको न त्वारणेयः कथितः । अयं तु विशेषः । स यत्रेता(?)र्धसमन्त्रकमात्मने नोत्पद्यते सश्रौत (:) यस्तूत्पद्यते ते जातकर्मादौ तूष्णीं निर्मथ्य परमेष्टिविधानेन चोत्पद्यते स स्मार्तः । अन्यतो यत्र दीप्यमाने स लौकिक इत्येषा विविधा स्थिति रग्ने (:) स्वस्ति ब्रूहीत्युक्तोदकपूर्व धाना दत्वाऽग्निं युञ्जानः प्रथममित्यादौ त्रिस्थानमध्यमुपक्रमन्ते । स्विष्टकृत्पाठे अध्वर्युब्रह्मत्वपूर्णपात्रादर्न्यः ॥ अथ किमर्थ मार्गवासा इत्यादि धर्मगणमध्ये स्वाध्यायोपाकरणादयोऽग्निप्रवर्तनान्ता अध्ययन धर्माण उच्यन्ते तत्र पाठे एतेषु ब्रह्मचारिण एवाधिकारः स्यात् । इहत्वनारभ्य पाठात्सर्वेषामधिकारः सिद्धः । तस्मादन्यार्थे अध्ययने गोनामादि धर्मवदन्नर कल्पाग्निप्रवर्तनकर्मणी स्यातां तेनैकः कुरुते जन्माग्न्यादौ यथाधिकारं यजमान एव समेत्य समित्पूलांस्तिष्ठन्नादध्यान्न ऋत्विक् । एष विधिः प्रयोवत्रूभेदः (भेद) प्रयोगभेदमपेक्ष्य बहुत्वं प्रवर्तयन्ति वाद–(च) यन्तीति । एवं मध्येपि तिष्ठन्तो प्यादधतीतिबहुवचनं नतु ब्रह्माध्वर्य्वपेक्षम् ॥ ४ ॥

इति पूरणव्याख्याने षष्ठ' खण्ड: ॥ ६ ।

# सप्तमः खण्डः

अथोपनिषदर्हाः । ब्रह्मचारी सुचरिती मेधावी कर्मकृद्धनदः प्रियो विद्यया वा विद्ययान्वेष्यन् ॥ १ ॥

अस्मिन्नेव प्रकीर्णे स्नातकाधिकारे ब्राह्मयौनसंबन्धाः कर्त्तव्या इत्याह 'अथोपनिषदर्हाः' अथेति वाक्योपन्यासार्थः । उपनिषच्छन्दो वैदैकदेशवचनोऽपीह कृत्स्ने वेदे वर्तते शास्त्रान्तरैरविरोधादितरथा अधियज्ञादिकस्य वेदस्यानर्हा अपि व्याप्यस्य ब्रह्मचारिदुराचारादयस्तच्च शास्त्रान्तरविरुद्धम् । यद्वा रहस्यत्वात् वेदार्थ उपनिषच्छन्देनोच्यते तथा तानि तीर्थानि ब्रह्मण इति वक्ष्यति । किमर्थमेव सूत्र्यते । अथाप्येवं विधेषु व्याख्यातम् स हि गरीयो वेदादिस्तस्यार्हा योग्याः । अथोपनिषदमर्हतीति कर्मण्याणित्यण् । तानाह ब्रह्मचारीत्यादि ब्रह्मचारि ग्रहणमनर्थकं तस्यैवाध्ययने तदर्थाववोधेनैव वाधिकाः । स्नास्यन् गां कारयेदित्युक्तत्वात् । एवं तर्हि हस्तस्य यद्विद्याधिगमो मन्वादिषु श्रूयते विद्यार्थं पडिति । संवत्सरे संवत्सरे द्वौ मासौ गुरुगृहे वसेदिति चातो ब्रह्मचारि ( चर्या ) चरिणो वेति ब्रह्मचारिग्रहणम् । सुचरिती मार्गवासस्त्वादि यमनियमजातसाधुचरितं यस्यास्तीति सुचरिती ग्रहणधारणाय समर्थो मेधावी मतिमानिति यावत् । सुचरितीत्यनेनैव सिद्धे कर्मवद्ग्रहणमतिशयवत् सुचरितीत्यनेनैवार्थः । अथवा दुर्मेधा अपि कर्मयुक्त उपनिषदर्हः । धनदः पूर्वोक्तगुणेभ्योसौ विशिष्टः । प्रियो बन्धुत्वादिप्रीतिकारणो मेधावीति अयमप्यपर पूर्वाविद्यामन्तरे च विद्याविनियमः । इतरथा भृताध्यापनाध्ययने स्याताम् । नहि धनेनैवभृतिः किं तर्ह्यनेनापि परिभाषितेन वस्त्रादिना । वा शब्दश्चार्थे विद्यां चेति । आचार्यपुत्र इति मनुना पठितानामुपसंग्रहार्थः । वाचिकः सुचरिती सुचरितीत्यनेनैवसिद्धम् ॥ १ ॥

१ प्रकरणे, घ. । २ यौवन, क. ग. घ. । ३–४ ० घ. । ५ मि, ग. च. । ६ व, ग. च. । ७ तव्याः, ग. । तव्यः, च ॥ ८–९ ० घ. । १०–११ ० घ. । १२ वै, च. । ० ग. ॥ १३ वा, घ. । १४–१५ ० घ. । १६ म्यासो, ग. च. । १७ विहितः, ग. च. । १८ भिः, ग. च. । १९–२० ० घ. । २१–२२ ० घ.

**तानि तीर्थानि ब्रह्मणः ॥ २ ॥ भार्यां विन्दते ॥ ३ ॥ कृत्तिका स्वाति पूर्वैरिति वरयेत् ॥ ४ ॥ रोहिणीमृगशिरः श्रवणश्रविष्ठोत्तराणीत्युपयमे तथोद्वाहे यद्वा पुण्योक्तम् ॥ ५ ॥**

'तानि तीर्थानि ब्रह्मणः'। तान्येतानि ब्रह्मचर्यादीनि तीर्थानि पात्रभूतानि ब्रह्मणो ब्रह्मयज्ञस्य संप्रदानकारणान्यर्थः। अथवा तावन्त्येभिरिति तीर्थानि गङ्गादीनामवतरणवर्त्मानि निष्ठानार्थं पारगमनार्थं यथा तथैतानि ब्रह्मणः शब्दब्रह्मण एतैस्तीर्थैः शब्दब्रह्मणि निष्ठायां तत्र हि निष्णातस्य परब्रह्मावाप्तिः श्रूयते। एवमर्थं हि तीर्थेन संप्रदानस्योपमानम् ॥ २ ॥

'भार्यां विन्दति(ते)'—[१]यद्यपि रागतो भार्यावेदने प्रवृत्तिस्तथापि न विधिमन्तरेण शास्त्रीयत्वं भार्यावेदनस्य लभ्यते तस्माद्विन्देतेति प्राप्ति(ः) विन्दते इति छान्दसो वर्त्तमानोपदेशः। पञ्चमलकारो वा छन्दोवत्सूत्राणीति [२]कृत्वा भार्यामिति भाविनी संज्ञा सक्तून्पिनष्टीतिवत्। अपर आह। सत्यं-भाविनी चेयं संज्ञा तथापि यूपं छिनत्तीतिवत् संस्कारशब्दाय भार्यां विन्दत इति [३]यथाच्छेदनादिना धर्मेण यूपो भवति एवं वक्ष्यमाणैर्वेदनधर्मैर्भार्यादीनि एवं च यूपं वचनान्यतोऽनवगते भार्यामित्येकवचनं विवक्षित मेवं चेद्ध(द्वन्)-ध्याष्टमेऽधिवेद्याऽब्दे इत्यादि निमित्ते विवोढापि द्वितीया नैव भार्या शब्द-वाच्या भवति न तया नवन्म(द्धर्मा)धिकारो निवर्तते तदुक्तं धर्मप्रजासंपन्ने(पुं)-दारे(षु) नान्यां कुर्वीतेति[४] ॥ ३ ॥

कथं विन्दत इत्याह कृत्तिकास्वाति पूर्वैरिति वरयेत्। कथं तृ-तीया यावता कृत्तिकास्वातिपूर्वेष्विति सप्तम्या भवितव्यं सप्तम्यर्थस्य साधकत्वेन विवक्षितत्वात्तृतीया। नक्षत्राभिप्रायं पूर्वैरित्युक्तमाषाढादीनां स्त्रीत्वात्पूर्वाभि-रिति स्यात्। [५]द्वन्द्वगर्भोयं द्वन्द्वः। इतरथा द्वन्द्वेघित्वात्पूर्वनिपातः स्यादिति करणादन्यैरपि पूर्वोक्तैर्नक्षत्रैर्वरयेत् ॥ ४ ॥

रोहिणी प्रशस्तानीति गम्यते तथा स्वातौ तथेति उद्वाहे च रोहिण्या-दीनि शस्यन्ते यद्वा पुण्योक्तं वा शब्दः स्वार्थे यच्च नक्षत्रं पुण्ये पुण्यसूच-

१—० ग. घ.। २—४—० घ.। ३—० ग. च.। ५ याद, घ.। ६—७—० घ.। ८—९ ० घ.।

पञ्च विवाहकारकाणि भवन्ति वित्तꣳ रूपꣳ विद्या प्रज्ञा बांधव इति ॥ ६ ॥ एकालाभे वित्तꣳ विसृजेद् द्वितीयालाभे रूपं तृतीयालाभे विद्यां प्रज्ञायां बान्धव इति च विवहन्ते ॥७॥ बन्धुमतीं कन्यामस्पृष्टमैथुना मुपयच्छेत समानवर्णामसमा-

केषु शास्त्रेषु पराशरादिविरचितेषु उक्तं तदपि शम्न मुद्वाहे इति करणस्यैवायं प्रपञ्चो यद्वा पुण्योक्तमिति ॥ ५ ॥

'उद्वाहे च पञ्चविवाहकारकाणि भवन्ति' उद्वाहो विवाह इति तुल्यार्थौ कारकाणि हेतुभूतानीत्यर्थः । पञ्चभिरेव हेतुभिर्विवाह-संबन्धो भवति तदाहवित्तमित्यादि वित्तं गोहिरण्यादि रूपं पुरुषलक्षणं ज्योतिः शास्त्रोक्तम् । विद्या आन्विक्षिक्यादिः । प्रज्ञा देश ( शे ) काले चाऽविधुरमतित्वम् । बन्धुरेव बान्धवोऽभिजनः । अवदातकुलप्रसूतत्वात् ॥ ६ ॥

पञ्चैव यदाऽसमुच्चितानि[2] तदा कथं कुर्यादित्याह । एकालाभेवित्तं विसृजेत् वित्तस्यानित्यत्वात् । भूत्वापि न भवति अभूत्वापि च भवतीति रूपादिभिर्धनं लभ्यत एवेति । द्वितियाऽ लाभे रूपम् ( विसृजेदितिसर्वत्र ) द्वितीयस्य विवाहकारकस्यालाभे विद्यादिभिस्तिसृभिर्विवाहः । विद्यादिभिराधेयं रूपं तस्याहार्यत्वात्[3] विद्यादिन्यलङ्कारभूतानि पुंसः । तृतीयालाभे विद्याम् । अनधीतवेदो विद्या मधिगन्तुमल्पप्रयत्नोऽपि शक्नुयाद्यदि प्रज्ञावान् बन्धुमांश्च भवतीतिभावः । तथा प्रज्ञायां बान्धव इति च । असमासकरणं च केवलायामपिप्रज्ञायां बान्धवेऽपि च केवले विवहन्ते कन्यां वरयन्ते ददते च । एवं मत्वेति नावधारणं वृत्तिं शीलं च विवाहकारणं च केवलायामपि पूजार्थ बहुवचनं दर्श्यते । शद्वेषु पञ्चसु वित्तादिषु न शीलहीने ते विवहन्ते ॥ ७ ॥

कन्यां बन्धुमतीं बन्धुरिह भ्रातोच्यते भ्रातृमतीमित्यर्थः । अस्पृष्टमनभिज्ञातं मैथुनं सुरतं यया साऽस्पृष्टमैथुना । अनन्यपूर्वा वा उपयच्छेत स्वीकुर्यात् । दद्याच्च उभयत्र चायं नियमः पूर्वोक्तेऽपि प्रतिग्रहीतुश्च तथा चानेन

१ वा, क. घ. | २ निगम्य, ( म्याः ), क. ग. च. | ३ हेत्वात्, ग. च. |
४ अधी. ग. च. | ५–८ ० घ. | ६ ० क. | ७ ० ग. च. | ८ क्षा. ग. | क्षो. च. |

नप्रवराꣳ यवीयसीं नग्निकाꣳ श्रेष्ठाम् ॥ ८ ॥ विज्ञानमस्याः कुर्यादष्टौ लोष्ठानाहरेत्सीता–लोष्ठꣳ वेदिलोष्ठं दूर्वालोष्ठं गोमयलोष्ठं फलवतो वृक्षस्याधस्ताल्लोष्ठꣳ श्मशानलोष्ठ मध्वलोष्ठमिरीणलोष्ठमिति ॥ ९ ॥

---

एवाभिप्रायेणाख्यातद्वयस्य प्रयोग उपयच्छेत विवहन्तीति च । अस्पृष्टमैथुना च सा ज्ञेया अनभिप्राप्ता स्त्रीचन्मणि चतुर्थावरणम् । अनुपभुक्ता नक्ता (ग्ना) तथा च स्मृत्यन्तरम्—

" तस्मादव्यञ्जनोपेतां रजसा मा ( ना ) प्र–यौवनाम् ।
उपभुक्तां न सोमाद्यैर्दद्यादुहितरं पिता "

तथा पितृगेहे यस्या रजो दृष्टं तां विवाहयन् वृषलीपतिरित्यन्ये समानवर्णामसमानप्रवरां च । केचिदेतन्मन्त्रं पठन्ति ' समानवर्णा ब्राह्मणो ब्राह्मणीं क्षत्रियः क्षत्रिणीत्यादि । असमानप्रवरा नामसंख्याभ्यां सर्वे निषिध्यन्ते । प्रवराणां न नाम्नैव केवलेन संख्यया वा ततो भिन्ननामभिः समसंख्यैर्विवाह इष्यते । भिन्नसंख्येन समाननामभिश्च । एवं च व्याख्याने ऋत्भरद्वाजैर्भरद्वाजविवाहो भवति नान्यथा भृग्वाङ्गिराष्टिषेणादिभिर्भृगूणाम् । नग्निकां श्रेष्ठां नग्नैव नग्निका स्वार्थे क प्रत्ययः । नग्निकामप्राप्तस्त्रीभावामयौवनरसामुपयच्छेतेति तथा श्रेष्ठां लावण्ययुक्तां स्त्रीलक्षणोपेतामित्यर्थः । नान्यल्लावण्याच्छ्रेष्ठत्वं कन्यायां विद्यते । अनेनैवाशयेन मनुनोक्तं ' स्त्रीरत्नं दुष्कुलादपि ' अव्यङ्गाङ्गीं सौम्यनाम्नीमित्यादि । अथवा नग्निकां श्रेष्ठां विवस्त्रवती श्रेष्ठां विवस्त्रा सती श्रेष्ठा या भवेत्तामुपयच्छेत । यस्मात्कुरूपाऽपि वस्त्राद्यलङ्कारकृता मनोहारिणी भवति । तस्माद्विवस्त्रा सती न सर्वा शोभते किं तर्हि काचिदेव लक्षणवती नापि च वैधव्यदौर्भाग्यादिदोषा दृश्यन्ते तस्माददृष्टं दूषणं दुर्ज्ञेयम् ॥ ८ ॥

तद्यथा विज्ञायते तद्दर्शयितुमाह–' विज्ञानमस्याः कुर्यात् ' । विज्ञायते येन शुभमशुभं च तद्विज्ञानं तदाह–अष्टौ लोष्ठानाहृत्य ॥ ९ ॥

---

१–९ ० घ. । २ मरलो. क. । ३ ना. ग. च. । ४ क्ता. ग. च. ।
६–७ ० घ. । ८–९–० घ. । १–११ ० द ।

देवागारे स्थापयित्वाथ कन्यां ग्राहयेत् यदि श्मशानलोष्टं गृह्णीयादध्वलोष्ठमिरिणलोष्ठं वा नो पयमेत् ॥ १० ॥ संजुष्टां धर्मेणोपयच्छेत ब्राह्मेण शौल्केन वा ॥ ११ ॥ शतमिति रथं दद्याद् गोमिथुनं वा ॥ १२ ॥ इति सप्तमः खण्डः ॥ ७ ॥

---

देवागारे स्थापयेदि (यित्वे)त्यादि निगदव्याख्यातम्। अथ कन्यामष्टानां मध्यात्कन्ये एकं गृहाणेत्युक्त्वाऽन्यतमं ग्राहयेत्। यदि श्मशानलोष्ठम्। एषां तु चान्यतर(म)ग्रहणे चोपगमो नोपलभ्येत। यस्मादेषां स्मृत्यन्तरे दोष उक्तः श्मशानात्पतिघ्नीत्वम्। अध्वनः प्रव्रज्या। इरिणे दुर्भगत्वं शेषाणाम् प्रशस्तत्वम् ॥ १० ॥

'संजुष्टां धर्मेणोपयच्छेत ब्राह्मेण शौल्केन वा' सम्यग् जुष्टा स्त्री तां ब्राह्मेण धर्मेण ब्राह्मो धर्मः कन्याया उदकपूर्व माहूय दानं शुल्कं यत्कन्यार्थं वरो ददाति वरं तदुच्यते। तेन निवृत्तः शौल्को धर्मस्तेन शौल्केन वा संजुष्टां वा ग्रहण मुपलक्षणार्थं तेन ब्राह्मो दैवस्तथैवेत्यादि द्रष्टव्यम् ॥ ११ ॥

शुल्कनियमार्थमाह—'शतमितिरथं गोमिथुनं वा दद्यादिति विकल्पः'। कनकाद्यलङ्कारभक्षफलादीनि वा ॥ १२ ॥

॥ इति पूरणव्याख्याने सप्तमः खण्ड ॥



## अष्टमः खण्डः

पश्चादग्नेश्चत्वार्यासनान्युपकल्पयीत ॥१॥ तेषूपविशन्ति पुरस्तात्प्रत्यङ्मुखो दाता पश्चात्प्राङ्मुखः प्रतिग्रहीता दातुरुत्तरतः प्रत्यङ्मुखी कन्या दक्षिणत उदङ्मुखो मन्त्रकारः ॥२॥ तेषां मध्ये प्राक्तूलान्दर्भानास्तीर्य काꣳस्यमक्षतोदकेन पूरयित्वा अविधवास्मै प्रयच्छति ॥३॥ तत्र हिरण्यम् ॥४॥ अष्टौ मङ्गल्यान्यावेदयति ॥५॥

---

इदानीं ब्राह्मधर्ममाह—'पश्चादग्नेश्चत्वारि आसनान्युपकल्पयीत' बृषीकादीनां च पलाशशृङ्ग गोमयादि धर्म उपकल्पयते ॥ वक्ष्यमाणे उपवेशने कस्य पुनरग्नेः पश्चात्कन्याया जातकर्माद्यभावादग्निर्नास्ति नापि सर्वा काचित्प्रथमगर्भा कन्या येन सीमन्तारणी स्याता मेवं तद्धरणिनिर्मथितेऽग्नौ भगार्यमादि यागः स्यात्तस्याग्नेः पश्चात्। स हि लौकिकोऽप्य संकीर्णत्वान्मध्यतरस्तस्माद्वेद्यां विवाहहोमार्थ स्थापयिष्यमाणस्याग्नेः पश्चादासनकल्पनमिति निष्कर्षः ॥ १ ॥

तेषूपविशन्ति मन्त्रकारोयं प्राप्तः कन्यावरयितुर्दूर एव स इत्यर्थः प्रेष्यते स उच्यतेऽन्ये तु दधिहोमीत्याचक्षते ॥ २ ॥

तेषामुपविष्टानां मध्ये स्तरणं प्राक्तूली कुर्यात् दधिहोमी चेदुपविष्ट एव मध्यस्तरणं कुर्यादास्तीर्य कांस्यमक्षतोदकेन पूरयित्वा अविधवास्मै प्रयच्छति सैव पात्रं पूरयत्यक्षतैः सहितेनोदकेन या प्रयच्छति स्का प्रत्ययात्। अस्मै दात्रे प्रयच्छति प्राधान्यात्। पूरयित्वा मन्त्रकारोऽयं वान्तर्यात् ॥ ३ ॥

तत्र हिरण्यमष्टौ मङ्गलान्यावेदयत्याद्ध्यात्। मङ्गलाय हितानि मङ्गल्यान्यावेदयन्तो मङ्गल्यान्युक्त्का को दाता प्रतिग्रहीता च कुतो ददाति प्रतिगृह्णाति तयोः समानकर्तृकत्वेनावगतत्वात्। यद्वा पिता भ्राता वा यत्संबन्धिनी तां दद्यादित्यनेनैकवाक्यत्वात् 'त्रिब्रह्मदेयेति वचनान्मक्रत् शुल्कदेयेति गम्यते। अन्यथा ब्राह्मविशेषणमपार्थकं स्यात् ॥ ४ ॥ ५ ॥

---

१ यवाला, क. । यवला. ग. च. । २ गे, ग. च. । ३—० घ. । ४ न्ति. क । ति. घ. । ५ तत्र. ग. । ६—० घ. ।

मङ्गल्यान्युक्त्वा ददामि प्रतीगृह्णामीति त्रिर्ब्रूयाद्देया पिता भ्राता वा दद्यात् ॥ ६ ॥ सहिरण्यानञ्जलीनावपति धनाय त्वेति दाता पुत्रेभ्यस्त्वेति प्रतिग्रहीता तस्मै प्रत्यावपति ॥ ७ ॥ चतुर्व्यतिहृत्य ददाति ॥ ८ ॥ सावित्रेण कन्यां प्रतिगृह्य प्रजापतय इति च क इदं कस्मा अदादिति सर्वत्रानुषजति कामैतत्त इत्यन्तम् ॥ ९ ॥

---

पिता भ्राता वा पितुरधिकारः । वा ग्रहणं मन्ये मातामहादीनामुपलक्षणार्थं तथा च स्मृत्यन्तरम् । ( या. १-६३ )

" पिता पितामहो भ्राता सकुल्यो जननी तथा ।
कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः "

अन्यस्त्वाह कथं स्मृत्यन्तरेणैकवाक्यता नाम । अयमियत्स्वयं स्मृतिकारेण नोक्तं चाप्रतिषिद्धं तत् स्मृत्यन्तराद् ग्राह्यमविरोधात् । यस्मान्नहि सैर्वं सर्वत्राम्नातमत एव सर्वस्मृतिप्रत्ययेनैकं कर्म युक्तं तद्विर्जैः ॥ ६ ॥

अथ शुल्कदेयाधर्म माह—सहिरण्यमञ्जली नावपति धनाय त्वेति दाता पुत्रेभ्यस्त्वेति प्रतिग्रहीता तैदेकमेव हिरण्यमष्टास्वप्यञ्जलिषु व्यतिहृत्येति वचनात्स एवाञ्जलिरुच्यते तथा न्योन्यस्याञ्जलि मावपेत् अत एव चतुर्व्यतिहृत्य ददातीत्युक्तं परस्परयोरपि ददातीत्यर्थः। दानं तु ददामि प्रतिगृह्णामीति पूर्वोक्तमेव सकृत् । तेन वाचनान्ते दद्यादीत्यर्थः । एवं च प्रतिग्रहणमुभयोरपि ॥ ७ ॥ ८ ॥

सावित्रेण प्रतिगृह्णाति देवस्य त्वेत्यारभ्य प्रजापतये त्वेति व्रीहियवं हस्तिनं पुरुषमित्युक्तत्वान्न वाच्यं शुल्कदानेऽपि यथा स्यादिति पुनर्वचनं साकाङ्क्षत्वार्थ च तयोः प्रतिग्राहितया किल न स्यादिति मन्दधीराशङ्केत कथमसौ वाचानिके प्रतिग्रहे तद्गुणमशङ्कमानः क सुधीः स्यात् । एवं च नानुषङ्गनिवृत्त्यर्थं सावित्रग्रहणम् ॥ ९ ॥

---

१ न्यथा, ग. घ. च. । २–५ ० घ. । ३ ० ग. च. । ४ तः, ग. च. । ६ ० ग. घ. च. । ७ पते, ग. च. । ८–९ ० घ । १०–११ ० घ. ।

समाना वा आकूतानीति सह जपन्त्यान्तादनुवाकस्य ॥ १० ॥ खे रथस्य खे नसः खे युगस्य शतक्रतो अपालामिन्द्रस्त्रिः पूर्त्यवकृणोरसूर्यत्वच मिति तेनोदकाँस्येन कन्यामभिषिञ्चेत् ॥ ११ ॥ इति अष्टमः खण्डः ॥ ८ ॥

---

समाना वा आकूतानीति सह जपन्ति । आन्तादनुवाकः स्यादिति नोक्तं नापितस्य ग्रहणमस्ति सह जपन्तीत्यन्यशाखा चेदधीत्य जपेत् ॥१०॥

तेनैवोदकांस्येनाभिषिञ्चति । उदकांस्येनेति पूर्व-पदार्थ-प्राधान्यं तत्पुरुषेऽपिवाक्यात्साक्षादुदकस्यैव साधकतमत्वात्कांस्यस्य तु तदधिकरणतया विशेषणत्वम् । यद्येवं कांस्योद( के )नेति पूर्व-पदार्थ-प्राधान्यं तत्पुरुषेऽपि स्यादभिषेचनं तन्मा भूदिति उदकांस्येनेत्युक्तं खे रथस्येत्येतयाभिषेचनम् ॥ ११ ॥

केचिदत्र खण्ड समाप्तिं कुर्वन्ति ॥ ८ ॥



## नवमः खण्डः

षडर्घ्यार्हा भवन्त्यृत्विगाचार्यो विवाह्यो राजा स्नातकः प्रियश्चेति ॥ १ ॥ अप्राकरणिकान्वा परिसंवत्सरादर्हयन्ति ॥ २ ॥ प्राकरणिकाः कर्त्तारः सदस्याश्च वृताः ॥ ३ ॥

इदानीं तस्यैव आम्भर्शोल्कादेर्धर्मस्याङ्गभूतं मधुपर्कमाह–षडर्घ्यार्हा भवन्ति। षड्ऋत्विगादयो नान्ये विवाहप्रसङ्गेन तदङ्गऋत्विगादेरेव लाघवार्थं श्रूयत इत्याह। ऋत्विगाचार्यस्तत्रर्त्विग्यागकर्त्तोच्यते। आचार्य उपनीयाध्यापयति। विवाह्यो जामाता। राजाऽभिषेकगुणयोगार्थं कुर्वन्ति। स्नातक एतेन धर्मेणेत्युक्तः। प्रियः सुहृच्छ्वशुरादिः। आचार्यस्य विशिष्टस्याभिधानात्पृथगुपादानमृत्विगादेर्योगादिना न संबन्धः। अर्घ्यौ राजस्नातकौ त्वसंबन्धौ तौ ॥ १ ॥

'अप्राकरणिकान्वा' आचार्यादयः पश्चाप्राकरणिकास्ते चार्घ्यतमाः सन्तः पुनरागतानपरिसमाप्ते संवत्सरे नैवार्हयेत्। परिगते त्वागताननर्हयन् दोषभाजनः स्याद्विहितातिक्रमात् ॥ २ ॥

प्राकरणिकाः कर्त्तारः। सदस्याश्च वृता ऋत्विजः कर्त्तार इत्यर्थः। ननु दर्शपौर्णमासादौ प्रकरणत्वादर्हणं स्यात्। भवतु को दोषः। समर्थः करिष्यति स्वल्पमूल्यं वा कथंचित्। इतरथा त्वन्वाहार्यमात्रेण ऋत्विजः कथमर्हयेयुः। यद्वा पशुसौत्रामण्यादिषु प्रकरणेष्वेव कर्तॄनर्हयेत्तेषु नित्येष्वपर्याप्तस्य प्रतिनिधिः संस्मर्यते। न तु तथा दर्शपौर्णमासादौ। अन्ये तु सोमेऽर्हणीयान्यत्रेति स्मृतिमुदाहृत्य व्यवतिष्ठन्ते। सदस्याश्च वृताः। चकारात्कर्तृसंज्ञका भवन्ति। कर्तृत्वादर्हणीया इत्यर्थः। वृता इति आमन्त्रिताश्चेत् स्वयमागतानां तु सदार्हणेऽपि परिनियमः न तु स्नातकत्वात्सदार्हणं स्यात्। नह्यस्नातकः सदार्हः सत्यमपरिसंवत्सरान्तं सदस्य–व्रतग्रहणम्। अन्ये त्वस्यार्थं न बुध्यन्ते [12]तदा सत्वान्न प्रदर्श्यते[13] ॥ ३ ॥

---

१–२–० घ. । ३ घर्था, ग. च.। ४–५ ० घ,। ५ सन्तौ, ग. च.। ६ चार्घ्याः क घ। ७ न भ, क.। ८ ० घ.। ९ ० ग.। १० णः, घ.। ११ ० क.। १२–१३ ० घ.।

न जीवत्पितृकोऽर्घ्यं प्रतिगृह्णीयादितिश्रुतिरथवा प्रतिगृह्णीयात् ॥ ४ ॥ अथैनमर्हयन्ति ॥ ५ ॥ कांस्ये चमसे वा दधि मधु चानीय वर्षीयसा पिधायाचमनीयप्रथमैः प्रतिपद्यन्ते ॥ ६ ॥ विराजो दोहोसि विराजो दोहमशीय मयि दोहः पद्यायै विराजः कल्पतामित्येकैक माह्रियमाणं प्रतीक्षते ॥ ७ ॥

---

न जीव—श्रुतिग्रहणमादरार्थम् । प्रतिषेधनस्य विकल्पः । अथवेति न नियमः ॥ ४ ॥

अथेति प्रसक्तव्यपदेशार्थम् । एनमिति प्रकृतानुसरणार्थम् एवमेनं विवाह्य प्रकृतेर्गम्यते । अन्ये तस्मादर्हणीति केचित्पठन्ति विवाह्यमधिकृत्य जीवत्पितृकस्यापि कस्य विकल्पः । तत्र जीवत्पितृकोऽपि विवाह्योऽर्घं प्रतिगृह्णाति । यस्माद्विकल्पात्पक्षेऽधिकारस्तस्मात्कारणादर्हणीत्यर्थः । एतच्च पितुरनुमतेन ग्रहणं मत एव श्रौतेन संग्रहणेन विकल्पोऽन्यथा श्रुतेर्दौर्बल्यात्स्मृतेर्वाऽवश्यं सर्वत्र न पितुरनुमतेन मधुपर्कग्रहणेऽधिकारः ॥ ५ ॥

कांस्ये चमसे वा दधि मधुचानीयवर्षीयसाऽपिधाय मधुपर्कं कल्पयन्तीति शेषः । कांस्य परिमाणं वच्यते पात्रस्यार्थगृहीतस्य नियमार्थं कांस्यचमसग्रहणं तेन स्पन्द्या(न्या)दौ न भवति । चमसा याज्ञिकेषु प्रसिद्धाः । [illegible] प्रोक्षादि सोमपानपात्रं विकल्पश्च [illegible] । [illegible] व्याकुर्यात् । [illegible] वा तथा च [illegible] । दधि च मधु च ते आनीय मिश्रीकृत्य वर्षीयसा पात्रेण पिधान [illegible] । अपि वा न पात्रेण नियमः । [illegible] आचमनीयप्रथमैः प्रतिपद्यन्ते [illegible] मेवं चोपक्रमित्यत्र प्रतिपादनं [illegible] संभवन्ति । आचमनीयप्रथमानां [illegible] [illegible] ॥ ६ ॥

विराजो दोहो । [illegible] प्रतीक्षत इत्यर्थः ॥ ७ ॥

सावित्रेण विष्टरं प्रतिगृह्य अहं वर्ष्म सदृशानामुद्यतामिव सूर्यः । इदं तमभितिष्ठामि यो मा कश्चाभिदासतीति जपति ॥८॥ राष्ट्रभृदसीत्याचार्य आसन्दीमनुमन्त्रयते ॥ ९ ॥ मा त्वा दोष इत्यधस्तात्पादयोर्विष्टरमुपकर्षति ॥ १० ॥ विष्टर आसीनायै कैकं त्रिः प्राह ॥ ११ ॥ नैव भो इत्याह नम आर्षेयायेति श्रुतिः स्पृशत्यर्घ्यम् ॥ १२ ॥ पाद्येन पादौ प्रक्षाल्य सावित्रेण मधुपर्कं प्रतिगृह्य प्रतिष्ठाप्यावसाय्य नमो रुद्राय पात्रसदे नमो रुद्राय पात्रसद इति प्रादेशेनाभ्यधि प्रतिदिशं प्रदक्षिणं सर्वतोऽ-

---

सावित्रेण सावित्रग्रहणादन्यत्र पाद्याचमनीयादीनां तूष्णीं प्रतिग्रहणम् । अहं वर्ष्म जपेन्मन्त्रम् ॥ ८ ॥

राष्ट्रभृदसीति आचार्य आसन्दी मनुमन्त्रयते । अनेन मन्त्रेणासन्दीमासनार्थ मुपकल्पिता माचार्योनुमन्त्रयते । आसन्दीग्रहणमुपलक्षणार्थमाचार्यग्रहणं च तेन राज्ञे सिंहासनसदृशं प्रदीयते । अन्यस्तु एतत्सूत्रं केचिन्न पठन्ति । यदाहुः पठ्यते तदार्थप्राप्तत्वादासने स्थाता ( स्याताम् । घ. । स्थानायेति । ग. च. ) ॥ ९ ॥

आचमनीयविष्टरौ सकृद् ब्रूयान्त्रिरिति विष्टरासीनायेति वचनान्नैव भो इत्याह नम आर्षेयायेति च । नैव भो शब्देन च पाणिना संस्पृशति पश्चात्तद् गृह्णातीत्येव ॥ १०–११–१२ ॥

पाद्येन पादौ प्रक्षालयेत् पाद्येन पादप्रक्षालनं चात्र क्रियमाणं प्रग्रहीता दक्षिणमग्रे प्रक्षालयेत् । तथा च स्मृत्यन्तरम् (आ, गृ. १३,५)–"दक्षिणमग्रे ब्राह्मणाय प्रयच्छेत् सव्यं शूद्राय" इति सावित्रेणासमानकर्तृकाः क्रिया अवसाय्यौदृथाप्य अभ्यधि पात्रस्योपरि सर्वतोऽभ्युद्दिशति आभिमुख्येन पुरस्तादारभ्य प्रदक्षिणं प्रादेशेन उर्ध्वं दिशति मधुपर्कदेवतायै मन्त्रवर्णात् । रुद्राख्यायै सृजति । उपरिष्टाच्च । अन्यस्तु ॐ नमो रुद्राय पात्रसद इति प्रतिष्ठापने च मन्त्रगुणभूतत्वाच्च मन्त्रस्यावृत्तिः । उद्देशनं तूष्णीं प्रतिदिशम् ॥ तथा च

---

१ त्यपि, ग. च. ।

भ्युद्दिशति ॥ १३ ॥ मधुवाता ऋतायत इति तिसृभिरङ्गुल्या प्रदक्षिणं प्रत्यृचं त्रिरायौति ॥ १४ ॥ अमृतोपस्तरणमसीत्युपस्तरति ॥ १५ ॥ सत्यं यशः श्रीर्मयि श्रीः श्रयतामिति मधुपर्कं त्रिः प्राश्नाति ॥ १६ ॥ अमृतापिधानमसीत्याचामति ॥ १७ ॥ सुहृदेऽवशिष्टं प्रयच्छति ॥ १८ ॥ असि पाणिर्गौ प्राह ॥ १९ हतो मे पाप्मा पाप्मानं मे हत ओँ कुरुत इति प्रेष्यति ॥ २० ॥ चतुरो ब्राह्मणान्नानागोत्रान् भोजयते ॥ २१ ॥ पश्वङ्गं पायसं वा कारयेन्नामांसो मधुपर्क इति श्रुतिः ॥ २२ ॥

---

स्मृत्यन्तरे (आश्व.गृ.अ. १-२४-१४) नानादैवमन्त्रवर्णाद्वसवस्त्वा गायत्रेण छन्दसा भक्षयित्वादिभिर्मन्त्रैरिह तूष्णीं प्रतिदिशन्तीति विशेषः ॥ १३ ॥

मधुवाता ऋतायत इति आह्वालयति अमृतो० सत्यम् । अमृतापिधा० । उपस्तरणमपोशानं प्राशनाचमने प्रसिद्धे । कर्मत्रयं त्रिभिः सूत्रैः समन्त्रक मुक्तम् ॥ १४-१५-१६-१७ ॥

सुहृदेऽवशिष्टं प्रयच्छेत् नावश्यमवशेषयन् सुहृदसंनिधानेनावशेषणं स्यात्तदा सुहृत्प्रयुक्तं स्यात् । सुहृदवशिष्टं प्राश्नीयादिति वक्तव्ये प्रयच्छति ग्रहणं सहैव पात्रेण प्रदानार्थम् ॥ १८ ॥

असि पाणिरिति । खड्गहस्तो गौरिति त्रिराहेत्यर्थः । हतो मे पाप्मा पाप्मानं मे हतों(तओं)कुरुतेति प्रैषो यदि कारयेत् ॥ १९-२० ॥

चत्वारो नानागोत्राश्चत्वारोऽन्ये । ब्राह्मणान् भोजयित्वान्य आशनीयः पञ्चमः सुहृत्वाच्चावशिष्टा युक्तम् ॥ २१ ॥

पश्वङ्ग—पश्वङ्गं छागस्य कारयेत् क्रीणापयेदित्यर्थः । तथा मनूक्तं(५-३२) क्रीत्वा स्वयं वेत्यादि । पायसं कारयेच्च क्षीरिकां रन्धयेद्वेति द्विविकासानूयन्ध्यापया(य)त्यावन्न प्रतिनिधिर्नामांसो यत एवंविधा श्रुतिरमांसो मधुपर्को न भवति ततो पश्वङ्गं ( पायसं ) वा कारयेदित्युक्तमित्यभिप्रायः ॥ २२ ॥

---

१-२-० ग. घ. । २-१-० द. । २ सु. क. ग. च. । ९-६ ० घ. ।

यद्युत्सृजेन्माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः। प्रनुवोचं चिकितुषे जनाय मागा मनागा मदितिं वधिष्ट। भूर्भुवः स्वरोमुत्सृजत तृणान्यत्तु ॥ २३ ॥ अथालंकरणमलंकरणमसि सर्वस्मा अलं मे भूयासम् ॥ २४ ॥ प्राणापानौ मे तर्पय समान व्यानौ मे तर्पय उदानरूपे मे तर्पय सुचक्षा अह मक्षिभ्यां भूयासं सुवर्चा मुखेन सुश्रुत्कर्णाभ्यां भूयासमिति यथालिङ्गमङ्गानि सꣳस्पृशति ॥ २५ ॥ अथ गन्धोत्सादने वाससी ॥ २६ ॥ परिधास्ये यशो धास्ये दीर्घायुत्वाय जरदष्टिरस्तु

शतं जीवेमशरदः पुरूची रायस्पोषमभिसꣳव्ययिष्ये
यशसा माऽद्यावा पृथिवी यशसेन्द्रा बृहस्पती
यशो भगश्च मारिषद्यशो मा प्रति मुच्यताम्
इत्यहतꣳ—वासः परिधत्ते ॥ २७ ॥

---

यद्युत्सृजेत्। यदि शब्दो भौतानुवादो मन्त्रवर्णान्मागामनागामदितिं वधिष्टेत्यस्मात्। तेनाष्टकादावुत्सर्ग-सिद्धिः। अन्यस्त्वाह-नावेदविद् भुञ्जीतेति श्रुतिरिति तत्रोक्ता यदि गवा पशुना वा कुर्वीतेत्युक्तं तेन व्यवस्थितम्। किमुत्सर्गानुत्सर्गौ विकल्पितौ तौ च युगापेक्षया द्रष्टव्यौ ॥ २३ ॥

अलंकरण मसीत्यनेनालंकरणं प्रतिवध्नाति ॥ २४ ॥

प्राणापानौ मे तर्पयेति यथालिङ्गं गात्रस्पर्शम् ॥ २५ ॥

गन्धोत्सादने। गन्धश्चन्दनादि। उत्सादन मुद्वर्त्तनम् पक्वतैलादिना। केचिदुत्सादनं पूर्वमिच्छन्ति तेषामलंकरणेनापि पूर्वं स्यात्। अन्यस्तु गन्धाच्छादने गन्धो विज्ञेयः। आच्छादनं च परिधान मत एवाह अहतं वासः परिधत्त इति। तदुक्तं तस्य स्नानात्पूर्वं केचिन्मधुपर्कप्राशने कृते दानेऽधिकारः परिधानस्येत्यनेन परिधत्ते। एकवचनमतन्त्रं तेन द्वे वाससी भवतः ॥ २६–२७ ॥

---

१–२–० ख.। ( )क.ग.घ.। ३ म्र,क घ.। ४ सा. ग.। ५ नेति, ग. च.।

कुमार्याः प्रमदने भगमर्यमणं पूषणं त्वष्टारमिति यजति ॥ २८ ॥ प्राक्स्विष्टकृतश्चतस्रो अविधवा नन्दीरुपवादयन्ति ॥ २९ ॥ अभ्यन्तरे कौतुके देवपत्नीर्जयति ॥ ३० ॥ इति नवमः खण्डः ॥ ९ ॥

कुमार्याः प्रमदने प्रमदनं क्रीडास्थानं यत्र क्रीडा यदा क्रीडा तदा निमित्त सप्तमी। अन्यस्त्वाह तेन क्रीडायाः प्राग्यागो वरणं पश्चाद्विज्ञेयम्। तथा च कृत्तिका-स्वाति-पूर्वैर्वरण मुक्तम्। लोके च वरणं दृश्यते तेन कः क्रमः पूर्व वरणं ततो यागस्ततस्तैलाभ्यञ्जनादि। ततः पुण्ये लग्ने दानं विवाहे भगार्यमादयो देवाः प्रधानस्थाने याज्येन यजति ॥ २८ ॥

प्राक्स्विष्टकृतो नन्दीरिति वाद्यविशेषः। अङ्गसंयुक्तं गेयं वा अविधर्वा कारयेत् ॥ २९ ॥

अभ्यन्तरे कौतुकं वस्त्राद्यलंकृतस्थानं रहःस्थानं वा प्रधानस्थाने देवपत्नीभ्यः स्वाहेत्याहुतिः। सिनीवालीप्रभृतिकुव्हन्ता देवपत्नीर्यजतीत्यन्ये। अन्यस्तु राकादयो देवपत्न्यो ज्ञेयाः। अन्यस्तु कस्यास्मिन्यागेऽधिकारः। दातुरुत प्रतिग्रहीतुः। तत्र न प्रतिग्रहीतुरधिकारः कुतः। वधूसंस्कारार्थं तावत् कर्म यथा वैश्वानरेष्टिः पुत्रे जाते एवं चेद्यथा पुत्रसंस्कार इष्टिर्जातकादि च यथा पिता करोति तथाऽयं यागो विवाहश्च वक्ष्यमाणो वधूसंस्काराय पिता कुर्यात्। यथापि पुत्रस्यानुपयोक्ष्यमाणस्य दृष्टादृष्टकालसाधकस्य गत इष्ट्यादि संस्कारस्य कर्त्तुर्यागादियोगे पाणिग्रहणादिदं यदि तु नानुतिष्ठन्ति केचिदिष्टिरयं च यागस्तत् किं कुर्मः कमुपलभेमहि शास्त्रार्थस्तावद्वर्णितोऽस्माभिरित्यलमतिप्रसङ्गेन ॥ ३० ॥

॥ इति पूरणव्याख्याने नवमः खण्डः ॥

---

१ यंजति, क. घ.। २ नार्थ, ग. च.। ३ गम, क. ग. च.। ४ वाः, घ.। ५-६-० घ.।

# दशमः खण्डः

प्रागुदक्त्रं लक्षणमुद्धृत्यावोक्ष्य स्थण्डिलं गोमयेनोपलिप्य मण्डलं चतुरस्रं वा अग्निं निर्मथ्याभिमुखं प्रणयेत् तत्र ब्रह्मोपवेशनम् ॥ १ ॥

---

प्रागुद...प्रणयेत् प्राच्यः पञ्च यत्र लेखा उदीची चैका तत्प्रागुदक्-लक्षणं कर्तव्यं स्थण्डिलं गोमयेनोपलिप्य मण्डलं चतुरस्रं वा स्थण्डिलमाहार्यं मृदा कार्यम् । अन्यस्तु वेदेरुपलक्षणार्थं तथा चोक्तं षडङ्गुला इत्यादौ तेन वर्तुलं स्थण्डिलं ज्ञेयम् । गोमयग्रहणं केवलमृत्तिकानिवृत्त्यर्थं माहिषनिवृत्त्यर्थं च । किमाकारं लिम्पेत् स्थण्डिलमित्याह—मण्डलं चतुरस्रं चतुःकोणं तुल्यो विकल्पः । अग्निं माथित्वाऽऽत्मनोऽभिमुखं प्रणयनम् । प्राङ्मुखस्य संभवान् न प्रत्यङ्मुखस्य वचनात् । इह मन्थनदर्शनान्नावश्यं जन्माग्निर्वार्यत इति गम्यते । पुत्रे जाते वरं ददात्यरणिभ्यामग्निमुपक्रम्य तस्मिन्भार्यामुद्वहेदिति पाक्षिकम् पारिशेषिकत्वम् । अपरे तु माथित्वेति वक्तव्ये निर्मथ्यग्रहणमाहिताग्नेः पुनर्विवाहे निर्मथ्याग्निं प्रणयेत् । निर्मथ्यसंज्ञानार्थत्वान्निर्मथ्यग्रहणस्य । तदसत् । मथित्वा निर्मथ्यशब्दयोर्गुरुलाघवकृतविशेषाभावात्समानार्थत्वे च । प्रत्युत निर्मथ्यशब्दो मथित्वाशब्दाल्लघीयान्नचाहिताग्नेः पुनर्विवाहेऽधिकारोऽस्ति । अधर्मवोर्द्-(अधर्मोवोर्ध्वं)माधानात्तत्कर्मसमवायाभि(?)कर्मभिरवचनात्तथा च स्मृतिः-धर्म प्रजापन्नेदारे नान्यां कुर्वीतान्यतरापाये अग्न्याधेयादिति । न च निर्मथ्यग्रहणं संज्ञानार्थं माहिताग्नेर्विवाहस्या(स्य)शालाग्निकरणे अग्निं निर्मथ्येत्यत्रापि प्रसङ्गा-त्ततश्चाहिताग्नेरेवशालाग्निकरणस्या निर्मथ्यशब्दात्तत्राग्निहोत्रारणिभ्यां निर्म-थ्यास्मान्न कर्माधिकारः । तेन च यूपाहुतिदर्शनमुपपन्नं स्मार्तकर्मणः । यूपाहुतौ श्रौतत्वात् । आहवनीयेऽपि च प्रसङ्गात् । अपि च निर्मथ्याहवनीययोर्दीक्षि तस्यैव सतो विकल्पितत्वात् । यूपाहुतिदर्शनात् । न दीक्षितस्यैव निर्मथ्य विकल्पो नाग्निहोत्रिमात्रस्य । न हि दीक्षितस्याग्नौ जुह्वतीति वचनात् ॥१॥

---

१—४—० प. । २ बोध्यबाध, क. । ३—० ग. च. ।

दर्भाणां पवित्रे मन्त्रवदुत्पाद्येमᳬस्तोम मर्हत इत्यग्निं परिसमुह्य पर्युक्ष्य परिस्तीर्य पश्चादग्नेरेकवद्बर्हिःस्तृणाति ॥ २ ॥ उदक्प्राक्तूलान्दर्भान्प्रकृष्य दक्षिणांस्तथोत्तरानग्रेणाग्निं दक्षिणैरुत्तरानवस्तृणाति ॥ ३ ॥ दक्षिणतोऽग्नेर्ब्रह्मणे सᳬस्तृणात्यपरᳬ यजमानाय पश्चार्द्धे पत्न्यै अपरमपरᳬशाखोदकधारयोर्लाजा धार्याश्च पश्चाद्युगधारस्य च ॥ ४ ॥ स्योना पृथिवि भवेत्येतयावस्थाप्य शमीमयीः शम्याः कृत्वान्तर्गोष्ठेऽग्निमुपसमाधाय भर्त्ता भार्यामभ्युदानयति ॥ ५ ॥ वाससोन्ते गृहीत्वा—

दर्भाणां बर्हिस्तृणाति निगदसिद्धम् ॥ २-३ ॥

दक्षिणतोऽस्यैदर्भमूलकमित्यर्थः । अपरं यजमानाय पश्चाद्दक्षिणतोऽग्नेरेव पश्चार्द्धे षष्ठ्यन्ताग्निशब्दानुवृत्तेर्दक्षिणतोऽग्नेरित्यनुवर्त्य दक्षिणतः पश्चादपरमिति संबन्धनीयम् । अन्यस्तु एते सूत्रे स्तः शाखोदकधारयोर्ब्रह्मयजमानपत्नीनां दक्षिणतः शाखोदकधारयोरपरमपरं स्तृणाति शाखाबहुपदेत्यादि गुणे कस्याधारणमात्रमुदकुम्भमार्जनार्थं च लाजाधार्याश्च लाजा धारयतीति लाजाधारी स्त्री अविधवा च तौ पश्चाद्युगधारस्य च युगं धारयतीति युगधारः। लाजाधारीग्रहणं पाक्षिकम् । यदैतस्मिन्नेव तन्त्रे लाजाः स्युस्तदा संस्तृणीयात् ॥ ४ ॥

स्योना पृथिवी । अनया अवस्थापनं सर्वेषां शाखादि-धारिणां युगधारस्य चानन्तर्यात् । अवस्थापनं प्राङ्मुखोऽवतिष्ठत इति प्रयोगदर्शनात् । शमीमयी वेतुः(?) पदमिति । यदि प्रथमकृता शमीमयी(ः)शम्याः स्युर्नान्याः कारयेत् । अन्तरगोष्ठग्रहणमन्तर्गोष्ठ एवोद्वाहो यथा स्यात् । उपसमाधानं कृत्वेत्यर्थः । भर्तृग्रहणं विस्पष्टार्थं भार्यासंबन्धिलब्धत्वात्पूर्वक्रिययोर्वाध्वर्युकर्तृकत्वार्थम् ॥ ५ ॥

अभिपरिगृह्य बाहुभ्यामिति अभ्युदानयेदुत्तरेण रथं वाऽनो वा अनः शकटम् । तुल्यो विकल्पः । उत्तरेण देशेन तयोर्गत्वेत्यर्थः । अन्तरेण मध्येन

१ वी, क. ग. च । २-३-० घ. । ४ तौ, ग. च. । ५ वा, क. ग. च. । ६ कथं, ग. च. । ७ त, ग. च. । ८-९-० घ. ।

' अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे '

इत्यभिपरिगृह्याभ्युदानयति ॥ ६ ॥ उत्तरेण रथं वाऽनो वाऽनुपरिक्रम्यान्तरेण ज्वलनवहनावतिक्रम्य दक्षिणस्यां धुर्यन्तरम्य युगतन्मनोऽग्रस्तात्कन्यामवस्थाप्य शम्यामुत्कृष्य हिरण्यमन्तर्धाय हिरण्यवर्णाः शुचय इति तिसृभिरद्भिरभिषिच्य [illegible] नेति प्रेरयति ॥७॥ अथास्यै वासः प्रयच्छति-

युक्तो वह यदाकूतमिति द्वाभ्यामग्निं संयोजयित्वा नक्षत्रमिष्ट्वा नक्षत्रदेवतां यजेत्तिथिं तिथिदेवतामृतुमृतुदेवतां च ॥ ९ ॥

सोमोददद्गन्धर्वाय गन्धर्वो ददद्ग्नये ।
रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम्
अग्निरस्याः प्रथमो जातवेदाः
सोऽस्याः प्रजा मुञ्चतु मृत्युपाशात् ।
तदिदं राजा वरुणोऽनुमन्यताम् ।
यथेदं स्त्रीपौत्रमगन्म रुद्रियाय स्वाहा—

इति हिरण्यगर्भ इत्यष्टाभिः प्रत्यृचमाज्याहुतीर्जुहुयात् ॥१०॥ येन च कर्मणेच्छेत्तत्र च जयान् जुहुयात् जयानां च श्रुतिस्तां यथोक्ताम् । आकूत्यै त्वा स्वाहा, भूत्यै त्वा स्वाहा, प्रयुजे त्वा स्वाहा, नभसे त्वा स्वाहा, अर्यम्णे त्वा स्वाहा, समृध्यै त्वा स्वाहा, जयायै त्वा स्वाहा, कामाय त्वा स्वाहेत्यृचा स्तोमं

---

'युक्तो वह' युक्तो वह जातवेद इति द्वे प्रकरण ऋचत्वात् । यथा प्राङासीनोन्तरेण जानुनी आघाराज्यभागा वित्यत्रान्तराजानुत्वं प्राङासीनता च प्रकरणार्था एवं मन्त्रारम्भः । युक्तो वह निगद व्याख्यातम् । सोमो दद् द्वाभ्यामृग्भ्या मेकाहुतिरन्ते स्वाहाकारात् ॥ ९ ॥

हिरण्य निगदव्याख्यातम् ॥ १० ॥

येन च—येन कर्मणाऽर्थसिद्धिमिच्छति तत्र जयान् जुहोति । सर्वत्रानेन वाक्येन जयानां विधानम् । जयानां यथोक्तग्रहणादाकूताय स्वाहेति दर्शयति नत्वाकूतं च स्वाहेति यथा शाखान्तरेषु । अथवा जयानां श्रुतिरित्यनेनेति तदाह—भ्रातृव्यवानपि जुहुयादित्यर्थः । आकूत्यै त्वा बृहद्गायत्रवर्तनिः स्वाहेति श्रुतिः । एभिर्मन्त्रैरवरा आहुतीर्जुहुयादित्यर्थः । प्रजापतये स्वाहेति

---

१—२ ० घ । २ सान्तनेषु—क. ।

प्रजापतय इति च ॥११॥ शुचिः प्रत्यङ्ङुपयन्ता ताᳪं समीक्षस्वेत्याह ॥ १२ ॥ तस्याᳪं समीक्षमाणायां जपति—

मम व्रते ते हृदयं दधातु मम चित्तमनुचित्तं तेऽस्तु
मम वाचमेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यम्—

इति ॥१३॥ का नामासीत्याह ॥१४॥ नामधेये प्रोक्ते देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याᳪं हस्तं गृह्णाम्यसाविति हस्तं गृह्णन्नाम गृह्णाति । प्राङ्मुख्याः प्रत्यङ्मुख ऊर्ध्वस्तिष्ठन्नासीनाया दक्षिण मुत्तानं दक्षिणेन नीचारिक्त मरिक्तेन—

यथेन्द्रोहस्तमग्रहीत् सविता वरुणो भगः ।
गृभ्णामि ते सौ भगत्वाय हस्तं मया पत्या जरदष्टिर्यथा सत् ॥
भगो अर्यमा सविता पुरन्धि र्मह्यं त्वादुर्गार्हपत्याय देवाः ।

---

चतुर्थ्यन्तेन प्रजापतिशब्देन जुहुयात् । प्रजापतिरिति पाठे प्रजापते नहीत्यनया ऋचा स्वाहाकारान्तया ॥ ११ ॥

शुचिः पुरस्तात्प्रत्यङ्ङुपयन्ता तां समीक्षस्वेत्याह । उपयन्ता पुरस्तात्कन्यायाः शुचिर्मनसो वैकार्यान् ममेयं कामोपभोगाय स्यादित्यतः प्रजापत्याहुतेर्मनसो अस्मिन्नवसरे चित्तस्खलनादशुचिः स्यादिति शुचि रित्युक्तम् । तथा यतेत यथा मनो न स्खलेदित्यर्थः । ब्रह्मचर्यात्कान्तासन्निधौ स्यादिन्द्रियात्मता तस्मात् शुचित्ववचनं युक्तम् । प्रत्यङ्मुखः समीक्षस्व मामिति ब्रूयात्ताम् । एतस्यां तस्यां पश्यन्त्यां मम व्रते इति ॥ १३ ॥

का नामासीति नामधेयं पृच्छति । निर्वृत्तेऽपि नामधेये पुनः प्रश्नोऽप्रधाननामधेयार्थानां नामधेये हस्तं गृह्णन्नाम गृह्णाति । प्रोक्ते नामधेये देवस्य चेति हस्तं गृह्णाति । हस्तं गृह्णन्नाम गृह्णाति । असौ इति संबुध्यन्तंप्रयोगात् । युष्मदः कथमित्याह । प्राङ्मुखस्यातिरिक्तेन निगदसिद्धम् ।

---

१ मा. ग. च. । २–३ ० घ. । ४–५ ० घ. । ६–७ ० घ. । ८ खा. क. । स्या अरिक्तेन घ. ।

याग्रे वाक् समवदत पुरा देवासुरेभ्यः ।
तामद्य गाथां गास्यामो या स्त्रीणामुत्तमं मनः ।
सरस्वति प्रेदमव सुभगे वाजिनीवति
यां त्वा विश्वस्य भूतस्य भव्यस्य प्रगायाम्यस्याग्रतः ।
अमोह मस्मि सा त्वं सा त्वमस्याप्यमोहम् ॥
द्यौ रहं पृथिवी त्वमृक् त्वमसि सामाऽहम्
रेतोह मस्मि रेतो धत्तम् ॥
ता एव विवहावहै पुꣳसे पुत्राय कर्त्तवै ।
श्रीये पुत्राय वेधवै ॥ रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ॥
इति ॥ १५ ॥ अभिदक्षिणमानीयाग्नेः पश्चात्—
एतमश्मानमातिष्ठतमश्मेव युवां स्थिरौ भवतम्
कृण्वन्तु विश्वे देवा आयुर्वां शरदः शतम् ।
इति दक्षिणाभ्यां पद्भ्यामश्मानमास्थापयति ॥ १६ ॥
यथेन्द्रः सहेन्द्राण्या अवारुहद् गन्धमादनात् ।
एवं त्वमस्मादश्मनो अवरोह सह पत्न्या ॥

---

यथेन्द्रो हस्तमित्यादि सुप्रजास्त्वायेत्यन्तं मन्त्रगणं जपतीति संबन्धः ॥ १४ ॥ १५ ॥

अभिदक्षि अग्नेः पश्चादात्मनो दक्षिण मेता मानीयेति । अथ कर्तृकाः पुनः । अन्यस्तु कश्चिदश्मानमग्नेः प्रदक्षिणमानीयाग्नेरेव पश्चात्स्थापयति । एतमश्मानमनेन मन्त्रेण दक्षिणाभ्यां पद्भ्यां दम्पती अश्मान मास्थापयति । अश्मानमुपरिस्थापयन्तीत्यर्थः । अर्थाद्दम्पत्योरेव पादौ । अन्यस्तु (?) केचिद् द्विवचनमास्थापयत इति पठन्ति । तद्दम्पत्योर्विवक्षायां ज्ञेयम् । तदा चाक्रामत इत्यर्थः ॥ १६ ॥

आरोहस्व समे पादौ प्र पूठ्यायुष्मती कन्ये पुत्रवती भव ।
इत्येवं द्विरास्थापयति ॥ १७ ॥ चतुः परिणयति ॥ १८ ॥ समितं संकल्पेथामिति पर्याये पर्याये ब्रह्मा ब्रह्मजपं जपेत् ॥ १९ ॥

इति दशमः खण्डः ॥ १० ॥

---

यथेन्द्रः सहेन्द्राः–दम्पत्योरेव मन्त्रवर्णादवरोपयति द्विरास्थापयति तेन च मन्त्रेण । अवरोपयति चोत्तरेण ॥ १७ ॥

चतुः परिणयति अग्निं पर्यन्तीत्यर्थः । एतच्च परिणयनं लाजहोमेषु चतुर्षु पुरासमाचारात् ॥ १८ ॥

समितं संकल्पेथामिति पर्याये पर्याये ब्रह्मा ब्रह्मजपं जपेत् । पर्याये पर्याये परिणयने परिणयने इत्यर्थः । एतस्मात्पूर्वं स्विष्टकृदन्ते सशाखमादधातीति केचित्पठन्ति । तस्यार्थे लाजहोमान्ते सकृत्स्विष्टकृद्भवतीत्यन्य आह ॥ १९ ॥

॥ इति पूरणव्याख्याने दशमः खण्डः ॥

# एकादशः खण्डः

ततो यथार्थं कर्मसन्निपातो विज्ञेयः ॥ १ ॥

उक्तं च लाजा धार्या आसनं लाजहोमान्ते सकृत् स्विष्टकृल्लाजहोमपक्ष एतस्मिन्नेवावसरेऽस्मात्स्थापनानन्तरं लाजहोमः। स्यादिति वचनं क्रमार्थं ततो यथार्थं कर्मसन्निपातो विज्ञेयः। तत इति विप्सायामन्यत्राप्युद्वाहादयं प्रवर्तत इति ततस्ततो यथार्थं यस्य कर्मणो यत्रार्थः प्रयोजनं तस्य तत्र सन्नि-पातोऽनुष्ठानं वेदितव्यम्। यथा लाजाधार्यै चासनमेकतन्त्रेऽग्निप्रकटनानन्तर द्विरास्थापनान्ते लाजनिर्वपणं तथार्यम्णोऽग्नये इत्यत्र निर्वपणलिङ्गाद् द्विरास्था-पनानन्तरं लाजनिर्वपणं तन्त्रद्वयं च लक्ष्यते। तत्र द्वितीये तन्त्रे लाजाधार्यासनं प्रयोजनमतश्च पूर्वं तन्त्रं द्विरास्थापनान्तं परिसमाप्य पूर्णपात्रं दत्वा लाजनि-र्वपणादि द्वितीयं तन्त्रं प्रारभेत। अन्यस्तु नायमर्थो न्याय्यमि(इ)ति। तथा चालूनविशीर्णमिवं प्रतिभाति। यत एक तन्त्रत्वमुक्त्वा पृथक् तन्त्रत्वमुक्तम्। तस्मादयमर्थो न्याय्य इति ब्रूमः। ततो यथार्थमिति अर्थमर्थं प्रति यथार्थं कर्मणां सन्निपातो विज्ञेयो बोद्धव्यो यथा संस्तरकाले लाजाधार्याः संस्तरणं तथाज्यनिर्वापकाले लाजनिर्वपणं तथा पात्राणां स्रुक्स्रुवादीनां प्रयोगकाले शूर्पाञ्जनेषीकादीनां प्रयोगः। एवं प्रकारः कर्मणां सन्निपातो विज्ञेयो ज्ञातव्यः। यदप्यश्मास्थापनान्तं समाप्य पूर्णपात्रं तु ब्रूयात्। लाजानिर्व-पणादिना द्वितीयं तन्त्रं तदप्ययुक्तम्। यस्मात्पूर्वकर्मणैव समाप्यते न च तत्र दक्षिणा किं तर्हि वक्ष्यति वरो दक्षिणेति तस्मादुभे एते कर्मणी समान तन्त्रे आज्यहोमे लाजाहोमश्च। तथा च पूर्वतन्त्रं प्रागाज्यहोमानुक्रमपरं हि लाजहोमादनन्तरम्। अन्यच्च अथैनान्युपकल्पयतीत्युपक्रम्य शूर्पं लाजा इषीका मश्मान मञ्जनमिति शूर्पादिभिः सहाश्मन उपकल्पनमुक्तम्। तदेक तन्त्रत्व उपपद्यते न भिन्नतन्त्रत्वे तस्मात्पूर्वापरमभिन्नमीक्ष्यैकतन्त्रत्वमाचार्यस्याभि-प्रेतम्। वेहुस (श) इति मन्याम(हे)तेन तत्र पूर्णपात्रस्य प्रकृतिवत्प्राप्तिरेव तेन

१—श्मा घ, । २ , ग. च. । ३ प्रणय. ग. घ. च. । ४ न, ग. च. । ५ य. क ग. च. । ६ ति. क. । ७—१२—० घ । ८ क्ल, क. । ९—१०—० क. । ११ चा, ग च. ।

अर्यम्णोऽग्नये पूष्णोऽग्नये वरुणाय च व्रीहीन् यवान्वाऽभि-निरूप्य प्रोक्ष्य लाजा भृज्जति ॥ २ ॥ मात्रे प्रयच्छति स जाताया अविधवायै ॥ ३ ॥ अथास्यै द्वितीयं वासः प्रयच्छति तेनैव मन्त्रेण ॥ ४ ॥ दर्भरज्वा इन्द्राण्याः संनहनमित्यन्तौ समायम्य पुमांसं ग्रन्थिं बध्नाति ॥ ५ ॥

सं त्वा नह्यामि पयसा पृथिव्याः संत्वा नह्याम्यद्भिरोषधीभिः ।
सं त्वा नह्यामि प्रजया धनेन सा सन्नद्धा सुनुहि भागधेयम् ।

इत्यन्तरतो वस्त्रस्य योक्त्रेण कन्यां संनह्यते ॥ ६ ॥

---

स्थालीपाकेष्वतिदेशाद् अत्रापि प्रकृतिवत्प्राप्तिस्तथापि प्रत्यक्ष-शिष्टया-वरया साध्यते तस्मादलं बहुनोक्तेन प्रकृतमभिधीयते[२] ॥ १ ॥

अर्यम्णे अग्नये ऽर्यमादिदेवताभ्यः प्रतिपदमग्नये इत्यनुषजेत्[३] एतस्यां सामगायेतिवत् । व्रीहीन् यवान्वेति तुल्यो विकल्पः । प्रोक्ष्य लाजा भृज्जतीति लाजाग्रहणमुपलक्षणं धानानां पक्षे यवानां प्रकृतत्वात् ॥ २ ॥

मात्रे प्रयच्छति कन्यामात्रे तस्या गृहे विवाहदर्शनात् । सजातायै मात्रे अविधवाया अपि प्रयच्छेत् । अन्यस्तु मातुरविधवायै सजातायै अन्यस्यै वा अविधवायै यथा यदि सोमं न विन्देत्पूतिकामभिषुणुयादिति यस्मादन्यस्यै अविधवायै न मात्रे विधवायै प्रयच्छेत् ॥ ३ ॥

अथास्यै द्वितीयं वासः प्रयच्छति तेनैव मन्त्रेण लाजप्रदाना-नन्तरमिदं[४] द्वितीयवस्त्रदानं कन्यायाः उक्तं तेन मन्त्रेण ॥ ४ ॥

दर्भरज्वा इन्द्राण्याः संनहनमिति मन्त्रेण दर्भरज्वा अन्तौ प्रान्ते एकीकृत्य ग्रन्थिं बध्नात्याचार्यः ॥ ५ ॥

सं त्वा नह्यामि मन्त्रेण योक्त्रेण कन्यां संनह्यते वस्त्रस्य मध्ये वस्त्रसं-प्रदाने दर्भरज्वा संनहनम् ॥ ६ ॥

---

१—२—० घ. । ३ पद्यते, ग. च. । ४ धा, क. । ५ न्द्राण्याः संनहनमिति सन्नह्येत रसनावर्जनमाज्यनिर्वपणकाले लाजानिर्वपणं कार्यं पश्चादभृज्यमानासु पर्यग्नि-करणं संप्रदाने दर्भरज्वा संनहनम् इति ग. च. पाठ ।

अथैनान्युपकल्पयते शूर्पं लाजा इषीका अश्मान माञ्जनम् ॥ ७ ॥ चतसृभिर्दर्भेषीकाभिः शरेषीकाभिर्वा समुञ्जाभिः सतूलाभिरित्येकैकया त्रैककुभस्याञ्जनस्य संनिकृष्य वृत्रस्यासि कनीनिकेति भर्त्तुर्दक्षिणमक्षि त्रिः प्रथम माङ्क्ते तथा परं तथा पत्न्याः शेषेण तूष्णीम् ॥ ८ ॥ दिशि शलाकाः प्रविध्यति यानि रक्षांऽस्यभितो व्रजन्त्यस्या वध्वा अग्निसकाश मागच्छन्त्याः तेषामहं प्रतिविध्यामि चक्षुः स्वस्ति वध्वै भूतपतिर्दधातु ॥ इति ॥ ९ ॥

लाजाः पश्चादग्नेरुपसाद्य शमीपर्णैः सऽंयुज्य शूर्पे समं चतु-

---

'शूर्पादीनामुपकल्पनम्' शूर्पलाजादेरिषीकास्तरणपर्यन्तस्य न आज्यावेक्षणमधिश्रृत्योपाधिश्रृत्य पश्चात् सादनमुत्पवनं यजमानावेक्षणं पश्चादग्नेर्लाजावसादनं शमीपत्रैः संसर्जनं चतुर्धाविभजनमग्रेण पर्याहरणं लाजाधार्यै प्रधानमिध्माधान मन्वारभ्याज्यभागादि प्रधानस्थाने लाजाहोमः । अन्यस्तु भिन्नतन्त्रैं एतदुक्तं च तत्कथं तस्मादयं मन्त्र क्रमः प्रथमं लक्षणं कृत्वाऽग्निप्रणयनं ततो दर्भपवित्रकरणं ततः परिसमूहनादिस्तरणान्तं ब्रह्मसंस्तरणादि तस्मिन्नेवकाले लाजाधार्यास्तरणं ततस्तेषामवस्थापनं ततः स्रुक्स्रुवादि पात्रप्रयोगस्ततो लाजानिर्वपण प्रोक्षण भर्जनादयस्ततः शूर्पादीनामुपकल्पनं तत आज्यग्रहणादि समिदाधानान्तं ततोऽन्वारभ्याघारान्यभागहोमादि ऋचास्तोममित्यन्तं ततः शुचिरित्यादि हस्तग्रहणान्तं ततोऽश्मास्थापन तच्च द्विः पुरस्ताल्लाजाहोमादुपरिष्टाच्च द्विरिति वचनात् ततो द्वितीयवासःप्रदानं तेनैव मन्त्रेण दर्भरज्वेन्द्राण्याः संहनन दर्भग्रहणं मुञ्जादि–निवृत्यर्थं ततः । आञ्जनादिषीकापर्यसनान्तं ततो लाजाः पश्चादग्नेरुपसादनम् । एकोन (?) अर्धमुपकल्पनमुत्तरतोऽग्ने रुपसादनम् । ततोऽग्रेणाग्निं पर्याहृत्य लाजाधार्यै प्रदानं ततो लाजाहोमोऽर्यमादीनां तिसृणां देवतानां यतः कामेन चतुर्थं स्विष्टकृतमिति वक्ष्यति निर्वपणं निस्त्रणामुक्तं ततोऽभ्यातानादि होम स्ततः कामाय स्विष्टकृतं चतुः परिणयनं च चतुरिति वचनात् परिणीय

---

१ अञ्जनादि इषी. ग च. । २ तैः. ग. च. । ३ के. ग. च. ।
४ जयादितानादि. ग. च. ।

र्धा विभज्याग्रेणाग्निं पर्याहृत्य लाजाधार्यै प्रयच्छति ॥१०॥ लाजा भ्राता ब्रह्मचारी वाञ्जलिनाञ्जल्योरावपति ॥११॥ उपस्तरणाभिघारणैः संपातं ता अविच्छिन्नैर्जुहुतः ।

अर्यमणं नु देवं कन्या अग्निमयक्षत
सोऽस्मान्देवोऽर्यमा प्रेतो मुञ्चातु मामुतः स्वाहा ॥
तुभ्यमग्ने पर्यवहन्त्सूर्यां वहतुना सह ।
पुनः पतिभ्यो जायां दा अग्नेः प्रजया सह ॥
पुनः पत्नी मग्निरदादायुषा सह वर्चसा ।
दीर्घायुरस्या यः पतिर्जीवाति शरदः शतम् ॥
इयं नार्युपब्रूतेऽग्नौ लाजानावपन्तिका ।
दीर्घायुरस्तु मे पतिरेधन्तां ज्ञातयो ममेति ॥ १२ ॥

एवं पूषणं नु देवं वरुणं नु देवम् ॥ १३ ॥ येन द्यौ रुग्रेत्यादय उद्वाहे होमा जयाभ्याताना: संततिहोमा राष्ट्रभृतश्च ॥ १४ ॥

---

परिणीय लाजहोमः परिणयने परिणयने च ब्रह्मजपः । अत्र च हस्तग्रहणादूर्ध्वं यत्कर्म तत्स्वयं कर्तृत्वे ब्रह्मा कुर्यात् ततः स्विष्टकृतादूर्ध्वं वरदानान्तं कर्मसमापनम् । एवं विधश्च क्रमस्ततो यथार्थं कर्म सन्निपातो विज्ञेय इत्येतस्मात्सूत्राद्बोद्धव्यम् इत्यष्टावक्र उपस्तरो बहुवचनानामपि । ७-८-९-१०

ब्रह्मचारी अब्रह्मचार्यपि भ्राताञ्जलिनाञ्जल्योरावपति यजमानपत्नीसंबन्धिनोर्द्वयोरञ्जल्यो संसक्तयोः ॥ ११ ॥

उपस्तरणाभिघारग्रहणान् मध्यात्पूर्ववदिति धर्मो भवति द्विरभिधारण मुक्तं ता अविच्छिन्दतीस्ताः संतता जुहुत इत्यर्थः परिणयन मुक्तं तुभ्य मग्ने इति भर्ता जपेत् लिङ्गात्पुनः पत्नी मित्यध्वर्युः । इयं नारीति पत्नी जपेत् । समित मिति ब्रह्मा । एवं पूषणं नु देवं वरुणं नु देवमिति पर्याये पर्याये ॥ १२ ॥ १३ ॥

येन द्यौरुग्रेत्यादयः । आदिग्रहणं य इमे द्यावापृथिवीति प्रभृत्यर्थ मुद्वाहग्रहणमर्थवादमात्रं दक्षिणाकालग्रहणवत् तदृत्विग्भ्यो दक्षिणा काले

---

१ ० ख. । २ च्छ. क. । ३ ० ख. घ. । ४-५ ० घ. । ६ ० ख. ।

आकूताय स्वाहेति जयाः प्राची दिग्वसन्त ऋतुरित्यभ्यातानाः । प्राणादपानꣳ संतन्विति संततिहोमा ऋता षाडृतधामेति द्वादशराष्ट्रभृतश्च ॥ १५ ॥ त्रातारमिन्द्रꣳ विश्वादित्या इति माङ्गल्ये ॥ १६ ॥ लाजाः कामे न चतुर्थꣳ स्विष्टकृतमिति ॥ १७ ॥ अथैनां प्राचीꣳ सप्तपदानि प्रक्रमयत्येकमिषे द्वे ऊर्जे त्रीणि प्रजाभ्यश्चत्वारि रायस्पोषाय पञ्च भवाय षडृतुभ्यः—

सखा सप्तदीभव सुमृडीका सरस्वती । मा ते व्योम संदृशी ॥

विष्णुस्त्वा मुन्नयत्विति सर्वत्रानुषजति ॥ १८ ॥ पश्चादग्ने रोहिते चर्मण्यानडुहे प्राग्ग्रीवे लोमतो दर्भानास्तीर्य तेपु-वधूमुपवेशयत्यपि वा दर्भेष्वेव ॥ १९ ॥

इमꣳ विष्यामि वरुणस्य पाशꣳ यजग्रन्थ सविता सत्यधर्मा ।
धातुश्च योनौ सुकृतस्य लोके रिष्टां मा सह पत्या दधातु ॥

इति योक्त्रपाशꣳ विपाय वाससोऽन्ते वध्नाति ॥ २० ॥

---

दद्यादितिवत् । जयाभ्यातानाः । चकार उद्वाह इत्यस्यानुकर्षणार्थः । जयादीनां मन्त्रप्रसिद्धत्वात्स्वरूपमाहाकूतायेत्यादि त्रातारमिं मङ्गल्य इति मन्त्रप्रशंसार्थ कामेन चतुर्थी लाजाहुतिः कामनुदेवमिति स्विष्टकृद्ग्रहण इति स्वात्मप्राप्त्यर्थम् ॥ १४-१५-१६-१७ ॥

अथैनां भर्ता सखा सप्तपदी भवेति लिङ्गादेकमिप इत्यादि भव सुमृडीकेति सर्वत्रानुषङ्गः ॥ १८ ॥

पश्चादग्ने रोहिते चर्मदर्भेष्वेवेति नित्यं विकल्प्यते । पाठसामर्थ्यादपि वा दर्भेष्वेवेति । एवकारश्चर्मव्यावृत्ति करोतीति केचित् । इमं विष्यामि दर्भरज्जुं विपाय विमुच्य वाससोऽन्ते वध्नाति चैन्नः ॥ १९ ॥ २० ॥

---

१-० ख. । २-० घ. ।

१

अ नुमतिभ्याꣳ व्याहृतिभिश्च त्वन्नो अग्ने, स त्वन्नो अग्ने, अयाश्चाग्नेसीति च ॥ २१ ॥ शमीमयीस्तिस्रोऽक्ताः समिधः समुद्रादूर्मिरित्येताभिस्तिसृभिः स्वाहाकारान्ताभिरादधाति ॥२२॥ अक्षत सक्तूनां दध्नश्च समवदायेदꣳ हविः प्रजननं म इति च हुत्वा वि ते मुञ्चामि रशनाꣳवि रश्मीनिति च हुत्वा पवित्रे नु प्रहृत्याज्येनाभिजुहोति ॥ २३ ॥ एधोऽस्येधिषीमहीति समिधमादधाति। समिदसि समेधिषीमहीति द्वितीयाम् ॥२४॥ अपो अद्यान्वचारिषमित्युपतिष्ठन्ते ॥ २५ ॥ कुम्भादुदकेनापोहिष्ठीयाभिर्मार्जयन्ते ॥२६॥ वरो दक्षिणा ॥२७॥ इत्येकादशः खण्डः ॥११॥

---

अनु अनुमतीमित्यादि अयाश्चा जुहोतीत्यन्तं हुत्वा ॥ २१ ॥

शमी शमीमयीश्चैव तिस्रः समिधोऽक्ता घृतेन समुद्रादूर्मिरित्येताभिर्जुहुयादित्यर्थः। अन्यस्तु स्वाहाकारग्रहणादत्रैव समिदाधाने स्वाहाकारो[2] नान्यत्रेति केचित्। वयं तु ब्रूमः—अत्र स्वाहाकारग्रहणस्योपलक्षणार्थत्वात् सर्वत्र समिदाधाने स्वाहाकारः ॥ २२ ॥

अक्षता अनवहता यवा स्तेषां सक्तवो दधि च समवदाय द्विर्द्विरवद्येत्। अवदायेति वचनात्। इदं हविरित्यादि रेतोऽस्मासु धेहीत्यन्तो मन्त्रः। पवित्रानुप्रहरण माज्येनाभिहोमश्च वि तेमुञ्चामीत्यनेन मन्त्रेण मन्त्रान्तरैः साहचर्यादनुक्तोऽपि गम्यते ॥ २३ ॥

एधो पत्नीवाद्ध्यात्। आपो(ऽअद्या)वैतेनोपस्थापनम् ॥२४॥२५॥

आपोहिष्ठीयाभिर्मार्जनम्। उदकुम्भादुदकुम्भधारहस्तादित्यर्थः ॥२६॥

वरो दक्षिणा। श्रेष्ठा गौर्दद्यात्। अत्राघारादि नक्षत्रदेवताहोमोऽनुमतिभ्यां व्याहृतिभिरित्यादि मार्जनान्ताद्गम्यते। अन्यस्तूक्तमेकतन्त्रत्वम्। आहोमेषु च सर्वमाघारादि तन्त्रं भवति सीमन्तोन्नयनादौ ॥ २७ ॥

॥ इति पूरणव्याख्याने एकादशः खण्डः ॥



---

१—० क. घ.। २ रा, ग. घ.। ३ म, घ.। ४—० क.। ५ अ, घ.।

# द्वादशः खण्डः

सुमङ्गलीरियं वधूरिमां समेत पश्यतः
सौभाग्यमस्यै दत्त्वायाथास्त्वं विपरेतन ॥

इति प्रेक्षकान्व्रजतोऽनुमन्त्रयते ॥ १ ॥ अत्रैव सीमन्तं करोति त्रीश्येतया शलल्या समूलेन वा दर्भेण सेनाहनामेत्येतया ॥ २ ॥ अथाभ्यञ्जन्ति—

अभ्यज्य केशान् सुमनस्यमानाः प्रजावरीर्यशसे बहुपुत्रा अघोराः।
शिवा भर्त्तुः श्वशुरस्यावदायायुष्मतीः श्वश्रूमनीश्चिरायुः ॥

इति ॥ ३ ॥ जीवोर्णयोपसमस्यति—

समस्य केशानवृजिनानघोरान् शिवा सखीभ्यो भव सर्वाभ्यः।
शिवा भव सुकुलोह्यमाना शिवा जनेषु सहवाहनेषु ॥ इति ॥४॥

---

सुमं–अनेन मन्त्रेण प्रेक्षकान् गच्छतोऽनुमन्त्रयते ॥ १ ॥

अत्रैव–तस्मिन्नेव पितृगृहे। अस्मिन्नेव काले सीमन्तं कुर्यात् त्रिश्वेता शलली त्रिषु स्थानेषु या शुक्ला शलली उपेक्षा च शललीसम्बन्धात् समूलेन वा मूलसंयुक्तेन वा दर्भेण वेति विकल्पे सेनाहनामेत्यनेन ॥ २ ॥

अथ–ततोऽभ्यञ्जनम्–अभ्यज्यकेशानित्यनेन मन्त्रेण ॥ ३ ॥

जीवोर्णे–जीवतो मेषस्य या ऊर्णा तया सैव केशान् [illegible] संयमनं तेनैव सहोर्णया [illegible]। समस्य केशानित्यनेन ॥ ४ ॥

**अथैनौ दधिमधु समश्नुतो यद्वा हविष्य ँ स्यात् ॥ ५ ॥ तस्य स्वस्ति वाचयित्वा समाना वा आकूतानीति सह जपन्ति ॥ ६ ॥ उभौ सह प्राश्नीतः ॥ ७ ॥ इति द्वादशः खण्डः ॥ १२ ॥**

---

अथैनौ दधि-एनौ दम्पती सहाश्नीतः । दधि च मधु चेत्यर्थः यद्वा दधि मधुभ्यां सह हविष्यस्य विकल्पः ॥ ५ ॥

तस्य-समाना-सह-स्वस्तिवाचनाय ब्राह्मणायोदक पूर्वदानम् स्वस्ति-ब्रूहीति वचनप्रेषणम् ॥ ६ ॥

उभे(भौ) अपि दम्पती सहैकस्मिन्पात्रे युगपच्च प्राश्नीयातामित्यर्थः । अन्नप्राशननिवृत्त्यर्थं दधि-मधु-हविष्याशनम् पूर्वस्य पूर्वस्य स्वस्तीति वाचयित्वा ॥ ७ ॥

॥ इति पुरुषव्याख्याने द्वादशः खण्डः ॥

—•—

# त्रयोदशः खण्डः

पुण्याहे युङ्क्ते ॥१॥ युञ्जन्ति ब्रध्नमिति द्वाभ्याꣳ युज्यमान मनुमन्त्रयते दक्षिणमथोत्तरम् ॥ २ ॥ अहतेन वाससा दर्भैर्वा रथꣳ संमार्ष्टि ॥ ३ ॥

अङ्कून्यङ्कावभितो रथꣳ ये ध्वान्ता वाता अग्निमभिये संचरन्ति दूरे हेतिः पतत्री वाजिनी वाꣳस्ते नोऽग्नयः पप्रयः पालयन्तु इति चक्रे अभिमन्त्रयते ॥ ४ ॥ वनस्पते विड्वङ्ग इत्यधिष्ठानम् ॥ ५ ॥

सुकिꣳशुकꣳशल्मलिꣳ विश्वरूपꣳ हिरण्यवर्णꣳ सुवृतꣳ सुचक्रम् आरोह सूर्ये अमृतस्य लोकꣳ स्योनं पत्ये वहतं कृणुष्व ॥ इत्यारोहयति ॥ ६ ॥

---

इदानीं भर्तृगृहं पुण्याहे गन्तुं तदाह—पुण्याहे शुभे नक्षत्रसंयुक्ते दिनेऽनुकूले च गमनार्थं रथादिकवाहनं कल्पयेत ॥ १ ॥

युञ्जन्ति आभ्यां रथादा वथादिकं युज्यमान मनुमन्त्रयते । युज्यमान आत्मने पदं यदान्यो योजयति युज्यमानवचनात् । [illegible] मेताभ्यामेव मन्त्राभ्यां दक्षिणस्यां धुरि युज्यमानश्वादिकं तथोत्तरस्यामपि ॥२॥

अहतेन संमार्ष्टि द्विः संशोधयतीत्यर्थः । [illegible] ॥३॥

अङ्कून्यङ्कावभितो रथ मनेन मन्त्रेण चक्रे अभिमन्त्रयते ॥ ४ ॥

वनस्पते—इत्यनेन मन्त्रेणाधिष्ठानं [illegible] मन्त्रयते इति ॥ ५ ॥

सुकिꣳ—अनेन मन्त्रेण पत्नीं आरोहयेत् [illegible] । केचित्—यजमानपक्षे [illegible] ॥ ६ ॥

---

१ ऋ. सं. १०. ८५. । २ हि. ६. ८ । ३ [illegible] । ४ ऋ. ६. ।

अनुमायन्तु देवता अनुब्रह्म सुवीर्यम् ।

अनुक्षत्रं तु यद्बल मनुमामैतु मद्यशः ॥

इति प्राङभिप्रयाय प्रदक्षिणमावर्त्तयति ॥ ७ ॥

प्रतिमायन्तु देवताः प्रतिब्रह्म सुवीर्यम् ।

प्रतिक्षत्रं तु यद्बलं प्रति मामेतु यद्यशः ॥

इति यथास्तऽ॰ यन्त मनुमन्त्रयते ॥ ८ ॥

अमङ्गल्यं चेदतिक्रामति अनुमायन्त्वित्यति जपति ॥ ९ ॥

नमो रुद्राय ग्रामसद इति ग्रामे, इमा रुद्रायेति च ॥ १० ॥ 'नमो रुद्रायैक वृक्षसद' इत्येकवृक्षे । 'ये वृक्षेषु शष्पिञ्जरा' इति च ॥ ११ ॥ 'नमो रुद्राय श्मशानसद' इति श्मशाने । 'ये भूताना मधिपतय' इति च ॥ १२ ॥ 'नमो रुद्राय चतुष्पथसद' इति चतुष्पथे । 'ये पथां पथि रक्षय' इति च ॥१३॥

---

अनुमाय अनेन प्राक् प्रथमं गच्छेदित्यर्थः । प्रतिमा अध्वर्युमिति शेषः[१] । यजमानकर्तृकमेतदनुमायन्ति देवता इत्याशीः कोशात् । एवं च अर्थाद्यजमान आरुह्य प्राङभिप्रयाति प्रदक्षिणमावर्तयति प्रदक्षिणावर्त्तने प्रयोजकत्वं यजमानस्यावर्त्तयतीति प्रयोगात् ॥ ७ ॥

प्रतिमायन्तु देवता इति रथं यथार्थं प्रदक्षिणमावर्त्तयतीत्यर्थः । अय मपि यजमानकर्त्तृको मन्त्रः ॥ ८ ॥

अमङ्गल्यग्रहणात्—श्मशान—चयनोत्कर—भूम्यादि नातिक्रामति । अनुमायन्तु देवता इत्यतिक्रान्तो जपेत् । यजमानकर्त्तृक मिद मुत्तरत्र मन्त्रा यजमानस्यैव । उद्वहनसंबन्धात् ॥ ९ ॥

नमोरु—ग्रामेऽभिक्रमणे जपेदित्यर्थः । इमारुद्रायेति च नमो—एक वृक्षसद

---

१ रि, ष. ।

'नमो रुद्राय तीर्थसद ' इति तीर्थे। ' ये तीर्थानि प्रचरन्तीति ' च ॥ १४ ॥ यत्रापस्तरित्व्या आसीदति समुद्राय वैणवे सिन्धूनां पतये नमः । नमो नदीनाᳯ सर्वासां पत्ये । विश्वाहा जुषताᳯ विश्वकर्मणामिदᳯ हविः स्वः स्वाहेत्यप्सूदकाञ्जलीन्निनयति । अमृतं वा आस्ये जुहोम्यायुः प्राणेऽप्यमृतं ब्रह्मणा सह मृत्युन्तरति। प्रासहादिति रिष्टिरिति मुक्तिरिति मुच्यमानः सर्वं भयं नुदस्व स्वाहेति त्रिः परिमृज्याचामति ॥ १५ ॥ यदि नावा तरेत् सुत्रामाणमिति जपेत् ॥ १६ ॥

यदि रथाक्षः शम्याणीवा रिष्येतान्यद्वा रथाङ्गं तत्रैवाग्निमु-

---

एतत्प्रभृत्येकवृक्षे श्मशाने चतुष्पथे तीर्थे य वृक्षेषु शष्पिञ्जराइति ॥ १० ॥ ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥

यत्रापस्तरी-यत्र नद्यादा वाप उत्तरणीया भवन्ति तत्र समुद्रायेत्यप्सूदकाञ्जलिं जुहुयादित्यर्थः । अमृतं वा अमृत मित्यनेन त्रिः परिमार्जनं परिमृज्य वास इति त्रिराचमनमन्त्रः । तूष्णीं परिमार्जनमङ्गानां सामर्थ्या दास्ये जुहोमीति लिङ्गाद् व्यवहितोऽप्यनेन संबन्धः ॥ १५ ॥

यदि नावा यत्र यदि नावा तरेत् सुत्रामाणमित्येता मृचं जपेन्नावारूढः ॥ १६ ॥

यदिरथाक्षः । यदि रथः शम्या वा दुष्येत भज्येत अणी चक्र धारणार्थाक्षे तन्मेनिकिलिका निहन्यते सा यदि दुष्येत भज्येतेत्यर्थः । अन्यद्वा रथस्याङ्गा युगादि दुष्येतेति वर्तते । तत्रैवा । तत्रैव तस्मिन्नेव देशेऽग्निमौपासनिकमुपनमाधाय प्रज्वाल्य उपनमाधायेति वचनात् स्थण्डिलादि न भवति। अथोल्लमात्रं कृत्वाग्निं प्रस्थाप्य जयप्रभृति भिर्हुत्वा प्राक्स्विष्टकृतात्

---

१ त्या. क. । २ आणी. ग. च. । ३ ० ग. च. । ४ न्ना, घ. । ५ ० ग. च. । ६-७ ० क घ ।

# चतुर्दशः खण्डः

अपरस्मिन्नन्हः संधौ गृहान्प्रतिपादयीत ॥ १ ॥ प्रतिब्रह्मन्निति प्रत्यवरोहति ॥ २ ॥ मङ्गलानि प्रादुर्भवन्ति ॥ ३ ॥ गोष्ठात्सन्ततामुलपराजिꣳ स्तृणाति ॥ ४ ॥ रथादध्योपासनात्—

येष्वध्येति प्रवसन्येषु सौमनसं महत् ।
तेनोपह्वयामहे ते नो जानन्त्वागतम् ॥ इति तयाभ्युपैति ॥ ५ ॥

गृहानहꣳ सुमनसः प्रपद्ये वीरꣳहि वीरवतः सुशेवा
इराꣳवहन्ती घृतमुक्षमाणास्तेष्वहꣳ सुमनाः सꣳ वसाम ॥

इत्यभ्याहिताग्निꣳ सोदकꣳ सौषधमावसथं प्रतिपद्यते रोहिण्या मूलेन वा यद्वा पुण्योक्तम् ॥ ६ ॥ पश्चादग्ने रोहिते चर्मण्या-

---

अपरस्मिन्नन्हो दिवसस्यापरस्मिन् यस्मिन्संधौ निशायामित्यर्थः । गोधूलिके वधूं गृहे प्रपादयेत् प्रवेशयेदित्यर्थः ॥ १ ॥

प्रति—अनेन प्रत्यवरोहयेदिति । रथाद्यजमानः ॥ २ ॥

मङ्गलानि—मङ्गलानि दधिचन्दनादीनि मङ्गलद्रव्याणि च गृहात्प्रादुर्भवन्ति प्रकटीक्रियन्ते ॥ ३ ॥

गोष्ठात्—गोष्ठं गृहाद् बाह्यं स्थानविशेषं संततामूलपराजिम् । प्राग-ग्रान् दर्भान् स्तृणाति । रथादारभ्य गृहं यावदित्यर्थः । संतता अविच्छिन्ना स्तृणीयात् । उपासनं गृहमाहुः । अध्वर्युःस्तरणं कुर्यात् । येष्वध्येत्यनेन मन्त्रेणोलपराजि कृत्वा तयेति सर्वेनाष्ठोलपराजिना यजमानः । तयोलप-राज्याभ्युपैति । रथादध्योपासनात् । इत्याहि [illegible] ॥ ४ ॥ ५ ॥

गृहानहं सुमनस इत्यनेन मन्त्रेणाभ्याहिताग्निकादि पुरस्तात् सोदकं सौषधं लाजादि सौपधं शालिना आवसथं गृहं विशेषतया प्रविशेदित्यर्थः ।

नडुहे प्राग्ग्रीवे लोमतो दर्भानास्तीर्य तेषु वधूमुपवेशयत्यपि वा दर्भेष्वेव ॥ ७ ॥ अथास्यै ब्रह्मचारिणमुपस्थ आवेशयति–

सोमेनादित्या बलिनः सोमेन पृथिवी मही
असौ नक्षत्राणामेषामुपस्थे सोम आहितः ॥ इति ॥ ८ ॥

अथास्य तिलतण्डुलानां फलमिश्राणामञ्जलिं पूरयित्वो-त्थाप्याथास्यै ध्रुवमरुन्धतीं जीवन्तीꣳ सप्तऋषीनिति दर्शयेत् ॥९॥

अच्युता ध्रुवा ध्रुवपत्नी ध्रुवं पश्येम सर्वतः
ध्रुवासः पर्वता इमे ध्रुवा स्त्री पतिकुलेयम् ॥

इति तस्याꣳ समीक्षमाणायां जपति ॥ १० ॥

---

यस्य तु पिता पृथगेव रथं प्रवेशार्थं नान्यं जानाति स पितृगृहे एवं प्रतिपद्यते तस्मिंश्च विद्यन्त एवाग्न्यादिकान्याधानि विशेषणमनर्थकं स्यात् । पितृगृहेऽभ्या-हिताग्न्यादिः । अविद्यमानपितृकस्य तु यद्याधा(धा)रणमौद्वाहिकस्य नियम्यत इति वक्ष्यामः । रोहिण्यां–रोहिणीनक्षत्रे मूले वा । यद्वा ज्योतिःशास्त्रादौ पुण्यमुक्तं तेनानुकूलेन प्रशस्तं मुहूर्तम् । आवसथं प्रतिपद्यत इत्यर्थः पश्चादन-डुहो दर्भैः सह तुल्यो विकल्पस्तेषु वधूं तेषु केवलेषु चर्मण्यास्तीर्णेषु वा उपवेशयेदित्यर्थः ॥ ६ ॥ ७ ॥

अथास्या उपस्थ उत्सर्गः ब्रह्मचारी मार्गवासस्त्वादिधर्मोक्तः । सोमे-नादित्या उपवेशनमन्त्रः ॥ ८ ॥

अथास्यैनि ब्रह्मचारिणोऽस्येत्यञ्जलिं पूरयेदस्या उत्थापयते अथास्यं ध्रुवा–अस्यै वध्वै ध्रुवामरुन्धतीन्यादीनि नक्षत्राणि दर्शयेत जीवन्ती सप्तऋ-षीणामन्तरा ताराः ॥ ९ ॥

अच्युता एतत्तस्यां वध्वां ध्रुवादि समीक्षमाणायां जपति ॥ १० ॥

श्वोभूते प्राजापत्यं पयसि स्थालीपाकꣳ श्रपयित्वा तस्य जुहोति । [1]आज्यशेषे[2] दधिसमानीय तेन हुतशेषेण[3] ॥ ११ ॥

चक्रीवानडुहो वा मे वाङ्मैतु ते मनः
चाक्रवाकꣳ सꣳ वननं तन्नौ सꣳ वननं कृतम्—

इति यजमानस्त्रिः प्राश्नात्यवशिष्टं तूष्णीं पत्नी ॥ १२ ॥ अपरान्हे पिण्डपितृयज्ञः स व्याख्यातः ॥ १३ ॥ संꣳ वत्सरं ब्रह्मचर्यं चरतो द्वादशरात्रं [4]त्रिरात्रमेकरात्रं[5] वा ॥ १४ ॥

---

श्वोभूते स्थालीपाकग्रहणं स्थालीपाकधर्मार्थम् । एतेन स्थालीपाकाः सर्वत्रेति वचनात् । प्राजापत्यं प्रधानस्थाने प्रजापतये स्वाहेति होमं कुर्यात् । आज्यशेषे दधि समानीय मिश्रीकृत्यानेन दध्ना सह स्थालीपाकस्य हुतशेषम् ॥ ११ ॥

चक्रीवानडुहावित्यनेन मन्त्रेण यजमानस्त्रिः प्राश्नीयात् । अवशिष्टं भुक्तशिष्टं तूष्णीं पत्नी त्रिः प्राश्नातीति वर्तते । एतस्मादन्यत्रापि पत्न्या (अ)वशिष्टभक्षणमस्तीति गम्यते तथा च न तस्य स्त्रियः प्राश्नन्तीति प्रतिषेध वचनमनर्थवद्भवति ॥ १२ ॥

अप—अपरान्हे पिण्डपितृयज्ञः । श्वोभूत इत्यधिकारात् तस्मिन्नेवाहन्य-परान्ह इति गम्यते नत्वमावास्यायाम् । न व्याख्यातः । चन्द्रादर्शनेऽमावा-स्यायामित्यत्र ननु चन्द्रादर्शन एव स्यात्स व्याख्यात इति वचनात्कालोपि व्याख्यात एव नैतदस्ति अपरान्हग्रहणमनर्थकं स्यात् तस्मादमावास्या-निवृत्त्यर्थं पुनरपरान्हग्रहणम् ॥ १३ ॥

संवत्सरं चरत इति द्विवचनात्पत्न्यापि ब्रह्मचारिणी । अनन्यपुरुषादि ध्यानं ब्रह्मचर्यं पत्न्याः । द्वादशतुल्यो विकल्पः । तेनानृतावप्युपगमनं निद्धम् ॥ १४ ॥

---

१—२ ( एतन ) व घ । ३—३—० ग. घ । ४—५ अधिकम्, च घ । ६ मनर्थ. ? क ।

अथास्यै गृहान् विसृजेत् ॥१५॥ योक्त्रपाशं विषाय तौ संनिपातयेत्–

अपश्यं त्वा मनसा चेकितानं तपसो जातं तपसो विभूतम् ।
इह प्रजामिह रयिꣳरराणः प्रजायस्व प्रजया पुत्रकाम ॥
अपश्यं त्वा मनसा दीध्यानां स्वायां तनूꣳ ऋत्विये बाधमानाम् ।
उप मामुच्चा युवतिर्बभूयाः प्रजायस्व प्रजया पुत्रकामे[2] ॥
प्रजापतिस्तन्वं मे जुषस्व त्वष्टा देवैः सहमान इन्द्रः ।
विश्वेदेवैर्ऋतुभिः सꣳ विदानः पुꣳसां बहूनां मातरौ स्याव ॥
अहं गर्भ मदधामोषधीष्वहꣳ विश्वेषु भुवनेष्वन्तः ।
अहं प्रजा अजनयं पृथिव्या अहं जनिभ्यो अपरीषु पुत्रान् ॥

इति ऋच्यादिव्यत्यासं जपति ॥ १६ ॥ करदिति भसदमभिमृशति ॥ १७ ॥ जननीत्युपजननम् ॥ १८ ॥ बृहदिति जातं प्रतिष्ठितम् ॥ १९ ॥ एतेन धर्मेण ऋतावृतौ संनिपातयेत् ॥ २० ॥

इति चतुर्दशः खण्डः ॥ १४ ॥

---

अथा–गृहाधिकारं प्रयच्छेदित्यर्थः । पत्नी वैपारिणाह्यस्येश इति श्रुतेः । अर्थस्य संग्रहे चैनामिति ( म. ९–११ ) स्मृतेश्च ॥ १५ ॥

योक्त्र–योक्त्रपाशं वाससोऽन्ते यद्बद्धन्तद्विमुच्य तौ दम्पती एकस्मिन् शयने संनिपातयेद् इति प्रत्येकमभिसंपद्यते । तदुपरि भार्यां भार्या पतिं च संनिपातयेत् संगमयेत् स्वं स्वं प्रति । अवश्यम् । एते चत्वारोऽस्मिन्नुपगमनमन्त्राऋच्यादिव्यत्यासं दम्पत्योर्जपः । पत्नी पूर्वम् ॥ १६ ॥

करत्–भसदिति गुह्यप्रदेशं (?) पत्न्याः । जननीति–उपजननं प्रजननम् । बृहत्–एतेन प्रतिष्ठितमभिमृशतीत्यनुवर्त्तते । एतेन ऋतुकाले तौ संनिपातयेदेवमादिना धर्मेण स्वार्थे णिच् परस्परापेक्षं प्रयोजकत्वं वा च ( च्यम् ) ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

॥ इति पूरणव्याख्याने चतुर्दशः खण्डः ॥

---

१ भार्यां ख. । २ मा. ग. । ३–० घ. । ४ च पतिं क. । ५–६–० घ. ।

# पञ्चदशः खण्डः

तृतीये गर्भमासे अरणी आहृत्य षष्ठेऽष्टमे वा जयप्रभृतिभिर्हुत्वा पश्चादग्नेर्दर्भेष्वासीनायाः पत्न्याः सर्वान् प्रमुच्य केशान्नवनीतेनाभ्यज्य—

तृतीये उक्तं बृहदिति जातं प्रतिष्ठितमिति तत आरभ्य तृतीये गर्भमासे अरणी सीमन्तं करोति। अरणी द्वादशाङ्गुले काठके परिशिष्टे उक्ते। जयति—जयेभ्यः प्रभृति तेभ्यः प्राग्ये स्युः। आघारादयस्ते जयप्रभृतयस्तैर्हुत्वा पवित्रादि होमे वक्ष्यमाणं कर्म कुर्यात्। पश्चादाँसुगर्मा अत्रारणी आहृत्येति दर्शनात्। प्रत्युदश्वमित्यादौ विवाहे अरण्याहरणं तत्राघारादि अनुमती व्याहृत्यादि दर्शनादिहाघारादि पवित्रहोमान्तं द्रष्टव्यम्। प्रधानस्थानेऽग्निं यजेदनादिष्टदेवतत्वात्। यो गुरुस्तमर्हयेत्। गुरुमर्हयेदित्यनेनैव सिद्धे यो गुरुस्तमर्हयेदिति स्वयं तत्र यो गुरुरिति वाक्येन प्रसिद्धं गुरुर्निपादीनि कर्माणीति स्मृतौ यदुक्तम्। तमनुद्योत्तरेणाहरणानि विधीयन्ते॥ केचित्पुनः पत्नीमिति मन्त्रलिङ्गात् पतिकर्तृकमिच्छन्ति पुत्रे जाते—यस्य भावेन सप्तमी वरं दद्यादुपाध्यायादेर्दक्षिणां न तु पुत्रजन्माख्यातुः शूद्रस्यापि संप्रदानत्वप्रसङ्गात्। अरणीभ्यामग्नेरायुर सीति निगदव्याख्यातम्। अरणीभ्यामित्युक्ते अरणी आह्रियेते नतु सीमन्तारणी सीमन्तस्य स्त्रीद्वारा पुरुषद्वारकत्वं न तु साक्षात् तस्मात्स्त्रीद्वारा संस्कारार्थमेव ते अरणी इतरथा सर्वेषां गर्भाधानंसाधारणत्वात्सर्वगर्भेषु जातकर्मणि ताभ्यामरणिभ्यामग्निमन्थनं स्यात्। प्रतिगर्भं वा तृतीये गर्भमासे अरण्याहरणादि सीमन्तकरणात् गुर्वहरणात्तस्मात्तृतीयगर्भमासाहृताभ्यामरणिभ्यामग्निमन्थनं स्यात्। प्रतिगर्भं न किंचित्प्रमाणं प्रतिगर्भाहरणं मुक्त्वाऽनेन प्रतिगर्भमाहरण(म्) सीमन्तप्रयुक्तत्वादाहरणस्य तथाचैकवाक्यत्वमरणी आहृत्य जयप्रभृतिभिर्हुत्वेति न किंचिदेतत्र प्रकृतं-

१—० ख.। २ जयतु. ग. च.। ३—३ ग. घ. च.। ४—६—० ङ. घ.। ६—९—० घ.। ७ ढ. ङ.। ८ मन्. ङ.। १०—११—० ढ.। १२—१२—० घ.। १३ भौमान्. ग.। १४—० ग. च।

त्रिश्येनया शलल्या शमीशाखया च स पलाशया पुनः पत्नीमग्निरदादिति सीमन्तं करोति ॥ १ ॥ इति पञ्चदशः खण्डः ॥ १५ ॥

---

मेनुसरामः । अन्यथा तदस्त्यन्यथा तंद्व्याचष्टे तृतीये गर्भमास इत्यादि । तृतीये गर्भमासे यदरण्याहरणं तदाहरणमात्रं दृष्टादृष्टार्थं तावत् । पुत्रे जाते सति तत्कर्मोच्यते तच्च जातमात्र एव तथा च स्मृत्यन्तरम्–कुमारंजातं पुरान्यैरालम्भात् दधिमधुनी हिरण्यादिकात्सहिरण्येन प्राशयेदिति । अन्यैर्ग्रहणमित्यर्थः । युक्तं चैतद् जातमात्र एव जातकर्म यद्दधिप्राशनं विहितं ततस्तनंदानम् एवं च यदि जातकर्मणः कालान्तरं प्रतीक्षते तदा न, तस्य प्राणातिपातः स्यात् । एवमाहरणं न तदारण्योः शीघ्रं भवतीति । पूर्वमसात्कस्मिश्चिन्मास आहरित(ते)व्ये इति दृष्टार्थमाहरणम् । तृतीये तु यदुक्तं तददृष्टार्थं तस्मादाहरणमात्रमेव संस्कारकम् । तयोरुपयोक्ष्यमाणत्वाद् तदा यूपं छिनत्तीतिवत् । ततस्तस्मिन्नेव मासे सीमन्तविधानं तच्च कथमित्याह–जयाप्र–जयप्रभृतयश्च जयाभ्यातानाः सन्ततिहोमा राष्ट्रभृतः । एवं च प्रभृतिशब्द आद्यर्थवाची न प्रागर्थे वर्णितो भवति पञ्चमीसमासश्च लाक्षणिकः । बहुव्रीहिषु लाक्षणिकः । तैश्च प्रधानस्थाने होमः । यथाऽऽयुष्यहोमादग्नेरायुरसीत्यनुवाकेन तैश्च हुत्वानन्तरमेव सीमन्तकरणं हुत्वेति वचनात् । कथं पश्चादग्नेः पश्चाद्दर्भेषूपविष्टायां सत्यां सर्वान् केशान् विमुच्य आभ्यज्य नवनीतेन त्रिश्येतां शलल्युक्तां (तया) शमीवृक्षशाखया च सपर्णया समूलेन दर्भेण वा पुनः पत्नीमित्यनेन मन्त्रेण सीमन्तं स्त्रीषु प्रसिद्धं कुर्यादित्यर्थः ॥ अष्टमे फलस्नानं केचित्पठन्ति तद्व्याचक्ष्महे ॥ १ ॥ (अष्टमे इत्याद्यवतरणं तत्र खण्डपूर्त्यनन्तरमुचितमिति भाति)

॥ इति पूरणव्याख्याने पञ्चदशः खण्डः ॥

---

१–१०–० घ. । २ थाम्ने, क. ख. । ३–४ तथान्य, क ख. । ५ र, ख. । ६ श्य, ग. च. । ७–८ गृहेऽरण्या यागाहरणेऽरण्योस्तदाविघ्नं न ग. च. । ९ दीक्षाम्, क. । ११ मन्ति, क. ख. । १२ वचन, ग. च. । १३–१४–० घ. । १५ तया, घ. । १६ क्तया, घ ।

# षोडशः खण्डः



अष्टमे गर्भमासे जयप्रभृतिभिर्हुत्वा फलैः स्नापयित्वा या ओषधय इत्यनुवाकेनाहतेन वाससा प्रच्छाद्य गन्धपुष्पैरलंकृत्य फलानि कण्ठे वै संसृज्याग्निं प्रदक्षिणं कुर्यात् ॥१॥ प्रजां मे नर्य पाहीति मन्त्रेणोपस्थानं कृत्वा गुणवतो ब्राह्मणान् भोजयेत् ॥२॥ फलानि दक्षिणां दद्यात् ॥ ३ ॥ ततः स्वस्त्ययनं च ॥ ४ ॥

---

अष्टमे—अतिक्रान्तेऽष्टमे ज्ञेयं व्यवहारदर्शनात् जय—प्रागेव तद्व्याख्यातम् । फलैः फलग्रहणमुपलक्षणार्थं फलसर्वौषध्यादिसंयुक्तेन वारिणा स्नापयेदित्यर्थः । या ओषधयः—निगदव्याख्यातं गन्धपुष्पैः समलंकृत्येति बहुवचनाद्रत्नादि भूषितायाः फलानि प्रशस्तानि फलानि कण्ठे हारं कृत्वा बध्नीयात् अग्नेः ?) अग्निं प्रदक्षिणीकृत्योपतिष्ठते ॥ १ ॥

प्रजां मे नर्य पाहीत्यनेन मन्त्रेण ततो गुणवन्तो विद्वांसो वृत्तवन्तश्च ब्राह्मणा भोजयितव्याः ॥ २ ॥

तेषु फलानि दक्षिणां च दद्यात् ॥ ३ ॥

स्वस्त्ययनं च स्वस्त्यादिशब्दयुक्ता मन्त्रा वाचयितव्याः । अत्रोच्यते कस्मिन्नग्नावेतौ होमौ क्रियेते किं ये अरणी आहृते ताभ्यां मथित्वोतं दीप्यमानमाहृत्याहोस्विदौद्वाहिके इति संशयः । केचिदाहुः । ताभ्यामरणिभ्यां मथित्वा कर्त्तव्यौ ते चारणी परित्यजेत् । तदयुक्तं यदि गर्भसंस्कारावेतौ किमेतयोः परित्यागः । अथ स्त्रीसंस्कारार्थौ तदस्य औद्वाहिकोऽग्निर्विद्यत-एव किमिति तत्र न क्रियते । अथैव मुच्यते औद्वाहिकस्य शालाग्निकरणं-नास्ति जीवति पितरि ततो यत्र दीप्यमाने किमिति न क्रियते । अथवा स्त्रीसंस्कारत्वान्न तत्र क्रियते लौकिकाद्वा तस्येति यद्युच्यते को हि विशेषो

---

१ त यत्र. ख । २ गन्ते. ग. च. । ३–४ ० स्व. घ. । ५ दिना. ग च ।

# यो गुरुस्तमर्हयेत् ॥ ५ ॥ इति षोडशः खण्डः ॥ १६ ॥

यदरणिभ्यामग्निं मथित्वा तयोः परित्यागो यत्र दीप्यमानोऽग्निः स्यात्तस्मादौद्वाहिकेऽग्नौ क्रियते। यत्तूच्यते-औद्वाहिकस्य प्रेतपितुर्निधानाज्जीवत्पितृकस्याभावात् कथं तत्र क्रियत इति नैतत् तस्यापि संभवात् कथं संभव इति चेत् कस्माद्वचनात्तयोः परित्यागः। अथ स्त्रीसंस्कारार्थौ- उत्तरकालं निमित्तनैमित्तिककर्मणामभावादर्वागेवारण्यभावः। तदभावात्तयोः परित्याग इति चेन्नैतदेवं यतो न व्रतादनयोः परित्यागो यस्मात्तयोराहरणं तदा संस्कारविपर्यासार्थं नहि कं (?) अरणि कर्मणि आहरणं श्रूयते। तस्माद्यथा वसन्तादिकालः सकृदाहृतानामग्नीनामुत्तरकाले श्रौतनित्यनैमित्तिककाम्यादयो भवन्ति तथा सकृदाहृतयोस्तस्मा (?) न्तः संस्कारकलापः। यत्तदौद्वाहिकं प्रेतपिता शालाग्निं कुर्वीतेति वचनं तदुत्तरकालमुक्तानां स्मार्तनित्यनैमित्तिकादिप्राप्त्यर्थमतश्चौद्वाहिकं शालाग्निं कुर्वीतेत्युक्तम्। शालाग्नित्वं च तस्य तदेव यच्छालायां भवति। ये वैश्वदेवादयस्ते तदा भवन्ति नतु प्राक् तदा तेषामनुष्ठानम्। लोके शालाशब्दो गृहपर्यायः। तथा च गृह्यकर्माणीति छान्दोग्येऽभिहितं ब्राह्मन्यायोक्तानि वैतानिकानि गृह्याणि वक्ष्याम इत्युक्तं तस्मादेतदेव युक्तं यदौद्वाहिके नाग्नावात्मीये स्त्रिया एतौ संस्कारौ क्रियेते यत्त्वरण्योराहरणं तदुक्तप्रयोजनम्। अतश्च जातकर्मणि मनुराह नतु सीमन्तोन्नयनेऽतो जातस्य गर्भस्य जातकादि स्वस्मिन्नग्नौ क्रियते मातृस्थस्य तु मातृद्वारे यथान्नपानादि मातृद्वारौ तस्योपकरोति। अथैते अप्यरणीयवर्चोऽन्नपानादिमातृप्रधानं सन्निपत्योपकरोति एव सेत्यपिकर्मणि ते च प्रतिगर्भे स कृत्वा क्रियतामिति नात्रास्माकं विप्रतिपत्तिरित्यलमातिप्रसङ्गेन ॥ ४ ॥

यो गुरुस्तमर्हयेत्—पुत्रे जाते यो गुरुराचार्यस्तमर्हयेत्पूजयेदित्यर्थः ॥५॥

इति पूरणव्याख्याने षोडशः खण्डः ॥ १६ ॥



१ यस्ता, ग. च. । २ लं, ख. ग. च । ३ रे, ख. ग. च । ४ चा, ख. । ५ णी, क. ख. च. । ६ संस्कृत्वात्, ग. । सकृत्वात्, च. । सत्कि, ख. । ७ क्रियते, क. । ८ एतत्सूत्रभाष्यं (घ.) पुस्तके विरलतया खण्डश, आनुपूर्वीरहितमपूर्णमुपलभ्यतेऽन्तेऽष्टावक्रएवमुक्तवान् तत इदानी भट्टश्रीश्रीकुमारोक्तं प्रकृतं लिख्यत इति च दृश्यते (गे, च)।

# अष्टादशः खण्डः

दशम्यां रात्र्यां पुत्रस्य नाम दध्यात् घोषवदाद्यन्तरन्तस्थं द्व्यक्षरं चतुरक्षरं वा त्र्यक्षरं दान्तं कुमारीणाम् ॥१॥ तेनाभिवादयितुं त्यक्त्वा पितुर्नामधेयं यच्चास्य नामधेयं देवताश्रयं नक्षत्राश्रयं देवतायाश्च प्रत्यक्षं प्रतिषिद्धम् ॥२॥ स्नात्वा सहपुत्रोऽभ्युपैति ॥३॥

---

दशम्यां रात्र्यां जातकर्मप्रभृति दशमी रात्रिर्गृह्यते । पुत्रस्येति वचनात् पितुरधिकारः । दध्यात्कुर्यादित्यर्थः । रात्र्यामित्यधिकरणे च सप्तमी दशम्यां रात्र्यां विशेषणम् । तेन सूतिकागारेऽपि नामकरणं देवतादिभिः प्रयत्नेन । [illegible] दशम्यां रात्र्यां व्यतीतायामिति केचित्—एकादश्यां वा । सूतकं निष्क्रान्ते दशम्यां रात्र्यां व्यतीतायामिति [illegible] आदि(यस्य) घोषवदादि । अन्तमध्ये अन्तस्थ-द्व्यक्षरम् । अक्षरं घोषवत् वर्ण आदि(यस्य) घोषवदादि । अन्तमध्ये अन्तस्थम् । द्व्यक्षरं चतुरक्षरं वा वर्णानां प्रथम द्वितीय शषसेभ्योऽन्ये घोषवन्तः । अन्तस्थमन्तस्थं अक्षरं वा वर्णानां प्रथम [illegible] यस्मिन्नवं दान्तमिति दा इति यस्तत्र अन्तस्था त्र्यक्षरं दान्तं दो दान्ते यस्मिन्नवं दान्तमिति दा इति देविदेति एवमादिकं दान्तम् । अत्रापि वर्णौ गृह्यते घोषवदाद्यधिकारात् । घोषवदाद्यन्तरन्तस्थानीति केचित् त्र्यक्षरे ॥ १ ॥

तेन देवदत्तोऽहं भोः अभिवादयामीति । स्त्री अभिवादये देविदा अहम् । त्यक्त्वा पितुः संबन्धिनो नामधेयानीति पदौ पृथक् कर्तव्यौ । अपत्य इत्यस्मात् पितृनामधेयावयवात् संबन्धिनीयं पुत्रनामधेये कुर्वत् नक्षत्राश्रये हितं नक्षत्रे हितं नामधेयं देवताश्रयं त्यक्त्वा कार्यम् । यदपि तु देवतायाश्च प्रत्यक्षं परिहृत्य प्रतिषिध्यते । निति चेत् गार्ग्यः प्रत्यक्षं प्रतिषिद्धं पितुर्देवतायाश्च प्रत्यक्षं परिहृत्य प्रतिषिध्यते । अन्ये पुत्रस्य नामधेयं यानवद् ब्राह्मणस्यादि स्यादिति वदन्ति ॥ २ ॥

स्नात्वा सहपुत्रोऽभ्युपैति—अग्निमिति शालीनो भवति । अन्यस्तु त्यक्त्वा पितुर्नामधेयानीति पाठात् पितुर्नामधेयं यदा गृहीतम् तदा त्यक्त्वा पितुर्नामधेयानीति पाठात् [illegible] सहपुत्रः सह देवतायाश्च [illegible] देवतायाः प्रत्यक्षं नक्षत्रानन्तर-अभिवादनं कुर्यात् प्रत्यक्षः सह नामधेयमुच्चारयेत् । देवतायाः प्रत्यक्षं नक्षत्रानन्तरं नामधेयम् उच्चारयेत् । प्रतिषिद्धं तेन [illegible] यदाभिवादनं करोति तदा नामधेयं नान्यद्धारयेत् । सहपुत्रोऽभ्युपैति सहेति नामधेयमभिधाय अग्नेः सन्निधौ [illegible] ॥ ३ ॥

---

१—२—३ ग. । ३—३ क. ख. । ४ ग. ख. ग. । ५ क. ख. ग. घ. । ६ ख. ग. घ. । ७ ख. ग. घ. ।

६ अ. पूर्व पूर्व. ग. घ. । ८ अन्य. ख. ग. घ. ।

अथैनमभिमृशति–'अग्नेष्ट्वा तेजसा सूर्यस्य वर्चसा विश्वेषां त्वा देवानां क्रतुनाऽभिमृशामीति प्रक्षालितपाणिर्नवनीतेनाभ्यज्याग्नौ प्रताप्य ब्राह्मणाय प्रोच्याभिमृशेदिति श्रुतिः ॥ ४ ॥ वरं कर्त्रे ददाति ॥ ५ ॥

अङ्गादङ्गात्संभवसि हृदयादधिजायसे
आत्मा वै पुत्रनामासि स जीव शरदः शतम् ॥ इति

प्रवासादेत्य पुत्रस्य मूर्द्धनि जपेत् ॥ ६ ॥ न मधुमांसे प्राश्नीयादापशुबन्धात् ॥ ७ ॥ सम्वत्सरे चाजाविभ्यामग्निधन्वन्तरी यजेत् ॥ ८ ॥ इति अष्टादशः खण्डः ॥ १८ ॥

---

अथैनमभिमृशति–अथैनं कुमारमग्नेष्ट्वेत्यनेन मन्त्रेण प्रक्षालितपाणिर्नवनीतेन तेन हस्तौ अभ्यज्याग्नौ प्रताप्य ब्राह्मणाय प्रोच्याभिमृशेदिति श्रुतिः श्रुतिग्रहणमादरार्थं स्वास्यानुलिप्य प्रताप्य तापयित्वा ब्राह्मणाय प्रोच्याभिमृशेदिति सूत्रं तेन ब्राह्मणानुज्ञयाऽभिमृशेदित्यर्थ ॥ ४ ॥

वरं कर्त्रे जातकर्मादिकर्त्रे गुरवे इति। अङ्गात्–प्रवासादेत्य कार्यवशात्प्रोषितः। मूर्द्धनि जपेत् पुत्रस्य ॥ ५ ॥ ६ ॥

न मधुमांसम(सेप्रा)श्नीयात् पितृयज्ञाचार्योक्त प्रतिषेधोऽयं मांसभक्षणस्य पुत्रजन्मनः प्रभृति संवत्सरः पितुरधिकारोयं यथा पुत्रे जाते वैश्वानर्यां पुत्रफलार्थायां वैतानेष्वग्निषु। एवं धन्वन्तरियागोऽनाहिताग्नेस्तु शालाग्नौ। अपि च नात्र वैश्वानरीवत्पुत्रफलार्थता श्रूयते किं तर्हि जातपुत्रेणैव तत्कर्त्तव्यमेतदेवनियमात् प्रतीयते मांसभक्षणे प्रतिषेधवत्। आदित्यदर्शनं केचित्पठन्ति। अन्नप्राशनादेतदहं(द्वयं) व्याख्यास्यामः ॥ ७ ॥ ८ ॥

॥ इति पूरणव्याख्याने अष्टादशः खण्डः ॥



---

१ संधाप्य, ग. च.। प्रभज्य, क.। २ आस्य मनु, घ.। स्वास्यम्पनु, ग. च.। ० ख.। ३ ष्ट्य, क. ग. घ. च.। ४ गे, ग. च.। ५–६–० घ.।

# एकोनविंशः खण्डः



अथादित्यदर्शनम् ॥ १ ॥ चतुर्थे मासि पयसि स्थालीपाकꣳ श्रपयित्वा तस्य जुहोति ॥ २ ॥ आदित्यः शुक्र उदगात्पुरस्ताद्धꣳसः शुचिषद् यदेदेनमिति सूर्यस्य जुहोति ॥ ३ ॥ उदुत्यं जातवेदसमित्येतयोपस्थायादित्याभिमुखं दर्शयेत्—

'नमस्ते अस्तु भगवन् शतरश्मे तमोनुद ।
जहि मे देवदौर्भाग्यं सौभाग्येन मां संयोजयस्व'—

---

अथादित्य—अथेत्यानन्तर्ये जातकर्मानन्तरमादित्यदर्शनं कुर्यात् । चतुर्थेमासि जन्मप्रभृति चतुर्थेऽग्निं तूष्णीं निर्मथ्योपसमाधाय प्रज्वाल्य तस्मिन्नेवाग्नौ पयसि क्षीरे स्थालीपाकं श्रपयित्वा रन्धयित्वा आदित्यः शुक्र उदगादित्येका ऋक् तथा हंसः शुचिषत्तथा यदेदेनमिति त्रिभिः सूर्यस्य जुहुयादित्यर्थः । सूर्यग्रहणं सूर्यपदस्य ग्रहणमृगन्ते स्वाहाकारान्तं कृत्वा जुहुयादित्येवमर्थम् । अथवा मन्त्रवर्णिकी या सूर्यवासिनी देवता तां ध्यात्वा ऋगन्ते स्वाहाकारं कृत्वा जुहुयात् । जुहोति शब्दात् स्वाहाकारप्रयोगः ॥ १ । २ ॥ ३ ॥

उदुत्यम्—उदुत्यमित्यनया मन्त्रलिङ्गादादित्यमेवोपतिष्ठेत । नाग्निमुत्थाय तस्याऽभिमुखंदर्शयेत्तनुमानर्म्—नमस्तेस्तु अनेन मन्त्रेणादित्यमीक्षयेत्कुमारं यथार्वन्नोदयति ते नायं भगवान् तमोनुदाति अवेक्षणं क्रियते नमस्ते अस्त्वित्यनेन मन्त्रमत्र कृत्वेक्षणे प्रयुक्तं तच्च न तावत्कुमारः शक्नोति वक्तुं कुमारमपि वाचयेपि त्व(त्वे) तस्मादन्यार्थमेतदेतच्चों युक्तम् । स्मृत्यन्तरादिदं कर्म

---

१ अथा, फ. । २—४—० प. । ३ तया, क । ५—६—० घ. । ७—१२ ० घ. ७ ष्यो, ख. ग. च. । ८—० क. ङ. । ९—१० नमो नवेक्षणे नून. क. ङ. । ११ त्य. फ. ।

## एकविंशतितमः खण्डः

तृतीयस्य वर्षस्य भूयिष्ठे गते चूडाः कारयेत् ॥ उदगयने ज्यौत्स्ने पुण्ये नक्षत्रेऽन्यत्र नवम्याम् ॥ १ ॥ जयप्रभृतिर्हुत्वा–

'उष्णेन वायुरुदकेनेद्यजमानस्यायुषा
सविता वरुणोदधद्यजमानाय दाशुषे' ॥

इत्युष्णा अपोऽभिमन्त्रयते ॥ २ ॥

अदितिः केशान्वपत्वाप उदन्तु जीवसे
धारयतु प्रजापतिः पुनः पुनः स्वस्तये ॥

इत्यभ्युन्दति ॥ ३ ॥ ओषधे त्रायस्वैनमिति दक्षिणस्मिन्केशान्ते दर्भमन्तर्दधाति ॥ ४ ॥ स्वधिते मैनꣳहिꣳसीरिति क्षुरेणाभिनिदधाति ॥ ५ ॥

---

तृतीयस्य चूडाः कारयेत् जटा वापयेत्[२] तृतीयस्य वर्षस्य जन्मप्रभृति भूयिष्ठे गते भूयिष्टं बहुतरं षण्मासेभ्यः परं गम्यते षण्मासाः सममेव संवत्सरस्यावयवादधिकं भूयिष्ठं मासाभिप्रायं वा भूयिष्ठं वा । 'उदग' षण्मासमुदगयनं लोकप्रसिद्धं ज्यौत्स्ने उदगयनेऽपि पुण्ये नक्षत्रे अज्यौत्स्नेऽपि । अन्यत्र नवम्यामुदगयनादिषु नवमीं वर्जयित्वेत्यर्थः । अन्यस्तूदगयन ज्यौत्स्ना पुण्य नक्षत्राणां विकल्पश्रवणात्समुच्चयः ॥ १ ॥

जयप्र[३]–आघाराज्यभागादि प्रागुदञ्चं लक्षणमित्यादि कृत्वा प्रधानस्थानेऽनादिष्टदेवतेष्वग्निम् । अन्यस्तु नानु जयप्रभृतीति पठन्ति । तस्मादनादिष्टत्वादग्निरेव भवति युक्तमात्रः पाठो यतो जयादीनां मन्त्राणामुभयलिङ्गदेवताभिधायकत्वं तच्च स्त्रीसंस्कारे युक्तं स्त्रीलिङ्गदेवतात्वात् । इह तु पुंसोधिकाराद्यागेन तैर्होमः । अत एव हि शम्यादिभङ्गे तैर्होम उक्तो दम्पत्योः सहाध्वगमनाद् उष्णेन वा उष्णोदकाभिमन्त्रणम् ॥ २ ॥

---

१–२–० घ. । ३ त्र, क. ग. च. । ४–० क. ग. घ. । ५ वि, क. ।

चरणं स्यात् । कियन्तं परं कालं त्रैविद्यकं च कदा न चरेत् उच्यते उपनयनव्रतानन्तरं त्रैविद्यकं चरेत्. त्रैविद्यकं च चरेदिति तत्काले श्रवणात् कालं त्वानन्तर्याद्गृहस्थदीक्षोक्तं वा संवत्सरं त्रीन् पञ्च सप्त वेति द्वादशरात्रं वा आश्वमेधिकं संवध्यते । एवमेवोदीक्षाव्रतग्रहणाद्धिमोकः स्यात् । उपनयने दीक्षा च व्याख्याता द्वावनुवाकानित्सारीमेव ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥

अथ दीक्षां चातुर्होतृकीमाह—( सूत्रम् पु. १ खं. २३ सू. १–४ अथ दीक्षा चातुर्होतृकी संवत्सरम् ॥ १ ॥ चतुर्होतॄन्स्वकर्मणो जुहुयात् सह षड्ढोत्रा सप्तहोतारम् ॥ २ ॥ अन्ततो व्रतं प्रदायादितो द्वावनुवाकावनुवाचयेत् ॥ ३ ॥ एवमेवोद्दीक्षां जुहुयात् ॥ ४ ॥ ) संवत्सरमिति कालनियमः । चतुर्होतारः प्रयोजनं यस्याः सा चातुर्होतृकी चतुर्होत्रा स्वकर्मणो जुहोति । षड्ढोत्रा दशहोतारं निगद्य इन्द्रं गच्छ स्वाहेति होमः । चतुर्होतारं निगद्य वाचस्पते सोमः सोमस्येति द्वौ होमौ । पञ्चहोतारं निगद्य वाचस्पते हिन्विधे सोमः सोमस्येति होमम् (सः च.) । सप्तहोतारं निगद्य विधे नामन्निति होनवाग् होतेति षड्ढोतारं निगद्य तपयसि जुहोमि स्वाहेति होमः । एतत्सूत्रे पठितं स्यात्(तस्यो) परि पूर्वोक्तं जुहुयात् । सप्तहोताग्निहोता महाहविर्होता यथाक्रमं दश चतुः पञ्च षट् होतृशब्दास्ताश्चित्तिस्रुगादीनां संज्ञा मनिच्छेपे व्रतं युक्तं द्वावनुवाकौ वाचयेत् । एवमेवोदीक्षाया होमो वा चरितव्रतान्युक्तानि द्वादशरात्रमित्यत्र संवत्सरं यावत् । एतच्च मन्त्रहोत्राध्ययनकाले कर्तव्यम् । अग्निहोत्राध्ययनकाले-कर्तव्यम् । अग्निहोत्रब्राह्मणमधीत्य चातुर्होतृकं चत्वारि चत्वारि संवत्सरान्ते उद्दीक्षते तच्चतुर्होतारं स्थानमध्येतुमारभेत । एवमन्यत्रित्यादौ द्वादशरात्रादनन्तरमन्यारमुपस्तीर्यव्रतविकारात् ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ( पूर्वं व्याख्याने द्वाविंशतितमः खण्डः )

गोदानप्रसङ्गेन चूडाकरणानन्तरमेवमेवोपनयनखण्डं पठति तत आनेयादीक्षा तत आश्वमेधिकी ततश्चातुर्होत्रिकी ततस्त्रैविद्यकम् । एतस्मिन्क्रमे सूत्रकारस्यायमभिप्रायः । यदाग्नेयीत्वाद् ब्राह्मणस्याग्नेयं सावित्रमेवं स्यात् पठितव्यम् । क्षत्रियस्य त्वाश्वमेधिकम् । अध्ययनं ब्राह्मणात्मकत्वादारम्भेणा-

१–२–० द. । ३ देव. ख. ग. च. । ५ निहोत्र द. ... ग. च. ।
६ र मन्निगम्य तपयसि, ख. ग. च. । ७ होते ग. ग. च. । ८ त्र. ग. ग. च. ।
९ याचरिता, ग. च. । १०–११–० द । १२ हौतृकी, द. ।

(सप्तमे नवमे वोपायनम् ॥ १ ॥

आगन्त्रा समगन्महि प्रथममर्त्तिः युयोतु नः ।

अरिष्टाः संचरेमहि स्वस्ति चरतादिशः । स्वस्त्याग्रहेभ्यः ॥

इत्युप्तकेशेन स्नातेनाक्तेनाभ्यक्तेनालंकृतेन यज्ञोपवितिना समेत्य जपति ॥ १-२२-२ ) ( अथास्मैवासः प्रयच्छति-

या अकृन्तन्या अतन्वन्या आवन्या अवाहरन् ।

याश्च ग्ना देव्योऽन्तानभितोऽततनन्त ॥

---

ध्यांत्र भवति। यदायमनुकल्पो यदि द्वादशरात्रमाग्नेयी दीक्षा ब्राह्मणेनावश्यं तथा राजन्येनाश्वमेधिकी । अत एव चातुर्होतृकी पश्चादुक्ता आभ्यन्त्रविधिका-दयश्च तत एव संवत्सरमवश्यं व्रतचारिणा भवितव्यम् । इत्यष्टावक्रेण मयोक्त-मिदानीं प्रकृतं लिख्यते—( एवं मंगतिं प्रदर्श्य क्रमप्राप्तं द्वाविंशतितमखण्डोक्त-मुपनयनं व्याख्यातुमुचितं मन्यमानोऽष्टावक्रो द्वाविंशतितमखण्ड व्याचष्टे सप्तम इत्यादि मूलं पूर्वं लिखितमपि सुखबोधायार्द्धचन्द्रे पुनः प्रदर्श्यते )

सप्तमे वर्षे नवमे वा जन्मप्रभृति वर्षस्येति वर्त्तते तृतीयस्य वर्षस्येत्य-तस्तदिह सप्तम्यन्तं संबध्यते सप्तम इति सप्तम्यन्तेन संबन्धात् । यदिह सप्तम्यस्येत्युच्येत भूयिष्ठे गतेऽपि स्यात् तन्निवृत्त्यर्थं सप्तमीनिर्देशः । उपनयनपर्याय उपायनम् ॥ १-२२-१ ॥

आगन्त्रा समिति जपित्वा माणवकेन संगत्यामकेशेनेत्यादि केशवपनं स्नानं ततोऽञ्जनमक्ष्णोः । अभ्यञ्जनं नवनीतेन मुखाद्यङ्गानाम् । अलंकरण-मङ्गुलीयकादि । यज्ञोवीतमिहसूत्रकं वाससः प्रतिनिधिभूतयज्ञोपवीतस्य ॥ १-२२-२ ॥

वासो विन्यासविशेषत्वात्तद्वद्द्विवस्त्रोऽत ऊर्ध्वमिति निषेधात् । यत्प्रयत-तेति वासोऽहतं परिधापयति परिधापनं परिधत्स्वेति प्रेषणमाचार्यकर्तृकं, परिधापनं च शिक्षयितव्यम् । अन्वारभ्याघाराज्यभागौ हुत्वा । अन्वारभ्य ग्रहणात्पूर्वं संस्कारेण चूडाकरणान्तेषु प्रयोग्यत्वादन्वारम्भो नास्तीति गम्य-ते

---

१ त्या ङ, क. ख. ग. च. ।

तास्त्वा देव्यो जरमे सꣳ व्ययन्त्वायुष्मानिदं परिधत्स्व वासः ॥ इत्यहतꣳ वासः ॥ ) ( पु. १-२२-६-७-८-९ )

विवाहेन्वारम्भस्य तत्वधर्मतोक्ता ( १-१०-८ ) आज्यशेपे अन्वारभ्याघाराज्यभागौ हुत्वाऽनन्तरं तदध्यापनं प्राप्नोति आनन्तर्यात् । नैप दोपः । आघाराज्यभागहोमस्य तन्त्रसूचकत्वात् तेन प्रागुदंश्वमित्यादि द्रष्टव्यम् । प्रधानस्थानेऽग्नि येन च कर्मणेच्छेदिति जपश्चोपवित्राभिहोमान्ते च शेपे दधिक्राव्ण इति दधि प्राशयति । आचार्यो हि कर्त्ता प्राशयेदित्यर्थः । अन्यस्तु सविता ते हस्तमग्रहीदित्यनेन मां देवस्य त्वेति हस्तं गृहंस्तमसौस्थाने नाम गृह्णाति संबुध्यन्तं प्राङ्मुख ऊर्ध्वस्तिष्ठन्नासीनस्य दक्षिणेन दक्षिणमरिक्तेनारिक्तम् । सविता ते हस्तमित्यादि परिदानान्तम् । सविता ते(हस्तमि)त्यादिना परिददाति सर्वेभ्यो भूतेभ्यो ब्रह्मचारिणम् । अन्यस्तु सविता ते हस्तमग्रहीदित्यनेन मन्त्रेण ब्रह्मण्य न्यायेन सवितारं ध्यायेत् तदात्मन्यसावग्निरिति चाग्नि देवसवितरित्यादिना सवित्रे परिददाति ब्रह्मचार्यसीत्यादिना ब्रह्मचर्येण प्रजापतिं ध्यायेत् । काय त्वा परिददामीत्यादिना प्राजापत्यादिना देवानां परिददाति ॥ पु. १ खं. २२ सू. ३-४-५ ॥

ब्रह्मणो हृदयदेशमारभ्यानेन ब्रह्मचारिणो जपति मन्त्रवर्णादाचार्यः प्राणानां ग्रन्थिः प्राणादिदेशे तस्यैव ऋतस्यैव ॥ १-२२-६ ॥

ऋतस्य अनेन मेखलां मौञ्जीं पृथ्वीमादत्ते मौञ्जीग्रहणमनुवादः मम मुञ्जामिति सिद्धेः । पृथिवे(वी)तिकालात्रिगुणां त्र्यवयवाम् ॥ १-२२-७ ॥

ब्रह्मचारी-आदत्ते युवा अनेन परिव्ययति कटिदेशं परिवेष्ट्य परिवेष्ट्य ग्रन्थिं करोति । पुंस इति नपुंसकनिवृत्त्यर्थः । नपुंसकस्य न भवति । अन्ये तु ग्रन्थिविशेपणं शब्दमाचक्षते । वेष्टितान् ग्रन्थीन् वल्मपाशान्करोति । ब्रह्मचारी आदानसंबन्धात् ॥ पु. १ खं. २२ सू. ८-९ ॥

---

१ तद्ध्यानयनम्, घ । तदध्याचमनम् क । २ दीच्या. ख. ग. च. । ३ नयश्चोपरि. ख. ग. च. । ४ शिष्यो, ख. ग. च । ५-६-० घ. । ७ निरि. ङ. । ८ तिरि. ख. । ९ ब्रह्मन्या. ग । ब्राह्मण्येन. घ. । १० वा, ङ. । ११ नादेशं, घ. ख. । १२ दं. क ख. ग. च । १३ काला. ० घ. । १४ पे, ख. ग. च । १५ वे. ख ग च. । १६-१७-० घ. ।

(इयं दुरुक्तात्परिबाधमाना वर्णं पुराणं पुनतीम आगात् ।
प्राणापानाभ्यां बलमाभजन्ती शिवा देवी सुभगे मेखले मा रिषाम॥
इति तस्यां परिवीतायां जपति—
मम व्रते ते हृदयं दधातु मम चित्तमनुचित्तं ते अस्तु
मम वाचमेकव्रतो जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यम् ॥इति॥१०॥
यज्ञियस्य वृक्षस्य दण्डं प्रदाय कृष्णाजिनं चादित्यमुपस्थापयति-
अध्वनामध्वपते श्रेष्ठ्यस्य स्वस्तस्याध्वनः पारमशीय ।
तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् ॥
पश्येम शरदः शतं जीवेम शरदः शतम् ।
शृणुयाम शरदः शतं प्रब्रवाम शरदः शतम् ।
अदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ॥
या मेधाऽप्सरःसु गन्धर्वेषु च यन्मनः ।
दैवी या मानुषी मेधा सा मामाविशतामिहैव ॥
इति ॥ ११ ॥ अभिदक्षिणमानीयाग्नेः पश्चात्—
एह्यश्मानमातिष्ठाश्मेव त्वꣳ स्थिरो भव ।
कृण्वन्तु विश्वे देवा आयुष्टे शरदः शतम् ॥

इयं दुरुक्तामिति परिवीतायां जपति । ब्रह्मचारी मन्त्रलिङ्गात् । मम व्रत इति हृदयमित्याचार्यो जपति । एतस्मादेव मन्त्रलिङ्गादाचार्यकाम उपनयते दर्विहोमे चेदुपनेता मन्त्रलोपः स्यात् । पिता वा जपेत् । यज्ञियकस्याग्रावृचारी (?) । ब्रह्मणो बैल्वपालाशाविति (म. २-४५) स्मृतौ विशेषपरिग्रहः । केशान्तिक (म. २-४६) इत्यादि चाविरोधात् । उपस्थानाभिवादनमाचार्यस्याभिधत्ते । अध्वनामित्यादिना ॥ ( पु. १ खं. २२ सू. १०-११ )

अभिदक्षि-आत्मदक्षिणे सामर्थ्यादेह्यश्मानमातिष्ठेति दक्षिणेन पादेनाश्मानमास्थापयति ब्रह्मचारिणं पादेनेति इत्थंभूतलक्षणे तृतीया । अन्यत्-

१-२-० घ. । ३ यस्य, क. । ४-० घ. ।

( इति दक्षिणेन पादेनाश्मानमास्थापयति ॥१२॥ पश्चादग्नेर्महदुपस्तीर्य सूपस्थलं कृत्वा प्राङासीनः प्रत्यङ्ङासीनायानुवाचयति गायत्रीꣳ सावित्रीमपि ह्येके त्रिष्टुभमपि ह्येके जगतीमोमित्युक्त्वा व्याहृतिभिश्च ॥ १३ ॥ तां त्रिरवगृह्णीयात्तां द्विरवकृत्य ताꣳसकृत्समस्येत् पादशोऽर्धर्चशः सर्वामन्तेन ॥ १४ ॥ यत्तिसृणां प्रातरन्वाह यद् द्वयोर्यदेकस्याः सꣳवत्सरे द्वादशाहे षडहे त्र्यहे

(न्ये)तु ब्रह्मचारिणोऽवयवेन द्वितीया वा स्यात्तृतीया वा। गतिबुद्धिप्रत्यवसानार्थशब्द ( पा. १–४–५२ ) इत्यादिना कर्मसंज्ञा अवस्थापनाश्मन उपरि चलनात्मकत्वाद्गत्यर्थत्वान्नोचेत्तृतीया ब्रह्मचारिणेति पादे तु इत्थं भूतलक्षणे तृतीया ब्रह्मचार्यस्य स्वकीयः पादः। अवस्थाप्यते येनकरणे तृतीया स्यात्। केचिदभिदक्षिणमानयनमश्मन इच्छन्ति। एवं च द्विकर्मकत्वे सति कर्मण्येव द्वितीया ॥ ( पु. १ खं. २२ सू. १२ )

पश्चाद्–निगदसिद्धं महदुपस्तरणमाचार्यब्रह्मचारिणोः सूपस्थलमाचार्यस्य ब्रह्मचारिणः सकाशादुच्चतरं कृत्वा गायत्री तदित्यादिकारक सावित्री देवतात्मैव। अपि चैक इति वचनाद् गायत्री राजन्यवैश्ययोः स्यात् पक्षे अस्तु गायत्रीं सावित्रीमपीत्यत्रापिहीतिनिपातसमुदायम(योऽ)वधारणार्थम्। गायत्रीमेवैकेन राजन्यो जगतीमेव एके वैश्य इति। अत एव प्रागुक्तमादेवोयातीति त्रिष्टुभं राजन्यो युञ्जत इति जगती वैश्य इति ॥ (पु. १ खं. २२ सू. १३)

पच्छोऽर्धर्चश इति अस्य व्याख्यानं तां त्रिरित्यादिः। अवग्रहोऽवच्छेदः। एवं च त्रिष्टुब्जगतीश्चतुरवगृह्णीयात् पच्छ इत्यपि सिद्धम् ॥ ( पु. १ खं. २२ सू. १४ )

सावित्रीग्रहणं त्रिष्टुब्जगत्योरपि विशेषणम्। संवत्सरे यदित्यनुवादार्थं विशेषणार्थं च गायत्र्यादयः सन्ध्या या गण उक्ता तिसृणां प्रातरन्वाह यद्द्वयोर्यदेकस्याः संवत्सरे यदित्यनुवादार्थं विध्यभावात्तिसृणां गत्रीणां द्वयो गत्र्योरेकस्याश्च प्रातरन्वाह यत्सरे च गते यदनुवदनस्पनपनानन्तरमनुष्टु सन्देह

१–० प. । २ तत्सदन्त, ग. घ.। ३ त्रिष्टुभं क, ग. घ.। ४ ––– इति शेष । ५ घ. ग. ङ. ।

(त्वा तस्मात्सद्योऽनूच्येति श्रुतिः ॥१५॥ वरं कर्त्रे ददाति काꣳस्यꣳ वसनं च ॥१६॥ यस्य तु मेधाकामः स्यात्पलाशं नवनीतेनाभ्यज्य तस्य छायायाꣳवाचयेत् ।

सुश्रवः सुश्रवा असि

यथा त्वꣳसुश्रवः सुश्रवा असि एवं माꣳसुश्रवः सौश्रवसं कुरु॥
यथा त्वं देवानाꣳ वेदानां निधिपो असि ।
एवमहं मनुष्याणाꣳ वेदानां निधिपो भूयासमिति ॥ १७ ॥

ततोऽनुगम्यते तस्मात्सद्योऽनूच्येति श्रुतिः सद्यः काले एवानूच्येति श्रुतिराहेत्यर्थः । अन्यस्त्वाह गतित्रिरात्रं प्रातरन्वाह यद् द्वयोर्दिवसयोः संवत्सरे द्वादशाहे यदन्वाह तिस्रः त्रिरात्रमित्यादि द्वादशपर्यन्ताः पञ्चकल्पाः । एषु पञ्चकल्पेषु यदन्वाह तत्प्रातरेवान्वाह नान्यस्मिन्नो काले इत्यर्थः । तस्मात्सद्यस्तस्मिन्नेवकाले ब्रूयादिति श्रुतिवाद आहेत्यर्थः । अनेनैव तदाह पूर्वे कल्पा न वेदमूलास्तस्मात्ते नादर्तव्याः ॥ ( पु. १ सं. २२ स. १५ )

वरं कर्त्रे—कर्त्तारमादि होमी तस्मै दद्याछरादि यदात्वाचार्यः कुर्यात्तदा वरादि दातव्यमुत नेति दातव्यमदृष्टार्थं वेति केचित् । कर्तृग्रहणे तु दातव्यमित्याह अष्टावक्रः । यथा सत्रेषु होत्रादीनां दक्षिणादानं न भवति तथाचार्यकर्त्तृके उपनयने यस्मात्प्रधानमिहं संबन्ध (:) मन्त्रेष्विवात्रापि तथा पितृकर्त्तृके दूरापेताम् । एवं च सामर्थ्यात् पितुराचार्येचा(र्यत्वा)सम्भवादन्यैः कारयितव्यैः ॥ ( पु. १ सं. २२ सू. १६ ) १६ ॥

यस्य तु मेधाकामः पलाशवृक्षसंजातो नवनीतेनाभ्यज्य तस्य छायायां यस्य वै ब्रह्मचारिणो मेधां कामयेत तमाचार्यो वादयन् सुश्रवः एतन्मन्त्रं वाचयेदित्यर्थः । अमेधाकामस्य नैतद्भवति । अन्यस्तु सर्ववाचनमिच्छति । यतो ब्रह्मवर्चसं वा ज्ञेयं स्वर्गं च यथा सर्वः कामयते तथा ब्रह्मवर्चसमपि । अथ वा पालाशदण्डसंबन्धाद्ब्राह्मणस्यैव वाचनं सावित्र्यनुवाचनानन्तरं केचिदिच्छन्ति तदयुक्तं दक्षिणादानोत्तरकाले विधानात् ॥ (पु. १ सं. २२ सू. १७)

---

१ ० ख. ग. घ. च. । २ वें, ख. ग. च. । ३ वि, ख. ग. च. ।
४ ति, घ. । ५—७—० घ. । ६ न्येन, ख. ग. च. । ८—९—० घ ।
१० वाचयेत्, क. । ११ सर्वे, ख. । १२ न्ति, ख. ।

( अधीतेह वा अयमेषाꣳ वेदानामेकं द्वौ त्रीन् सर्वान्वेति यमेवꣳ विद्वाꣳसमुपनयतीति श्रुतिः ॥ १८ ॥ व्याख्यातं ब्रह्मचर्यम् ॥ १९ ॥ अथ भैक्षं चरते मातरमेवाग्रे याश्चान्याः सुहृदो यावत्यो वा सन्निहिताः स्युः ॥ २० ॥ आचार्याय भैक्षमुपकल्पयते तेनानुज्ञातो वा भुञ्जीतेति श्रुतिः ॥ २१ ॥

---

अधीते वायमेषां वेदानामेकं द्वौ त्रीन् सर्वान् वा वाशब्दः प्रत्येकमभिसंबध्यते वेति। अयं ब्रह्मचारी-अधीते अयं ब्रह्मचारी एवं विद्वानाचार्य उपनयति मात्रात इत्यादि मन्त्रणं परामृश्यते श्रुतिगर्भार्थः। अनुपनीतोनाधीते व्रात्यत्वात्। अन्यस्तु मन्त्रान्ते वेदानां निधिपो भूयासमस्मिन् यद्वेदस्येत्येव वचनम्। तत्रायमूहः कूर्यादेतस्य वेदस्य द्वयोर्वा वेदयोस्त्रयाणां वा वेदानां सर्वशब्दात्सकलवेदानामिति ॥ ( पु. १ खं. २२ सू. १८ )

व्याख्यातं ब्रह्मचर्यम्। एतेन धर्मेण द्वादशमित्यादिना ॥ ( पु. १ खं. २२ सू. १९ )

अथ भैक्षचर्या चरति। अथ शब्द उपनयनादनन्तरं भैक्षार्थं चरतीति ब्रूते तदुक्तम्-उपनयनप्रभृति व्रतचारी स्यादिति (१-१-७) भैक्षाचार्यवृत्तिरिति। अन्यस्तु वेदवचनानन्तरं भैक्षचरणेन तु यथान्येषामुपनयनात् पूर्वमित्यथ शब्दः। मातरमेवाग्रे मातरमग्रे याचेदित्यर्थः यश्चान्याः सुहृदो यावत्यो वा संनिधाः स्युः। यावत्यो वा सुहृदः स्युर्भगिन्याद्याः संनिधाने कृता अग्रे याचेत। एतच्च मातुरभावे ज्ञेयम्। यदात्वाचार्य उपनयनं स्वग्रहे कुरुते तदा मातृतुल्यामाचार्यानीम् ॥ ( पु. १ खं. २२ सू. २० )

आचार्याय भैक्षमुपकल्पयते। आचार्याय निवेदयते भैक्षं तेनानुज्ञातो भुञ्जीत नानुज्ञाप्याचार्यं भुञ्जीत त्रैविद्यमुक्तम् ॥ ( पु. १ खं. २२ सू. २१ )

॥ इति पूरणव्याख्याने त्रयोविंशतितमः खण्ड. ॥ २३ ॥

॥ प्रथमपुरुषस्य समाप्तः ॥



येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य केशान् ।
तेन ब्राह्मणो वपत्वायुष्मानयं जरदष्टिरस्तु ॥
येन पूषा बृहस्पतेरिन्द्रस्य चायुषेऽवपत् ।
तेन ते वपाम्यायुषे दीर्घायुत्वाय जीवसे ॥
येन भूयश्चरत्ययं ज्योक्च पश्यति सूर्यः ।
तेन ते वपाम्यायुषे सुश्लोक्याय स्वस्तये ॥

इति तिसृभिस्त्रिः प्रवपति ॥ ६ ॥

यत्क्षुरेण वर्त्तयता सुतेजसा वप्तर्वपसि केशान् ।
शुन्धि शिरो मास्यायुः प्रमोषीः ॥

इति लौहायसं क्षुरं केशवापाय प्रयच्छति ॥ ७ ॥

मा ते केशाननुगाद्वर्च एतत्तथा धाता दधातु ते ।
तुभ्यमिन्द्रो वरुणो बृहस्पतिः सविता वर्च आदधुः ॥

इति प्रवपतोऽनुमन्त्रयते ॥ ८ ॥ सुहृत्परिग्राहं[१] हरितगोशकृत्पिण्डे समवचिनोति ॥ ९ ॥

उप्त्वाय केशान्वरुणस्य राज्ञो बृहस्पतिः सविता विष्णुरग्निः ।
तेभ्यो निधानं महतं न विन्दन्नन्तरा द्यावापृथिव्योरपस्युः ॥

---

अदितिः—अनेन केशाम्युन्दनम् । ओषधे दक्षिणस्मिन्समीपे केशानामित्यर्थः । यत्क्षुरेणानेन केशवापाय नापिताय क्षुरं प्रयच्छेत् ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

मा ते केशान्–अनेन प्रवपतो नापितकेशानिति वर्णाद्वा प्रवपतः केशानिति वर्णात् । यद्वा प्रवपतः केशानिति वर्तने–प्रवपतो नापितस्य परिग्रहे परिगृह्य समवचिनोति समवस्थापयति ॥ ८ ॥ ९ ॥

---

१ °तेऽ, क. ख. ग. च. ।

**इति प्रागुदीचो ह्रियमाणाननुमन्त्रयते ॥ १० ॥ अरिक्ते पत्न्या श्लेषयेदिति श्रुतिः ॥ ११ ॥ वरं कर्त्रे ददाति पत्मगुडं तिलपिश्लं च केशवापाय ॥ १२ ॥ एतेन तु कल्पेन षोडशे वर्षे गोदानमग्निं वाध्येष्यमाणस्याग्निर्गोदानिको मैत्रायणिरिति श्रुतिः ॥१३॥ अदितिः श्मश्रु वपत्वित्यूहेन श्मश्रु प्रवपति शुन्धि मुखमिति च ॥ १४ ॥ इत्येकविंशः खण्डः ॥ २१ ॥**

उप्त्वाय–अनेन प्रागुदीचो ह्रियमाणान् हरितशकृतिपण्डेनानुमन्त्रयीत। अरिक्तम्(क्ते)–अरिक्ते धान्यादिपूर्णे इत्यर्थः। आश्लेपयति भरेत शकृतिपण्डः। साकल्येन स्थापयेत्। श्रुतिग्रहणमादरार्थम्। अन्यस्तु पुनः पुनः श्रुतिग्रहणं कुर्वन् संस्काराणां वेदमूलं स्मरणमिति दर्शयति ॥ १० ॥ ११ ॥

वरं कर्त्रे–कर्त्रे वरं गाम्। केशवापाय त्वविकलौर्ल्लेवकात्तृतीयो भागः पत्मगुण इति केचित्। उत्कावो नित्येकपरो व्यञ्जनावयव इत्यन्ये तिलपिश्लं तिलपिष्टं तिलचूर्णं वा कच्छपकटाहं दद्यात्। श्रुतिग्रहणमनुवर्त्तते ॥ १२ ॥

एतेनैव तु कल्पेन तु शब्दो वाक्यपरिपूरणः। एतेन चूडाकरणकल्पेन विधानेन षोडशे वर्षे जन्मप्रभृति गोदानाख्यः संस्कारः। अत्रायं जन्मप्रभृति पवित्राभिहोमान्ते। उष्णेन वायो इत्यादि तिलपिशलदानं च। अग्निं वा अग्निं युञ्जानकस्थानं यदा अध्येष्यमाणस्यागच्छेत् तदा वा अग्निर्प्रवर्त्तनात्प्रागुर्ध्वमेव वेत्यनियमः। अत्र प्रमाणमाह—अग्निर्गोदानिको मैत्रायणिरिति श्रुतिः गोदाने भवो गोदानिकः। गोदानप्रयोजनो वा ॥ १३ ॥

अदितिः श्मश्रु–चकार उपलक्षणार्थः। तेन वरुणस्य श्मश्रु वसां वपसि मा ते श्मश्रु उप्त्वाय श्मश्रु इति सिद्धम् लाघवार्थमिदमाह गोदानमुक्तं दीक्षासु मध्ये चूडाकरणेन गोदानं व्याख्यातमिति वक्तव्यं स्यात्। इह तु प्रसङ्गादेकार्थमुक्तम् ॥ १४ ॥

॥ इति पूरणव्याख्याने एकविंशः खण्डः ॥ २१ ॥



१ णं, ख.। २ उत्थाय, क.। ३ ल्या, ख. ग. च.। ४ ल, ख. ग. च.। ५ त्तु तृ, ख. ग. च.। ६ ण्णावो, ख.। ण्णो, ग. च.। ७ अना, घ.। ८–० ग. च.। ९ तिग्, क.। र्ति, घ.। १० रि, क.।

# द्वाविंशः खण्डः

[1]सप्तमे नवमे वोपायनम् ॥ १ ॥

आगन्त्रा समगन्महि प्रथममर्तिं युयोतु नः ।

अरिष्टाः संचरेमहि स्वस्ति चरता दिशः । स्वस्त्या गृहेभ्यः ॥

इत्युप्तकेशेन स्नातेनाक्तेनाभ्यक्तेनालंकृतेन यज्ञोपवीतिना समेत्य जपति ॥ २ ॥ अथास्मै वासः प्रयच्छति—

या अकृन्तन्या अतन्वन्या आवन्या अवाहरन्

याश्च[2]ग्न्या देव्योऽन्तानभितोऽततनन्त

तास्त्वा देव्यो जरसे संव्ययन्त्वायुष्मन्निदं परिधत्स्व वासः ॥

इत्यहतं वासः परिधाप्यान्वारभ्याघारावाज्यभागौ हुत्वाज्यशेषे दध्यानीय दधिक्राव्णो अकारिषमिति दधि त्रिः प्राश्नाति ॥ ३ ॥ को नामासीत्याह ॥ ४ ॥ नामधेये प्रोक्ते " देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां हस्तं गृह्णाम्यसाविति हस्तं गृह्णन्नाम गृह्णाति प्राङ्मुखस्य प्रत्यङ्मुख ऊर्ध्वस्तिष्ठन्नासीनस्य दक्षिणमुत्तानं दक्षिणेन नीचारिक्तमरिक्तेन सविता ते हस्तमग्रहीदसावग्निराचार्यस्तव देवसवितरेषते ब्रह्मचारी त्वं गोपाय समावृतत् । कस्य ब्रह्मचार्यसि । प्राणस्य ब्रह्मचार्यसि । कस्त्वा कमुपनयते । काय त्वा परिददामि । कस्मै त्वा परिददामि । तस्मै त्वा परिददामि । भगाय त्वा परिददाम्यर्यम्णे त्वा परिददामि सवित्रे त्वा परिददामि सरस्वत्यै त्वा परिददा-

---

१ एतद्द्वाविंशतितमखण्डभाष्यं तु अष्टावक्रेणान्ते लिखितं तत्कारणं च दर्शितमिति तदनुसृत्यात्र न लिख्यते घ. पुस्तके तु सूत्रपाठमनुरुध्य लिखितम् ॥

२ ध्य. क. ख. घ. ।

मीन्द्राग्निभ्यां त्वा परिददामि विश्वेभ्यस्त्वा देवेभ्यः परिददामि सर्वेभ्यस्त्वा देवेभ्यः परिददामीति परिददाति ॥५॥ ब्रह्मणोग्रन्थिरसि स ते मा विस्रसदिति हृदयदेशमारभ्य जपति । प्राणानां ग्रन्थिरसीति प्राणदेशम् ॥ ६ ॥

ऋतस्य गोप्त्री तपसस्तरुत्री घ्नती रक्षः सहमाना अरातीः
सा नः समन्तमभिपर्येहि भद्रे धर्त्तारस्ते सुभगे मेखले मा रिषाम

इति मौञ्जीं पृथ्वीं त्रिगुणां मेखलामादत्ते ॥ ७ ॥ युवासुवासा इति मेखलां प्रदक्षिणं त्रिः परिव्ययति ॥ ८ ॥ पुंस्त्रीन्ग्रन्थीन्बध्नाति ॥ ९ ॥

इयं दुरुक्तात्परिबाधमाना वर्णं पुराणं पुनतीम आगात्
प्राणापानाभ्यां बलमाभजन्ती शिवादेवी सुभगे मेखले मा रिषाम

इति तस्यां परिवीतायां जपति—

मम व्रते ते हृदयं दधातु मम चित्तमनुचित्तं ते अस्तु
मम वाचमेकव्रतो जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यम् ॥इति॥१०

यज्ञियस्य वृक्षस्य दण्डं प्रदाय कृष्णाजिनं चादित्यमुपस्थापयति—

अध्वनामध्वपते श्रेष्ठ्यस्य स्वस्त्यस्याध्वनः पारमशीय ।
तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् ॥
पश्येम शरदः शतं जीवेम शरदः शतम् ।
शृणुयाम शरदः शतं प्रब्रवाम शरदः शतम् ।
अदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ॥
या मेधाऽप्सरःसु गन्धर्वेषु च यन्मनः ।
दैवी या मानुषी मेधा सा मामाविशतामिहैव ॥

इति ॥ ११ ॥ अभिदक्षिणमानीयाग्नेः पश्चात्—

एह्यश्मानमातिष्ठाश्मेव त्वꣳ स्थिरो भव ।
कृण्वन्तु विश्वे देवा आयुष्टे शरदः शतम् ॥

इति दक्षिणेन पादेनाश्मानमास्थापयति ॥ १२ ॥ पश्चादग्नेर्महद्दुपस्तीर्य सूपस्थलं कृत्वा प्राङासीनः प्रत्यङ्ङासीनायानुवाचयति गायत्रीꣳ सावित्रीमपि ह्येके त्रिष्टुभमपि ह्येके जगतीमोमित्युक्त्का व्याहृतिभिश्च ॥ १३ ॥ तां त्रिरवगृह्णीयात्तां द्विरवकृत्य ताꣳ-सकृत्समस्येत् पादशोऽर्धर्चशः सर्वामन्तेन ॥ १४ ॥ यत्तिस्रणां प्रातरन्वाह यद् द्वयोर्यदेकस्याः सꣳ वत्सरे द्वादशाहे षडहे त्र्यहे वा तस्मात्सद्योऽनूच्येति श्रुतिः ॥ १५ ॥ वरं कर्त्रे ददाति काꣳ-स्यꣳ वसनं च ॥ १६ ॥ यस्य तु मेधाकामः स्यात्पलाशं नवनीतेनाभ्यज्य तस्य च्छायायां वाचयेत्—सुश्रवः सुश्रवा असि ।

यथा त्वꣳ सुश्रवः सुश्रवा असि एवं माꣳ सुश्रवः सौश्रवसं कुरु ॥
यथा त्वं देवानाꣳ वेदानां निधिपो असि ।
एवमहं मनुष्याणाꣳ वेदानां निधिपो भूयासम् ॥

इति ॥ १७ ॥ अधीतेह वा अयमेषाꣳ वेदानामेकं द्वौ त्रीन् सर्वान्वेति यमेवꣳविद्वाꣳसमुपनयतीति श्रुतिः ॥ १८ ॥ व्याख्यातं ब्रह्मचर्यम ॥ १९ ॥ अथ भैक्षं चरते मातरमेवाग्रे याश्चान्याः सुहृदो यावत्यो वा सन्निहिताः स्युः ॥ २० ॥ आचार्याय भैक्षमुपकल्पयते तेनानुज्ञातो भुञ्जीतेति श्रुतिः ॥ २१ ॥

॥ इति द्वाविंशः खण्डः ॥

—⁂—

समन्वायन्ति पुनन्तु मा पितरोऽग्नेर्मन्व इति चतुर्भिरनुवाकै-रपोभिमन्त्र्य स्नानमाचरेत् ॥ १८ ॥ एवमेवोद्दीक्षां जुहुयात् ॥ १९ ॥ शादं दद्भिरिति चतुर्दशानुवाकाननुवाचयेत् ॥ २० ॥

रहस्यमध्येष्यमाणः प्रवर्ग्यम् ॥२१॥ आदेशे यथा पुरस्ता-द्व्याख्यातम् ॥२२॥ आदितः पञ्चविंशत्यनुवाकाननुवाचयेत् ॥२३॥

त्रैविद्यकमुपनयनेन व्याख्यातम् ॥ २४ ॥ आदितस्त्रीननु-वाकाननुवाचयेत् ॥ २५ ॥ व्याख्यातानि व्रतानि व्याख्यातानि व्रतानि ॥ २६ ॥ उदुत्तमं वरुणपाशमिति मेखलामुन्मुञ्चति ॥ २७ ॥

इति मैत्रायणीयमानवगृह्ये त्रयोविंशः खण्डः प्रथमः पुरुषश्च समाप्तः ॥

---

इवेत्युक्तत्वात् (१-१-१४) अश्वस्यैव स्नानं प्रकृतव्रतेनाश्वं स्नापयेदित्यर्थः ॥ १६ ॥ १७ ॥ १८ ॥

एवमेवोद्दी-केचिदुपस्थानं नेच्छन्ति तदसदेवमेवेत्यतिदेशस्याङ्गप्रधा-नत्वात्-हुत्वा पष्ठेनोपातिष्ठते ॥ १९ ॥

शादं दद्भिरिति नव अनोमित्रेति पञ्च एवं चतुर्दशानुवाकोपस्थानस्य होमसंबन्धत्वात् । केचिच्छमिच्छेपे अग्ने व्रतपते व्रतमचारिषमिति व्रतविमोकमि-च्छन्ति शादं दद्भिरिति नव मानोमित्रेति पञ्च चतुर्दशा नुवाकान्वाचयेत् ॥२०॥

पञ्चविंशत्येवाधार एवमेवेति प्राप्ते रहस्यं येन प्रकारेण पुरस्ताद्व्या-ख्यातम् । उदगयन इत्यादिना दीक्षामुपैष्यन्नित्यादि वा तत्रैव सिद्धम् ॥ २१ ॥ २२ ॥ २३ ॥

त्रैविद्यकमुपत्रैविद्यकं तन्त्र दीक्षाविशेषः । तिस्रो विद्याध्ययनं त्रैविद्यकं कर्म तदुपनयनेन व्याख्यातम् । आगन्त्रा समगन्महीत्यादिना समिच्छेपे व्रतमादि-स्यादितस्त्रीननुवाकान्वाचयेत् । करिष्ु स्थानि व्रतानि इत्याह ख्यातानि व्रतानि एवं वा अनन्तर्हितायां भूमौ शयनादीनि उदकयामाहरणं वर्त्तयित्वा । अन्ये तु मार्गवासस्त्वादीनि व्रतानि मन्यन्ते तदसत् तानि हि समावर्त्तनान्तानि एतेन धर्मेण माध्यधीत इति (१-२-७) उक्तत्वात् । तेषां त्रैविद्यकत्वे त्रैविद्यकं यावदेव

---

१-० ख. । २ तत्र, क. । ३ तात्र, ग. च. । ४ करिष्ु नस्थानि, क. ।

श्रीरस्त्वत्र ।

## द्वितीयः पुरुषः ।

# मैत्रायणीयमानवगृह्यसूत्रभाष्यम् ।

सरस्वत्याः प्रसादेन यथैतत्कृतवान्पुरा ।
भगवान् मानवाचार्यः पूरणाख्यं प्रयत्नतः ॥ १ ॥
अष्टावक्रेण देवेन तां तुष्ट्वा तु सरस्वतीम् ।
शते पूर्णे तु वर्षाणामृतौ शिशिरसंज्ञिते ॥ २ ॥
नमस्करोमि तां देवीं यस्या एव प्रभावतः ।
प्राप्तं यत्तन्महत्पुण्यं वृहद्धर्माभिधायकम् ॥ ३ ॥
नमोऽस्तु तस्मै देवाय स्वामिने चक्रपाणये ।
यस्य प्रसादाद् भूतानि गच्छन्ति पदमव्ययम् ॥ ४ ॥
ययानुविद्धो लोकेर्थो भाति कृच्छ्र(त्स्नः) चराचरे ।
नत्वा सरस्वतीं चैव तत्र यज्ञान् ब्रवीम्यथ ॥ ५ ॥

॥ स्वस्ति ॥ उद्वाहिकम् । प्रथमेऽध्याये धर्मेणाधिगतवेदस्य भार्यावेदनमुक्तम् । विन्नभार्यश्चेत्प्रजोत्पत्तावधिक्रियते स्नात्वा स सर्वं विन्दत इति वचनात् । तदनु गर्भाधानादयोऽपत्यसंस्कारा उक्ताः । जातापत्यः सत्क(न्क)र्मेण्यधिक्रियते श्रौते तथा चोक्तं "जातपुत्रो ब्राह्मणः कृत्तिकास्वादधीते"ति । एवं गार्ह्येऽपि सूत्रक्रमात् षण्ढस्यानधिकारात् । औद्वाहिकेपि षण्ढस्यानधिकारः । उद्वाहस्तु तस्य च दृश्यते मनु(९–२०३)वचनात्—

"यद्यर्थिता तु दारैः स्यात् क्लीबादीनां कथं च नेति"

एतस्मादेव दाराधिगमवचनात् । श्राद्धभोजननिषेधाच्च क्लीबादीनामध्ययनयोगो विद्यते । यस्तु चिकित्स्यः क्लीबो वाऽन्तरितप्रभृतिजातापत्योऽप्यसावधिक्रियते सोमो(मे) "पौष्णं नपुंसकमालभेत पुण्डकं याजयेदिति" श्रुतेः । गार्ह्यकर्मवान् श्रौतेऽधिक्रियते प्राथम्यान्नित्यत्वाच्च । तच्च गार्ह्यं कर्म शालाग्निसाधनमतः शालाग्न्याधानं तावदभिधीयते—

१–२ ० घ. । ३–४ ० घ. । ९ उद्वाह. च । ६–७ ० घ. ।

औद्वाहिकं प्रेतपिता शालाग्निं कुर्वीत ॥ १ ॥ अन्यत्र ततः

'औद्वाहिकम्' उद्वाहो विवाहः । उद्वाहेन निर्वृत्तमौद्वाहिकम् शालाग्निमावसथ्यं कुर्वीत समर्थयेदिति । एतदुक्तं भवति 'औद्वाहिकं शालाग्निकार्ये विनियुञ्जीतेति' । उक्तं च तस्मिन् भाष्यकृतेन शालाग्नि[र्]द्वादशाग्निरिति । एष उपनयनेऽग्निर्वैवाहिको वेति कात्यकं पाणिग्रहणादि गृह्यविहितं परिचरेदिति स्याद्वात्यमौद्वाहिकं वा प्रेतपिता शालाग्निं कुर्वीतेति वेजवापं (:)

" वैवाहिकेऽग्नौ कुर्वीत गार्ह्यं कर्म यथाविधि ।
पञ्चयज्ञविधानं च पक्तिं चान्वाहिकीं गृही " । इति मनुः

(३–६७)प्रेतपितेत्याद्यनुवादः । न जीवतोर्मातापित्रोस्तत्पुत्रः पुत्रेण च स्थानीयकं पित्रा चानुज्ञातो महायज्ञे चाधिक्रियते नहि कुले पितुस्य पाकस्य पुत्रादयः पृथग्वैश्वदेवबलिहन्तकारपितृयज्ञातिथिभोजनानि कुर्वते किंतु पितैव कुरुते । अनयोस्तेऽजीवतोरिति । अत्र प्रेतपितृग्रहणमौचित्यानुवादः । तत्राधिकारिविशेषणतयोपादानम् । तेन सकामेन पित्रा विभक्तः पुत्रो जीवत्पितृकोऽपि कर्मण्यधिक्रियते तदर्थत्वाद्विभागस्य ॥ १ ॥

अत आह—'अन्यत्र ततः' इति प्रेतपिता परामृश्यते प्रकृतत्वात् । ततो विपरीतो धर्माधर्ममित्रामित्रादिवदन्यत्रेति यथा धर्मादन्यत्रेति मित्रादन्यत्रेत्यमित्र एवं ततः । प्रेतपितृकादन्यत्र जीवत्पितृको निगम्यते । यस्य पितुर्जीवत औद्वाहिको न परिगृहीत आसीत् प्रेते पितरि वक्ष्यमाणविधानेन शालाग्निं कुर्वीतेति पूर्वं प्रेतपितृग्रहणमौद्वाहिकग्रहणात्मकं चिरप्रमीतपितृकस्योद्वाहकाले यदाधानं तच्चिरप्रमीते पितरीत्यर्थः । उद्वाहकाले अयं तु वक्ष्यमाणाधिकारः सद्यः प्रेतपितृकस्योक्तः । प्रेते पितरीति पुनरुक्तं तस्मात्पूर्वं प्रेतपितृग्रहणं चिरमृतविषयमिदं सद्योमृतविषयं प्रेते पितरीतिनिमित्त सप्तमी । प्रज्वलन्तमग्निं पचनादिषु वैश्वदेवादिषु च प्रज्वलन्तमाश्रयमाणं तं चैतदधिकारमात्रात् । 'जागरयेयुः' प्रकृत्यर्थो न गम्यते प्रतिजागरयेयुर्बहुव-

१–२ ० ब. । ३ पुत्राभ्यां, ब. । ४ क, ख. । ५–६ ० ब । ७–८ ० ब. ।

**प्रेते पितरि प्रज्वलन्तोऽग्निं जागरयेयुः पर्वणि ज्यौत्स्ने पुण्ये नक्षत्रेऽन्यत्र नवम्याः ॥ २ ॥**

चनमधिकारभेदात् । अग्निं वा एते चित्यं चिन्वते य आहिताग्नय इति एतेनाग्नेर्निर्हरणमाहिताग्नौ प्रेते पुत्रेण कर्त्तव्यमेकाग्नौ तु न संभवति तेनैवाग्निना संस्कारितत्वाल्लौकिकाग्नेर्निर्हरणमन्य आहुस्तदसत् । अदृष्टार्थप्रसङ्गात् । संस्कारानर्हत्वाच्च विनियोगोपदेशभावाच्च । न लौकिकस्य प्रतिपत्तिसंस्कारोऽस्ति । यस्य गार्हपत्यादयस्तस्यापि सभ्यावसथ्ययोः समाख्यया गृह्यकर्मार्थता दृश्यते तयोर्निर्हरणप्रतिपत्तिर्युक्तेति ॥ 'जागरयेयुः' कियन्तं कालमित्यपेक्षायां यावदाशौचमिति युक्तमशुचेरनधिकारात् । अवकाशेऽनेन विधानेन निहृत्याग्निं प्रातर्यथाधानं शालाग्नेस्तस्मिन्नेव काले वक्ष्यति तत्कुतोऽशुचेरधिकारः ।

ननु शालाग्नौ चैके इति पक्षेप्याशौचेऽपि स्यात् । नैवम्—अग्निमतो हि तैत्पर्वणि अन्यत्र तत इति व्यवहितेन संबध्यते । उक्त ? मानन्तर्यसंबन्धे तु प्रेते पितर्येवपर्वणि ज्यौत्स्ने पुण्ये नक्षत्रे इति कालविकल्पः स्यात् । नत्वेकादशेऽहन्यरणिपाणिजागरणं स्यात् । उक्तं च प्रेते पितर्येकादशेहनि शुचिर्भूतो वैश्वदेवादि पञ्चमहायज्ञेष्वधिकारात्तेषामेवाग्निः साधनं तस्मिन्नेवाहनि तदाहरणे प्रवर्त्तते ( द. स्मृ. १. १०-११ )—

अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः ।
आश्रमेण विना तिष्ठन् प्रायश्चित्तीयते हि सः ॥
जपे होमे तथा दाने स्वाध्याये च रतः सदा ।
नासौ फलमवाप्नोति कुर्वाणोऽप्याश्रमाच्युतः ॥

इति स्मृतिवचनादाशौचान्त एव शालाग्निकरणेऽधिक्रियते प्रेते पितरीति निमित्तसप्तम्याप्येतत्सूत्रितम् । यस्तु पित्रापि पृथक् शालो ? " न कुलं कुलं स्यादिति " वचनाद् विभज्य पृथक् पाकः कृतस्तस्य पर्वणीत्यादिकालप्रती-

१ यथाग्निं. घ. । २ तयोरन्याशौचे. ग. च. । ३ हितं, ख. । ४ ० ख. ग. च. । ५ तदर्थं. घ. । ६–७ ० घ. । ८–९ ० घ. ।

त्रयं कुलाधीनत्वादधिकारप्रतिपत्तेस्तथानेकभ्रातॄणामविभक्तधनानां त्यागासंभवात्प्रेते पितर्यनधिकारः प्रागिकथविभागात्सपिण्डीकरणं कृत्वा विभजेरन्निति सपिण्डीकरणान्तं सह कुर्युरिति च स्मरणात्तद्विषयम् ।

' पर्वणि ज्यौत्स्ने पुण्ये नक्षत्रे ' इति पर्व पौर्णमास्यमावास्या वा ज्यौत्स्नः पूर्व(:)पक्षः पुण्यं नक्षत्रमनुकूलमज्यौत्स्नेपि पुण्ये नक्षत्रे अन्यत्र नवम्या इत्युभयबाधः । अत्र कश्चिदौद्वाहिके अरणिपूपसमारोपणमाह तदसत् सूत्रभाष्यकृतेदमुक्तमष्टका–वैश्वदेवादीनि औद्वाहिके प्रतिपिद्धानि तस्मिन्नापुण्यहोमान् जुहोतीति प्रकृत्य तस्मिन् भार्यामुद्वहेदिति विवाहपर्यन्तानि न तस्मिन्कर्माणि नाष्टकावैश्वदेवादीनि पिण्डपितृयज्ञस्तु भवति चातुर्थिकान्ते दर्शनादिति तत्र कारणमनुगन्तव्यं तथ्यौद्वाहिकमेव समारोप्य मथित्वाऽऽदध्यात्सदागुक्तमनुपदेशात । अन्यत्र तत इति व्यतिरेकानुपपत्तेश्च भिन्नार्थत्वानुपपत्तेरित्यर्थः ॥ अपरस्त्वेवं मतमौद्वाहिके जीवति पितरि गार्ह्याणि कर्माणि प्रेतभूते तु पितरि तमेव समारोपादिना शालाग्निं कुर्वीत । सेयं शालाग्नि[illegible] यदि जीवति पितरि तत्र पाकयज्ञादिकी क्रिया, मृते पितरि [illegible] न स्यात् कर्मार्थं हि शालाग्निः स च विद्यत एव यथा प्राक् पितृमरणात् तत्र कर्माणि तथैवोत्तरकालं स्युः किं पुनराहितेन कृते वचनात् ।

अपरे तु " न तत्र पर्व कुर्वीत कुर्यादाग्रयणादिक " मिति तदसत् । [illegible] पर्वण्यधिकारः कथं न तद्विकारस्याग्रायणादिष्वधिक्रियते तदसत्परि[illegible] [illegible] पितृग्रहणं नियमार्थं वदन्ति । तत्र को नियमः । [illegible] शालाग्निं कुर्वीत तत्प्रेतपितृक एवेति पर्वणि[illegible]नियमं औद्वाहिकमेव [illegible] कुर्वीत न निर्मन्थ्यादिकं यथा काठके ततो जीवत्पितृकोऽपि औद्वाहिकं निर्मन्थ्यं वा शालाग्निं कुर्वीत । यत एककारकरणं ततोऽन्यथा[illegible] [illegible] त्वौद्वाहिकस्यानियतत्वादुत्तरस्मिन्नियमे प्रेतपितृक औद्वाहि[illegible] [illegible] कुर्वीत न जीवत्पितृक इति औद्वाहिकस्य प्रेतपितृकस्य नियतत्वात् [illegible] निर्मन्थ्यमेव शालाग्निं कुर्यादौद्वाहिकमिति नियमार्थम् । [illegible] [illegible] जीवत्पितृकः शालाग्न्यभावात् । [illegible]

विभागेऽस्याधिकारः स्यादकर्मार्थत्वाद्विभागस्य । अस्ति च पितुरिच्छया रिक्थ-विभागः । न च गार्हस्थ्याधिगमादिकृतस्य श्रौतेऽधिकारः । न च तस्मिन्नौपासनार्थं [illegible] शालाग्निनित्यौपासनिकस्य [illegible] निके प्रवर्तनार्थं धारणं तदौपासनिकस्य[illegible] विना कर्माधिकारे धारणमस्ति [illegible] । न च शालाग्निर्गार्हपत्यादिर्धार्यते तत्पाकश-ब्दवाच्येषां मते तस्मिन् [illegible] शालाग्निः किमर्थं कर्तव्यः । विधान-मिति [illegible] ! न तु शालाग्निसंज्ञौपासनिकस्य । शालावान् न तस्य [illegible] यदि शालाग्निः किमर्थमौपासनिकं शालाग्निं कुर्वीत, स हि शालाग्निः क्रियते । अपि च जीवत्पितृको बहुद्रव्यादस्य प्रतिबन्धकः । [illegible] तु गार्हे [illegible] इति । यदि परं पञ्चमा-[illegible] विशेष [illegible] पुत्र एवायं भवति । पितृयज्ञविधानमौ-पासनिके [illegible] । [illegible] एवं [illegible], न स्वस्थाः ॥

अथ कथं द्वे पदे समानविभक्तिके औपासनिकमिति शालाग्निमिति [illegible] संगते स्याताम् । ते न तावद्विशेषणविशेष्यत्वेन संगतिः(ते) । औपासनिकं शालाग्निमिति भेदेनाभ्युपगतौ तेन(तत एव)हेतोः संज्ञा संज्ञित्वेन पर्यायत्वेन संगतिः ॥ [illegible] सर्वथा संगतिरभेदात् । अथ [illegible] वाक्यभेदेनौपासनिकं कुर्वीत शालाग्निं कुर्वीतेति तत्र [illegible]-[illegible] सत्यां न [illegible] । किं तर्हि विकल्पो [illegible] यथा भवति तथा व्याख्यात— [illegible] इत्यत्र । न च [illegible] पद इतिकर्तव्यतासंगतिरत्र न लभ्यते । [illegible]-[illegible] संगतिरस्ति यथा देवदत्तं पुत्रं कुर्वीतेति [illegible] । तस्मादुपमा-[illegible] इति [illegible] संगतिः । याऽपि वाक्यभेदेन संगतिस्तस्यां वा [illegible] औपासनिकं वा कुर्वीत शालाग्निं वेति [illegible] इति विशेषविधानार्थो नोपपद्येत, च [illegible] कल्पनायां तु [illegible] । अथ विभक्तिविपरिणामे संगतिः स्यादौपासनिका-[illegible] कुर्वीत औपासनिकेन वा तत्र पञ्चमीकल्पनायामौपासनिकादवयव-[illegible] स्यात्, न च विभक्तिविपरिणामे प्रमाणमस्ति । असत्यां

१—ख ० ङ. । २—३ ० ग. घ. ।

आर्यास्तु जीवत्पितृकस्य नेच्छन्ति इत्यादिना तु प्रव्रजितपितृकस्य । पूर्वं जीवत्पितृकस्यायुक्तमनेनैव हेतुना पिता निमज्ज जीवनेस्य जीवत्पितृकस्य केन वार्यते सत्यमत एष आस्यन्व्याख्यानान्तरमाह—इह वा कालविकल्पार्थो विभाषेति; पर्वणीत्यादि कालानभिधाय मन्थनविधानशालाग्निविधानयोरभिधानादित्यभिप्रायेणोक्तमिह वा कालविकल्पार्था विभाषेति नत्वस्य कश्चिद्व्यवस्थितोर्थोऽत्र व्याख्यातः । अन्यत्र तत इति सर्वनाम्नः परामर्शकत्वस्वाभाविकमर्थमपश्यन् व्यक्तहृदयः स वार्थेनेति वदन् प्रव्रजितापितृकादीनप्रकृतान्परामृशन् क्वचिन्नैकार्थं क्वचिदसम(भि)व्याहृता(नप्या)पि स सम्यगर्थमुक्तवान् तदुक्तम्—

" अथवा क्रियते विश्वो ग्रन्थः कश्चिद्वाचकः ।
अवाचकेऽपि व्याख्यानं कुर्वन्ति श्रोत्रियादयः ॥ "

अपि च सर्ववचनविरुद्धमपि जल्पन्ति यदि हि प्रत्यक्षशिष्टं तावदेव भवति अपूर्वत्वादित्युक्ताऽथ पूर्वमश्रुतं कल्पितवान् । प्रभातकाले पुराणेनाख्याग्नौ प्रक्षिप्य तथा वसन्तादि कृत्तिकादि चोक्तवान् । विरुद्धमपि च पर्वणीत्यादिना प्रत्यक्षसिद्धे चोदकप्राप्तविकल्पो बाध्यते । अपूर्वत्वात्तदप्राप्तस्य तु का कथा तथा च गृह्यान्तरे आवसथ्यविधानमुक्त्वोक्तम् । " औद्वाहिकं प्रेतपिता शालाग्निं कुर्यादिति " अत्राप्यन्यत्र तत इति आवसथ्यविधानात् । औद्वाहिक शालाग्निकरणमन्यत् । अन्यत्र तत इति तत औद्वाहिकात्प्रेतपितृकादौद्वाहिकः । अप्रेतपितृक इत्युभयं वा प्रकृतत्वात् तत इति परामृश्यते इत्युक्तम् ।

अथ यः प्रेतपितृक उद्वाहादनु शालाग्निं कुरुते स कथं कुर्वीत । यदि दिवोद्वाहकर्म तदा सभार्यस्य महायज्ञेऽप्यधिकारात्तदहरेव औद्वाहिकः शालाग्निसंबन्धात् शालाग्निरुच्यते तत्र वैश्वदेवादि प्रथममष्टकायामुद्वाहेष्टकां कृत्वा सायं होमः । उत्तरकाले विवाह रात्रौ वैश्वदेवं कृत्वा भोक्तव्यम् । निमित्तातिक्रमतया प्रातर्होमे प्रक्रमं चेच्छन्ति उद्योतनादयः । चातुर्थिकान्ते इत्यपरे ॥ यस्तु प्रेते पितर्यौद्वाहिकग्रहणाभावात् तस्मिन्नेवाहनि पञ्चयज्ञाधिकारादरणिजागरणादि स कुरुते । औद्वाहिकधारणं जीवत्पितृकस्य नु नैमित्तिकमित्यनेनाभिप्रायेण औद्वाहिकाभावात् द्वादशेऽहनि श्राद्धं कुर्वीते-

१—३ ० घ. । २ ० च. ख. ।

स्नातः शुचिरहतवासाः ॥ ३ ॥ वाग्यतावरणिपाणी जागृतः ॥ ४ ॥

त्युक्तम् । यस्य त्वौद्वाहिको विद्यते स एकादशेऽहनि शुचिर्भूतः पितृभ्यो दद्यादित्यग्निमत्त्वादेकादशाहव्यतिक्रमे प्रत्यवेयात् । अस्ति चौद्वाहिकाग्नौ श्राद्धं चातुर्थिकदर्शनात्तस्मादविद्यमानेऽग्नौ एकादशाहात् श्राद्धोत्कर्ष इति द्वादशेऽहनीत्युक्तं पर्वणीत्यादावितरस्याशुचिर्बलिहरणे नाधिक्रियते गृहस्थानविशेषेषु बलिहरणात् ॥ यस्तु जीवत्पितृक उद्वहति स पित्रानुज्ञातो वैवाहिकाग्निं पित्रोद्दिष्टशालायां परिचरेत् । अननुज्ञातस्य नास्त्यधिकारः । न च पितृसमानगृहे उलपराज्या येष्वध्येति प्रवसन्नित्यभ्युपैति । नाप्यथास्यै गृहान्विसृजेदस्वामित्वात् । यद्यौद्वाहिक उत्सीदेत पुनरौद्वाहिकेन विधिना तथैव भार्यायाः पुनः करणं येषामावसथ्यविधानं नास्ति पाणिग्रहणादि गृह्यं परिचरेदिति वचनाद्येषां त्वावसथ्यविधानं नास्ति तेषां पुनराधानं स्यादौद्वाहिकेपि शालाग्निशब्दाभिधानात्[१] ॥२॥ [३]प्रेते पितरि किं शालाग्निविधानेन । अत्रोच्यते औद्वाहिकं शालाग्निं कुर्वीतेति वदन् मुख्ये संभवात्तदङ्गे पशुयागे निवेशः । एवं च यः कश्चिदाह ब्रह्मौदनं भवति न भवतीति च तत्प्रत्युक्तम् । अन्यत्र तत इत्यादि जागरयेयुरित्यन्तम् । अन्यत्रान्यस्मिन्देशे ततस्तस्माद्देशात् । यत्र स पित्रग्निरासीत् । प्रेते पितरि सति प्रज्वलन्तं जागरयेयुरित्यर्थः । बहुवचनं पुत्रबहुत्वापेक्षया । पर्वणि पर्व पौर्णमास्यमावास्या ज्यौत्स्नः शुक्लपक्षः । पुण्यनक्षत्रमनुकूलशुभमाधानलक्षणं च नवमीं तिथिं वर्जयित्वा एतच्च प्रेतपितुर्यथासंभवे ज्ञेयं जीवत्पितुरवश्यं भवति[५] ॥ २ ॥

'स्नातः' अहतवासा इति तावदवश्यमपश्यन् यत्र स्नानं कृत्वर्थमिति दर्शयति पुरुषार्थत्वेन स्यात् । स्यान्नित्यविहितत्वात् । स्नातः, अहतवाससाविति वचनात् क्षौमपरिधापनं ब्राह्मौदनं च परिसंचष्टे नैवमपूर्वविधित्वात्काठके ॥ स्नातः यथाह जागृतः । स्नानमग्न्याधेयाङ्गम् । अहते वाससी नवे उभयोर्दम्पत्योर्भवतः । वाग्यतौ नियमितवाचौ । अरणिपाणी पाण्योररणी गृहीत्वा । द्विवचनादेक उत्तरारणिं यजमानो गृह्णीयात् । अधरारणिं पत्नी ॥ ३ ॥ ४ ॥

---

१-२ ० घ. । ३-४ अधिकं, घ. इदं ( १६ ) सूत्र भाष्येऽस्ति. ।
५-६ अधिकं, घ. इदमपि ( १६ ) सूत्र भाष्येऽस्ति. ।

अवकाशेऽक्षतान्यवान्पिष्ट्वा मन्थमार्योरयनालम्बमिक्षुशलाकया बहुलम् ॥ ५ ॥

हिरण्यपाणिꣳ सवितारꣳ वायुमिन्द्रं प्रजापतिम् ।
विश्वान्देवानङ्गिरसो हवामहे
अमुं क्रव्यादꣳ शमयन्त्वग्निम् ॥

इति मन्थेनाग्निमवसिञ्चति ॥ ६ ॥

---

'अवकाशे' उपव्युषसि अक्षताननवहतान यवान् पिष्ट्वा यन्त्रकादौ मन्थनार्यात्युदके यव-चूर्ण-तूलं प्रक्षिप्य कुण्डादौ अनालम्बमवलम्बनरहितमिक्षुशलाकया आह्वालयतीत्यर्थः । द्रवद्रव्यसंपृक्तेषु सक्तुषु मन्थशब्दः प्रसिद्धः । इह तत्सादृश्यान्मन्थ उक्तः । बहुलं प्रभृतम् ये तु तूष्णीं पवित्रे उत्पाद्येत्यादि-स्थालीपाकधर्मेण मन्थं कुर्वन्ति तेभ्यो नमः । पाद्यार्घमधुपर्कादिषु तेषां पवित्रोत्पत्त्या नूनं विस्मृतम् । इतरथा अपि यस्मिन् गिरं को नाम येन मूढः । असंपदे अप्रकृतिविकारे हविर्धर्माश्रयात् ॥ अवकाशे-अवकाशे अवगमे प्रकाशे । अस्तंगते सवितरीत्यर्थः प्रेतपितृकस्यान्ते निर्हरणं विधीयते । स च यथा पिता दिष्टां गतिं गतस्तथा पित्रग्निरपि मन्थे[न्थने] नानुगमनीयः । एवं चास्तं गते सवितरि युक्तम् । संहरणात्मको मे कालः । अक्षतान्यवान्पिष्ट्वा । मन्थमार्याति करोतीत्यर्थः । अनालम्बं मशरीरिणा । अत एवेक्षुशलाकोक्ता । एतच्च दशमे हनि सायं कर्त्तव्यमर्थादत एव तस्य साधारणमुक्तम् । बहुलं पूर्वो ? भृ(प्रभृतम्) ॥ ५ ॥

'हिरण्य' अनेन मन्त्रेणावसेचनमुपशमनार्थम् । अग्नेः सोमो राजाऽनेन समारोपणमुपशान्तस्याग्नेः । कटे वा वीरणमये कृतायां कच्छादिमध्यां कच्छाकारायामुपधानम् । एतस्माच्च मन्त्रलिङ्गादावसथ्यस्यैव प्रतिपत्तिः । नहि लौकिकस्याग्नेः स्थाने हविर्वहनोऽग्निराशास्यते प्रहिणोति क्रव्यादमिति मन्त्रेण लिङ्गादग्निमादाय दक्षिणा प्रत्यग् हरन्ति । अग्निमादा-

---

१ मा, ख. घ. । २ ० घ. । ३-६ ० घ. । ४ मिथ्विय, च. । अभिम्वीय, ग. । ६-७ अधिकं, घ. ।

सोमो राजा विभजतूभाग्निर्विभाजयन् ।
इहैवास्तु हव्यवाहनोऽग्निः क्रव्यादं नुदस्व ॥

इति कटे कृताया॰ साग्नि॰समारोप्य प्रहिणोति ॥ ७ ॥

क्रव्यादमग्निं प्रहिणोमि दूर॰ यमराज्यं गच्छतु रिप्रवाहः ।
इहैवायमितरो जातवेदा देवेभ्यो हव्या वहतु प्रजानन् ॥

इत्यग्निमादाय दक्षिणा प्रत्यग्हरन्ति ॥ ८ ॥ सहाधिकरणैर्यन्ति ॥ ९ ॥ स्वकृत इरिणे—

सीसे मलिम्लुचामहे शिरोमिमुपवर्हणे ।
अव्यामसितायामृष्टास्तं प्रेतसुदानवः ॥

इति सीसमुपधान्येन्यस्याध्यधि ॥ १० ॥

---

येति प्रहिणोतेरेवेतिकर्तव्यता । अस्मादपि मन्त्रवर्णात् । हविर्वहनस्थाने हविर्वहनाग्नेः प्रार्थना । त्रेताग्न्यायतनैः संयुक्तं न युक्तेत्यर्थः ॥ हिरण्य– अनेन मन्त्रेण मन्थेनाग्निमवसिच्य । सोमो राजाऽनेन मन्त्रेण कटे अग्निष्ठं कृत्वा समारोप्य प्रतिगृह्य प्रहिणोति नयेदित्यर्थः। क्रव्यादमग्निमनेन मन्त्रेण दक्षिणप्रतीचीं दिशं हरेयुरित्यर्थः । सहायतनैः त्रेताग्नीनां ये आयतनास्तैः संयुक्तमित्यर्थः । बहुवचनात्पुत्रैः सह कर्तव्यं सत्रिवत् ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

'स्वकृत इरिणे' सीसे मलिम्लुचा मह इति इरिणे स्वकृते इति कटे उपधाने निमित्तसप्तमी । उपधानार्थं सामान्यार्थेत्यर्थः । अथवोपधानस्थाने उत्तरशीर्षके सीसे न्यस्याध्यधि। अध्यधि सिसे सीसस्य समीपे साधिकरणेऽग्निं करोत्यस्ये त्यर्थः। सीसमिति कारकं चैतस्यान्यस्यशब्देन संबध्यते। अध्यधिशब्देनोपपद- विभक्त्या द्वितीया उभयत्र समाना. अर्थमात्रे भिद्यतेऽन्यस्याग्निमध्यधि सीसम् ॥ सीसे अनेन मन्त्रेण सीसमुपधाने उपधानस्थाने न्यस्य क्षिप्त्वा अध्यधि उपर्युपरीत्यर्थः। तेनोपधानदेश उपसीसं तस्मिन्नुपर्याग्न्यायतनास्तेषामुपरितनं विविक्तमग्निमित्यर्थः ॥ १० ॥

---

१ निष्ठा, ग. । २ पन्ती, छ. । ३–४ अधिकं, घ. । ५ कण्ठे, ग. घ. । ६ र. ख. च. । ७ उत्तशीर्षके, ख. । ८–९ अधिकं, घ. ।

धाम्नो धाम्न इति तिसृभिः परोगोष्ठं मार्जयन्ते ॥ ११ ॥ अनपेक्षमाणाः प्रत्यायन्ति ॥ १२ ॥ नलैर्वेतसशाखया वा पदानि लोपयन्ते—

मृत्योः पदानि लोपयन्ते यदैतद्राघीय आयुः प्रतिरं दधानः।
आप्यायमानाः प्रजया धनेन शुद्धाः पूता भवन्तु यज्ञियासः ॥१३॥
अनड्वाहं प्लवमन्वारभध्वं येनावेपत्सरमा रपन्ती ॥ इति ॥१४॥

'धाम्नो धाम्न इति' तिसृभिर्मार्जनम् । परस्ताद्गोष्ठस्य परोगोष्ठमित्यव्ययीभावात् । अन्येनोक्तम् । नास्याग्निं गृहाद्धरेयु र्नान्यत आहरेयुरिति विनियोगादन्योऽग्निरवशीर्णे प्रत्यवायोस्तीति गम्यते स तापपाकदीपार्थः स्यात्तस्येदं निर्हरणविधानमिति न वाऽऽचार एवं प्रत्यहमन्यत आहृत्याग्निपचनं कुर्वन्तो दृश्यन्ते । न च लौकिकाग्निविषयमेतल्लिङ्गक्रमाच्च आह्नोदनिकविषयत्वेन व्याख्यातमन्येनं ॥ "धाम्नो धाम्न इति तिसृभिरिति स्त्रीलिङ्गनिर्देशात्तिस्र ऋचो ज्ञेयाः । यथा धाम्न इत्येका, उदुत्तमं वरुणं पाशमित्येका, सुमित्रान आप इत्येका । एतास्तिस्र ऋचो ज्ञेयाः । परोगोष्ठं परस्य द्वेष्यस्य यं (?) गोष्ठं स्थानं तं मार्जयन्ते तत्र मार्जनं कुर्यादित्यर्थः" ॥ ११ ॥

'अनपेक्ष' नलैर्वेतसशाखया पदान्यागच्छन्तो लोपयन्ते श्लिष्टं कुर्वन्ति मार्जनादेशात् । मृत्योः पदमग्नौ पादन्यामचिन्हेन । मृत्युरन्तरमादिभ्यः प्रायेण पदानि लोपयन्तीत्यर्थः । यदेतद्राघीयलोपनमन्त्रो मन्त्रवर्णाद्धारसुमुकामा लभ्यामवत ? गच्छेत् ॥ "ईरणादप्रतीक्षमाणाः परं देशं प्रत्यायन्ति । नलैः—नडमयैस्तृणैर्वेतसवृक्षशाखया वा पदानि पदमुद्राणि भूमौ लोपयन्ते उन्मृजन्तीत्यर्थः । मृत्योः पदमित्यनेन मन्त्रेण, अनड्वाहमित्यनेन मन्त्रेण लिङ्गादागता अनड्वाहमालभन्त इति चेत् ?" ॥ १२ ॥ १३ ॥ १४ ॥

१ वेक्ष, ग. च. । २ या, ग. च. । ३ त, ग. च. । ४–५ ० घ । ५ मन्यने. ख. । ६–७ अधिकं, घ. । ८ मग्नोतपद, ग च । योऽपद, घ. । ९–१० ० घ. । ११–१२ अधिकं, घ. ।

अग्न्यायतनमुद्धत्यावोक्ष्याग्न्याधेयिक्यान्पार्थिवान्संभारा-न्निर्वपत्यूषसिकतवर्जम् ॥ १५ ॥ अरणिभ्यामग्निं मथित्वा हिर-

'अग्न्यायतन' शब्दार्थस्तस्याग्नेरायतनं स्थानं गम्यते। उद्धृत्य खात्वा वोक्ष्य इत्यादि अग्न्याधिक्यान् पार्थिवानित्यर्थाद्वानस्पत्यस्य पार्थिवत्वेऽपि व्यवच्छेदः। अपां तु नित्यं पार्थिवत्वं पृथिव्यापस्तेज इत्यनन्तभेदात्। भूतानां पृथिवीस्थानाद्वा पार्थिवा आपः। उषसोऽपार्थिवत्वात्प्रानि(ति)षेधः। तूष्णीं निर्वापपूर्वविधिः। उदकवराहविदूंवल्मीकवपाशर्कराखुकिरयो ऽत्र संभाराः। इह केन चिदुक्तं ततो यथार्थिकर्मसंनिपातो विज्ञेयः। इति प्रागुदञ्च-नक्षत्रावसरे स्यात्तदा तद्विरोधाभावान्निमेध्याभिमुखं प्रणयेत् प्रसङ्गाच्च। उन्मत्तव्याख्यानं तस्य प्रागुदञ्चमित्याद्यनुपपन्नमाशङ्क्य स्थालीपाकवत्तया परिहारान्न सम्यगवबुद्धम् ॥ अग्न्यायतनमग्न्याधेयक्षेत्रमुद्धृत्य लक्षणं कृत्वा अवोक्ष्याभ्युक्ष्याग्न्याधेयिकान्पार्थिवान् संभारानित्यग्न्याधेये ये उक्ताः। पार्थिवग्रहणं वानस्पत्यनिरासार्थम्। तत्राप्युषसिकतवर्जम्। उषाः सिकताश्च पार्थिवत्वात्प्राप्ताः प्रतिषिध्यन्ते। तेषां च निर्वापे ते च समन्त्रा भवन्त्येव गुणत्वान्मन्त्राणाम्। तथा च यत्र मन्त्रं नेच्छति तत्र प्रतिषेधं करोति। तथा तूष्णीं स्रुक्स्रुवौ संमृज्येति ॥ १५ ॥

'अरणि' ननु कथमाशङ्काऽरणिभ्यामेवमन्थनं स्यात्तत्पाणि जाग-रणं स्यात्। उत्तरार्थोऽनुवाद इत्यदोषः। हिरण्यशकलं नात्र अलग्नो हिरण्य-निर्वपणम्। अरणिभ्यामिति यावदुक्तार्थत्वानुवादात्। उपस्थकृतस्तिर्यग् जानुरित्यर्थः। गौर्वासः—कांस्यम्। गवादीनां वाक्यानुपूर्व्या दानदक्षिणा अन्विक्कर्तृकत्वं गम्यते। प्रागुदयकालातिक्रमेऽनाम्नातप्रायश्चित्तसङ्गत्वात्। प्रधानकालस्यातिक्रमे महान्दोषः। प्रधानकालः प्रेते पितर्यग्न्यादि यत्र विधाने शालाग्निविधानयोः परस्परकर्मव्यतिषङ्गविधानं कालत्वाद्वा ( दौ ) विध्यर्थं तत्वङ्गसंबन्धार्थमत एव केन चित् पक्षान्तरमुक्तमन्यत्र ततः शालाग्निवि-धानात् मन्थविधानमित्यपवादाशङ्का इति।

ण्यशकलं च न्युप्य प्रागुदयादुपस्थकृतो भूरिति ज्वलन्तमादधाति ॥ १६ ॥

ध्रुवमत्र्यन्यथा व्याचष्टे–आवसथ्याधानं किमयं विधिः । आहोस्विन्नियमः । उत स्वित्परिसंख्या ? । तत्र विधिरप्राप्ते भवति यथा यावज्जीवमग्निहोत्रं जुहोति इत्यादि सर्वत्र । तस्मिन्प्राप्ते सति पाक्षिकस्य पुनर्विधानं नियमो–यथा व्रीहिभिर्यजेतेत्यादि व्रीहिभिरेव नान्यैरित्यर्थः । न गोधूमादिभिः ॥ परिसंख्यार्थः प्राप्तस्तस्य निषेधः–यथा " इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते " गर्दभरशनां परि-संचष्टे । यथा वा पञ्च पञ्चनखा भक्ष्या इत्यादि अर्थित्वात्सर्वपञ्चनखभक्षणे प्राप्ते श्वाविट् गोधा शल्यकमित्यतोऽन्येषां भक्षणप्रतिषेधः ॥ तत्रैवं सति यदि विधिस्ततः प्रेतपितुर्विशिष्टस्याधिकरणे शालाग्निकरणं विधीयते । अथ वा नियमस्ततः सर्वस्य जीवत्पितृकस्य मृतपितृकस्य पुरुषार्थत्वात्प्राप्तौ सत्यां प्रेतपितुर्नियम्यते प्रेतपितैव शालाग्निं कुर्यान्न जीवत्पितृक इति ॥ अथ परिसंख्या ततो जीवत्पितृकस्य प्रतिषेधो मृतपितृकस्य तु न विधिवत्प्रतिषेध इति तस्य कामचारः कुर्याद्वा न वेत्यर्थः । तत्र विधिरयं तेन भवति ॥ यतो जातस्यैव मथितोऽन्यानयनमुक्तमरणिभ्यामग्निं मथित्वा तस्मिन्नायुष्यहोमः । जुहोत्यादि यावद्विवाहः ॥ तथा च विवाहे पुनरुक्तमग्निं निमथ्याभिमुखं प्रणयेदिति न परिसंख्या शास्त्रीयत्वाच्छालाग्निकरणस्य । न हि भोजने पुरुषार्थत्वात्प्राप्तिस्तदेव परिशेषान्नियमोऽयं कामचारप्राप्तस्य पक्षे सर्वदा नियमः । यथाऽऽग्नेयोऽष्टाकपालः पुरोडाशो भवतीत्यत्र सर्वपुरोडाशप्रकृतित्वेनैवेति । अस्य तु शालाकरणस्य शास्त्रीयत्वात् कुतोऽन्यतः प्राप्तिर्यतोऽयं नियमः स्यात् । उच्यते-अस्ति प्राप्तिः पुरुषार्थत्वादेव कथं शास्त्रीयस्य पुरुषार्थत्वं न हि शास्त्रीय ( : ) पुरुषार्थो भवति पुरुषार्थो वा शास्त्रीय इति किमिति विरुद्धमभिधीयते । शास्त्रीयं पुरुषार्थश्चेति । नैवेदं ( दं ) विरुद्धमभिधीयते । अनभिज्ञो देवानांप्रियः । पुरुषस्य त्रिवर्गो हि पुरुषार्थः । त्रिवर्गमध्ये धर्मः पुरुषार्थत्वेन कथ्यत एव । इयांस्तु विशेषः शास्त्रावगतस्यैव धर्मत्वं तथा चोक्तं " चोदनालक्षणोऽर्थो धर्म " इति अर्थकामौ तु लोकतोऽवगम्येते तदेवं सर्वो जन्तुः पुरुषार्थत्वाद्धर्मं प्रति प्रवर्तते । सर्वदा प्रवृत्तौ प्राप्तायां प्रेत-

१–३० घ । २० ख. च. ।

पितृकस्य नियम्यते प्रेतपितैव शालाग्निं कुर्यान्नेतरः । यद्येवं कथं तर्हीदमुक्तं यदि दद्यात्—" येभ्य एव पिता दद्यात्तेभ्यो दद्यादिति " पिण्डपितृयज्ञे । अनेनाभिप्रायेणोक्तम् । यदा पित्रानुज्ञातस्तदा शालाग्निं करोति । अत एव विवाहप्रकरण उक्तम्—" न जीवन्पितृकोऽर्घं प्रतिगृह्णातीति " श्रुतिः । अथवा प्रतिगृह्णाति किमनेनोक्तं भवति तस्मात् स्थितये तन्नियमार्थमेतदिति । एवं च जीवति पितरि यदि न करोति न ततः शास्त्रातिक्रमः । पित्रानुज्ञातस्य करणेऽभ्युदयस्तु भवत्येव । प्रेते पितर्यकरणात्प्रत्यवेयादित्यलं बहुनोक्तेन ॥


औद्वाहिकमिति किमर्थं यावता नह्यौद्वाहिकः शालाग्निरिति । अन्य औद्वाहिकः । अन्यश्च शालाग्निः । एवं तर्हि औद्वाहिकं शालाग्निं कुर्वीतेति ब्रुवन्नेतद्दर्शयति यद्यौद्वाहिकेऽरणिभ्यां मथित्वोद्वाहः कृतस्ते न परित्यक्तव्ये । अत एवोक्तं यस्याभिर्यस्यौद्वाहिक एव फलस्नानर्मासन्तोन्नयने न कर्तव्ये ॥ ननु न पुनरपि कथमुपपद्यते ? यस्यौद्वाहिक एवाग्निः तस्मिन्नेव गार्ह्यं कर्म वैश्वदेवादि कर्तव्यं प्रेते पितरि किं शालाग्निविधानेन अत्रोच्यते । औद्वाहिकं शालाग्निं कुर्वीतेति वदन् मुख्येऽसंभवात्तदङ्गं पशुयागे निवेशः । एवं च यः कश्चिदाह अर्वादनं भवति न भवतीति च तत्प्रत्युक्तम् ॥ अन्यत्र तत इत्यादि जागरयेयुरित्यन्तम् अन्यत्रान्यस्मिन्देशे ततस्तस्माद्देशाद्यत्र न पिता । गुरु । ग्निगतीन् प्रेते पितरि सति प्रज्वलन्तं जागरयेयुरित्यर्थः । [illegible] [illegible]-त्वापेक्षया ॥ पर्वणि पर्व पौर्णमास्यमावास्या ज्योतिः शुक्लपक्षः [illegible] मनुकूलं शुभमाधाननक्षत्रं नवमीं तिथिं वर्जयित्वा । [illegible] प्रेतपितुरधानमेव ज्ञेयम् । जीवत्पितुरवस्थं भवति स्नाता यथाह—[illegible] [illegible] स्नाते वासमी नवे उभयोर्दम्पत्यो भवत । दम्पती [illegible] पाण्योररणी गृहीत्वा [illegible] उत्तरार्ध्ये यजमानो [illegible] । [illegible]-गार्हणि पत्नी । 'अवकाशे' अवकाशोऽवगते, [illegible] प्रेतपितृकस्यान्ते निरिन्द्रं निर्धीयते [illegible] पित्राग्निरपि सम्बन्धेनानुगतत्वात् । एवं [illegible] -न्मको मौ कालः । [illegible]

**गौर्वासः काᳲस्यं च दक्षिणा ॥ १७ ॥ इति द्वितीयपुरुषे प्रथमः खण्डः ॥ १ ॥**

धर्मप्राप्त्यर्थमुत नेति विधिः सर्वप्राप्त्यर्थं ततः संभार्यकर्माद्यपि प्राप्नोति । अथ न ततोनर्थकं स्यादुच्यते । नानर्थकं न च सर्वधर्मप्राप्त्यर्थं किं तर्हिपूर्णाहुति ( तौ ) यजमानोपस्थानं समिधोग्न्याधेयेष्टीरन्वारम्भणीयाश्च भवन्तीति । एवमर्थं भूरितिवचनाद् गार्हपत्यधर्मा भवन्ति । सदा कर्म तु आहवनीयात्सभ्यमिति वचनात् सभ्यं न तावद्भवति तदभावात्सभ्यंकर्माभावः । कृष्णलेष्ववघातस्येव । एवं च कस्यचिदर्थादधः (!) कस्यचिद्वचनस्य प्रत्याम्नायादिति यथायोगं लक्षितव्यं ग्रन्थविस्तरभयान्नोक्तम् ॥ १६ ॥

'गौर्वासः' गवादेर्दक्षिणाविधानादग्न्याधेयदाक्षिणानिवृतिः ॥ व्याख्यातं मया भट्टाष्टावक्रदेवेन पुनरुक्तमपि किंचिदत्रास्ति तदर्थागतमिति न चोदनीयः ॥ १७ ॥

इति पूरणव्याख्याने द्वितीयपुरुषे प्रथमः खण्ड ॥ १ ॥



# द्वितीयः खण्डः

—•—

प्रागुदक्श्रं लक्षणमुद्धत्याभ्युक्ष्य स्थण्डिलं गोमयेनोपलिप्य मण्डलं चतुरस्रं वाग्निं निर्मथ्याभिमुखं प्रणयेत् ॥ १ ॥

'प्रागुदक्श्रं' लक्षणं मण्डलं चतुरस्रं वा स्थण्डिलं गोमयेनोपलिप्य। उद्धत्याभ्युक्ष्य लक्षणं कृत्वा प्रागुदग्रेखाभिरामेण ग्रन्थान्तरदर्शनात्। तत्र प्राच्यो रेखा उदीच्येका प्रथमा। अन्यस्तु ते गृह्यान्तरगणिता यतः स्थापि- शिष्ट एव युक्तम्—

रज्जुः शयार्द्धपञ्चा[सा]साङ्गुला तनु( र )याज्ञिकी

चतुर्षु षडङ्गुलोनेषु लक्षणमाह—सार्द्धे च शये समाकेन्यन(:)—

षडङ्गुल्यूनाश्चत्वारः प्राचीपश्चात्त्रयः शयाः ।
पूर्वार्द्धेऽर्द्धतृतीयाः स्युः सा वेदिः पाकयाज्ञिकी ॥

अपिवा—राज्यङ्गुलं शयमित्वा(ना) सर्वतः परिलेखयेत् ।
धिष्ण्याय(म्) तत्र प्रकुर्वीत यवोनानि चतुर्दश ॥
खण्डमण्डलयोश्चैव त्रिभागमवशेषयेत् ।
खर-प्रमाणा रेखाः स्युरुदीची प्रथमा भवेत् ॥
पञ्च प्राच्यस्ततो लेख्या दक्षिणे चोत्तरेण तु ।
दक्षिणे चोत्तरे चान्ये तयोर्मध्ये तु पञ्चमी ॥
लेखानामनुपूर्वेण देवताः संप्रकीर्त्तिताः ।
पृथिव्यग्निश्च वायुश्च सोम इन्द्रः प्रजापतिः ॥
लक्षणे तु कृते तस्मिन्नग्नेः प्रणयनं भवेत् ।

इति तत्र रज्जुस्तावत् कर्त्तव्या अर्द्ध(:) पञ्च(:) यस्याः सा सार्द्धपञ्च- शया इत्यर्थः। साङ्गुला अङ्गुलेकेनाधिका तनुस्तन्वी नातिस्थूला याज्ञिकी यज्ञियतृणमयी कुशमयी मुञ्जमयी वा चतुर्षु षडङ्गुलोनेषु लक्षणचतुर्षु प्रकृतत्वात् शयेषु षड्भिरङ्गुलैरूनेषु लक्षणं चिन्हं कुर्यादितिक्रियापदस्या-

ध्याहारः । लक्षणमिति केचिन्न पठन्ति तदा लक्षणमर्थाद्बोद्धव्यम् । सार्द्धे शये द्वितीयं सपादे तृतीयम् । षडङ्गुलू(लो)नाश्चत्वारः शया यस्याः सा तथा तथोक्ता वेदिरिति पश्चात्पश्चार्द्धे त्रयः शया यस्याः सा पूर्वार्द्धे पूर्वस्मिन्देशेर्द्ध- तृतीयो यस्याः सा तथोक्ता सा वेदिरिति सा एवंविधा पाकयज्ञिकी पाकयज्ञेषु भवतीत्यर्थः ॥

**द्विगुणा शतसाहस्रे कोट्यां पञ्चगुणा स्मृता ।**

केचिदेतत्पठन्ति—शतसाहस्रे लक्षहोमे । कोट्यां कोटिहोमे सावित्री- कल्पे भवतीत्यर्थः । अपि वा सन्यङ्गुलमिति सुबोधाः । धिष्ण्यन्त आयतनं तत्र तस्यां वेद्यां प्रकर्षेण प्रयत्नेन कुर्यादित्यर्थः किं परिणाममित्याह— यवेनोनानि चतुर्दशाङ्गुलानि मित्वा यवश्चतुर्भागोऽङ्गुलस्यावयवशब्दत्वात् सन्यङ्गुलमिति अङ्गुलशब्दप्रकृतत्वाच्च चतुर्दशाङ्गुलानि ज्ञेयानि सर्वतः परि- लेखयेत् । प्रकृतत्वात्सर्वतः परिलेखमुल्लिखेत् । खण्डमण्डलयोश्चेति खण्ड- शब्देन वेदिरुच्यते । तयोरन्तरे खण्डं कृत्वा मण्डलमिति परिवर्तुलं द्वितीय- मुच्यते तयोस्त्रिभागं तृतीयं पश्चादविशेषयन् खरं कुर्यादित्यर्थः । खरप्रमाणाः खरसामान्याः शेषं सुबोधम् । एवमुक्ते लक्षणे सति किमिति गृह्यान्तरदर्शन- मुपन्यस्यते । अरे एतदेव तत्र तत्राह प्राचीनं मध्यमाद्वंशादपरान्हे लक्षणं करोति इत्यादावत एव चेह सूत्रितं 'स्थण्डिलं गोमयेनोपलिप्य' मण्डलं वर्तुलं चतुरस्रं वा चतुःकोणं चेत्युभयदा(था)लक्षणार्थमिति मयैवाभिहितम् । अग्निं निर्मथ्य विद्यमानेऽग्नौ मन्थनमयुक्तम् । सोमे अदृष्टार्थं चेन्सर्वस्थाली- पाकेषु स्यात् । एतेन स्थालीपाकातिदेशाद्वक्ष्यमाणं चानुमहदग्नावेवं विधानेन मन्थनार्थं वचनं स्थालीपाकस्याप्यस्य रूपम्वतीव प्रायश्चित्तत्वं स्यात् ॥ नाप्युध्धृत्याग्निं पुनर्लक्षणकरणाभिमुखं प्रणयनं मन्थनस्यापि योगशिष्टत्वं- (ष्टं तु) प्रणयनं पुनरेव स्यात् । अस्माच्छालाग्निकरणात् । शालाग्निविधा- नानन्तरमेव प्रागुदञ्चमित्यादि. युक्तं चैतद् दक्षिणादानानन्तरमेव पूर्वम् । इष्टं तु द्वितीयदेशसंस्कारादि पुनर्मन्थनप्रणयनयोरग्नेयस्य स्थालीपाकस्य च प्रकृतत्वादग्न्याधेयत्वादग्नेः(:) यद्यत्र तुल्यकार्यत्वाद्विकल्पः पूर्वेणाप्यग्निः सं-

---

१-२ ८ ग. । २-८ च । ३ मण्डलं मण्डलम्. ग. च ।

स्मिंगते दक्षिणादानपर्यन्तेन प्रागुदङ्क्षेति समुच्चयाद्वाग्निभानां तु न कल्प्यते लभेते यत्रा ? शुद्रभावस्याग्निमन्थनदर्शनात् । न मध्यग्न्यवस्था यदि एका-दशेऽन्हि प्रागुदङ्क्षविधानेनाग्निं निष्पाद्य प्राग्वा ''' दि कुर्यात् पूर्वेविधानं स्यात् । पूर्वविधानेनाग्न्येकादशेऽन्हि स्यात् । स्मृत्यन्तराच्छा(द्वाद)शे वा स्यादि-यागां ( ? ) ( द्विवगे ) अपरान्हे तु नित्यगेत् । ब्राह्मणं निमन्त्रयेत् तत्र चतुः प्राश्यं च कारयेदिति । अथ वा जागरणमात्रस्यैव बाधः । प्रधानकाला-नुग्रहात् यथा सद्यः कालया पौर्णमास्या यजेतेति पर्वणीत्यादावपरिणपागी जागरणस्यार्थवत्त्वं द्वादशेऽहनि इति तर्हिग्राख्यातवान् वाग्यता नाम काचिद्वर्हि-ग्रन्थान्तरत्वात् । अत्रैव किमिति न स्यात । द्वादशेहनि श्राद्धविधानादेकादशे-हन्येवस्याद्विकल्पो वा द्वादशेहनि श्राद्धं विदधद् ज्ञापयते आदशाहं यावत्र-याणामेव वर्णानामाशौचं स्यादेकादशेहनि श्राद्धादेरुत्कर्षात्स्मृत्यन्तरविरो-धान्नेति चेत्स्मृत्यन्तरमनुसरति । एकादशेऽहन्येव स्याद्विकल्पो वा द्वादशेहनि श्राद्धं विदधदेवं ज्ञापयति । नास्त्येकान्ते जन्माग्निधारणमितरथोद्वाहिके तन्मते श्राद्धं महायज्ञश्च । एकादशाहवदन्यस्मिन्काले न स्युः । ततश्च जीव-त्पिता नोद्वाहिकं धारयेदेकादशेहनि श्राद्धादेरदर्शनात् कर्मप्रयुक्तत्वावधारणं तेषु विकारात् कुतस्तादिति येनोक्तमेकादशेन्हि यन्मामान्तमग्निद्रयस्यावां वा कुर्यात्तस्य श्राद्धवेलायां किमसौ काके ( कैर् ) भक्षितो न च द्वादशे हनीति नियमार्थं साग्नि श्राद्धाधिकारित्वं तु परार्थत्वात् । राजन्यवैश्ययोरपि प्रसङ्गात् । अन्यस्तु अग्निमन्थनं प्रवचनवद्दर्शयति । यदि यथा श्रोत्रियो दर्शपौर्णमास-योराहवनीयस्योद्धाराङ्गभूतयोः सान्तयोरग्निमन्थनं तेन यथातन्त्रोक्तमुव त्स्वशने भुक्ते गार्हपत्यादाहवनीयं ज्वलन्तं प्रणयतीति यथागत्रिनिर्मथ्या-भिमुखं प्रणयेदिति प्रथमोर्द्ध्वं लुप्यते येन स्थालीपाकानां ते[3] प्राप्नोति भवतु को दोषः । यथा तत्र सर्वेषां विकृतीनां पवमानेष्टिप्रभृतीनामाहवनीयस्यो-द्धारः । एवमिहापि सर्वविकृतीनामग्निमन्थनामिति को विरोधः । अदृष्टार्थ-त्वप्रसङ्ग इति चेत्तत्र तर्हि का वार्त्ता तस्माद्यथाहवनीयस्योद्धारः । एवमि-हापि सर्वप्रसङ्गेन । यस्तु ? मौनवददृष्टार्थत्वमाशङ्कि तैन्न तर्हि मिथ्यावद-त्रा(?)ग्निं मथित्वा अग्नेः प्रक्षेपः । अपि तु लक्षणमुद्धत्यावोच्याग्निं मथित्वा

---

१–९ ० ग. घ. | २–० च. | ३–० ख. | ४ तत्र तर्हि मिथ्याघदरात्राग्निम्, च. |

दर्भाणां पवित्रे मन्त्रवदुत्पाद्याग्नेयꣳ स्थालीपाकꣳ श्रपयति ॥ २ ॥

---

प्रणयेदित्युक्तं यथानुष्ठानं दृश्यते लोके तत्र किं वयं कुर्मः कमुपालभते ॥ शास्त्रस्यार्थस्तावदीदृग्विज्ञायते नापि लोकस्य शास्त्रविरुद्धमनुष्ठानं यतस्तत्रापि नित्यधारणमस्ति तथा चोक्तं च शुश्रुवान् ब्राह्मणो ग्रामणी राजन्यो बहुपुष्टो वैश्यस्तेषां नित्यधृत इति । एवं यथा तत्र नित्यधारणं तथेहापि भवतीति न कश्चिद्विरोधः । अत एव पौर्णमासी पूर्वोयुक्ता यागे तथाऽमावास्यायामिति प्रागेवोक्तम् । पूर्णत्वमप्युपवासपौर्णमासीमदर्शनेऽमावास्यायामित्यभिधाय पुनरुक्तं पूर्णे चन्द्रमस्युपवसेत्पौर्णमासीमदर्शनेऽमावास्यामुपवसेत् । पूर्वे च पौर्णमास्यमावास्ययोर्ये पूर्वे तिथी चतुर्दश्यौ तयोश्चोपवसथं कुर्यादित्यर्थः । एवं च कृत्वा शालायां पौर्णमास्य(स्याम)मावास्यायां दर्शपौर्णमासौ कुर्वन्ति । यस्तु (येतु) शाखान्तरीये नानुतिष्ठन्ति मैत्रायणीयानां चोपालम्भं कुर्वन्ति ते श्रोत्रिया वराकाः कुतः सम्यक्शास्त्रार्थपरिज्ञानं तेषामथपरस्परयोः शास्त्रार्थानुष्ठानं तेषां यत एवं श्रूयते–दर्शेऽदर्शने यजेत । पौर्णमास्याममावास्यायां यजेतेति पूर्वा चापौर्णमास्यमावास्ययोर्दर्शपौर्णमासौ कुर्वन्ति । यस्तु शाखान्तरीयलोके प्रसिद्धेऽन्तरा प्रतिपदिश्च ? लोकः । खा ? । तदेवं पौर्णमास्यां यागार्हायामग्न्याधानादि उपक्रम्य प्रतिपादितमथ वा चतुर्दश्यामुपक्रम्य पौर्णमास्यामेव प्रधानानुष्ठानमिति श्रुत्यर्थमनुष्ठितं भवति इति भगवता मानवकेनोक्तम् । पूर्वे चेति नाम चित्रो यूपस्य स्वरूं कुर्यादितिवत् ॥१॥

'दर्भाणामिति' षष्ठी दर्भास्तरणे यः पाश्चात्येभ्यः पवित्रे समे प्रदेशमात्रे छिन्नाग्रे दर्भेण छिनत्ति वैष्णवे स्थ इति मन्त्रोऽधीयत इति मन्त्रग्रहणे च पूर्ववत् । अन्यस्तु ओषध्या व्रीह्यादिना मन्त्रवद्ग्रहणादिहान्यत्तूष्णीं दार्शपौर्णमासिकं भवतीति दर्शयति । आग्नेयमग्निदैवत्यं स्थालीति गृह्यसंबन्धात् स्थाल्यां पच्यते स्थाल्यामिव वा पच्यत इति स्थालीपाकं श्रपयति । अन्यस्तु गृह्ये स्थालीपाकः । एव भवति नतु पुरोडाश इत्युक्तः स्यादिति ॥ २ ॥

---

१–५ ० घ. । २–३ ० ग. च. । ४ पुनस्तद् . च. । ६ कं तन्त्रं, घ ।

पवित्रान्तर्हितेऽप आनीय तण्डुलानोप्य मेक्षणेन प्रदक्षिणं पर्यायुवञ्जीव तण्डुलꣳ श्रपयति ॥ ३ ॥ घृतेनानुत्पूतेन नवनीतेन वोत्पूतेन शृतमभिघार्योत्तरत उद्वासयति ॥ ४ ॥ इमꣳ स्तोममर्हत इत्यग्निं परिसमुह्य पर्युक्ष्य परिस्तीर्य पश्चादग्नेरेकवद्बर्हिस्तृणाति ॥ ५ ॥ उदक्प्राक्तूलान्दर्भान्प्रकृष्य दक्षिणाꣳस्तथोत्तरानग्रेणाग्निं दक्षिणैरुत्तरानवस्तृणाति ॥ ६ ॥ दक्षिण

कथमित्याह–'पवित्रान्तर्हिते' पवित्राभ्यामन्तर्हितमन्तर्धानं पवित्रापवित्रे अन्तर्धायेत्यर्थः । अप उदकमानीयाभिक्ष्य तण्डुलानोप्य प्रक्षिप्य मेक्षणेन प्रदक्षिणं पर्यायुवन् सव्यमाकालयन् जीवतण्डुलमीपन्मिश्रं श्रपयतीति वाक्यपूरणार्थं पुनरुक्तम् । अन्यस्तु जीवतण्डुलमिति जीवसंयुक्ता व्रीह्यन्तःस्थिताः सन्तः प्रसवसमर्था न तु दग्धबीजभावा अबीजभावा अन्यन्तता उदकोदधिनाथाः खलादा स्थिता दग्धबीजभावाय चेत्यर्थयति दुःश्रिते हविषि प्रायश्चित्तं श्रूयते. ॥ ३ ॥

'घृतेनानुत्पूतेन' घृतस्योत्पवनं स्याद्यदि न प्रतिषिध्येत नवनीतेन वोत्पूतेनेत्यन्त्यपठितमुभयशेषमाशङ्क्यते । अन्यस्तु घृते सिच्यमाने आज्यार्थे घृतेनानुत्पूतेनाश्रितमभिघारयेदविद्यमाने तु नवनीते । विद्यमाने च तेन मन्त्रादुत्पूतेनेति वाभिघारयेत् । अनेनैव च न्यायेनाज्ये प्रतिवासयमेव न ते धर्मा विज्ञेयाः । श्रितं श्रपितमभिघार्येत्युक्त्वा उत्तरत उत्तरस्मिन् स्थानेऽग्नेर्देशमुद्वासयति अवतारयति ॥ ४ ॥

'इमं' स्तोमपूर्वसंस्काराग्नेर्ज्योतिष्मादयो ये(य इ)त्यनुग्राहकस्थालीपाका इतरयापप्रकरणे गुणमाह–उदक्प्राक्तूलान्दर्भान् उत्तरान्प्रकृष्टान् दर्शस्थानात् । प्रागग्रान् पश्चार्द्धे स्तीर्त्वा ततस्तरणान् प्रकृष्य प्राक् स्तीर्त्वा दक्षिणान्दर्भांस्तथोत्तरांश्च दर्भान्प्रकृष्य दक्षिणैः प्रकृष्टैर्दर्भैरुत्तरान्प्रकृष्टान्दर्भानवस्तृणाति आच्छादयति । अग्रेणाग्निं प्रकृष्यशब्दात् ॥ ५ ॥ ॥ ६ ॥

'दक्षिणतोऽग्नेः' आसनास्तरणादि स्यात् ब्रह्मणे संस्तरणसंबन्धात् । अपरं यजमानायेति व्यपदेशाद्धिगम्यते मन्त्रकारवत् । स्वयंकर्तृकान्यपि

१–३ ० ग. । २–३ ० घ. । ४–६ ० घ ।

तोऽग्नेर्ब्रह्मणे सꣳस्तृणात्यपरꣳ यजमानाय पश्चार्द्धे पत्न्यै ॥ ७ ॥ उत्तरतः सꣳस्तीर्णे पवित्रे स्रुक्स्रुवावाज्यस्थालीं प्रक्षाल्य सꣳस्तीर्णे द्वे द्वे प्रयुनक्ति ॥ ८ ॥ तूष्णीं दक्षिणात आज्यं निरूप्य मन्त्रवत्पर्यग्नि कृत्वा तूष्णीꣳ स्रुक्स्रुवौ संमृज्यादब्धेन त्वा चक्षुषाऽवेक्ष इति पत्न्याज्यमवेक्षते ॥ ९ ॥

गार्ह्याणि केषांचित्तदपि स्याद्विकल्पे संव्यवसाया वा यदा रिद्धिज्ञा ? स्यात् यत्र शब्दविहितमत्र नित्यं स्यात् न विकल्पः । ऋत्विगभ्यङ्ग इति यथा पश्चार्द्धे । दक्षिणत इत्यधुना प्रदर्शितः पश्चादिति पत्नी स्वयं साक्षात् पश्चात्तस्य कर्त्तृभ्यैः ॥ ७ ॥

'उत्तरतः' अग्नेरिति गम्यते । 'विनोनसादृश्यार्त् ? । संस्तीर्णे पश्चात्संस्तीर्य पवित्रे द्वे स्रुवौ द्वौ स्रुक् च स्रुवश्चेति गृह्यशेपि (विगृह्यैकशेपि) समासः सरूपाणां मध्ये एकशेपोऽस्ति यथा क्षौमे वसानाविति । लोकेऽपि कुस्थाने मयादे (?) रुभयथेति । अन्यस्तु सा-मरक्षणयोः स्रुवेण जुहूर्लक्ष्यते तथा च श्रौते स्रुव (:) जुहूरुपभृद् ध्रुवा इति स्रुवेण सह जुहूप्रयोग उक्तः । एतदेव मनसि कृत्वा स्रुचाविति द्विवचननिर्देशोऽत्र प्रयोग उक्तो भगवता आचार्येण । आज्यस्थाली आज्यधानी प्रयुनक्ति । दृष्टो दारुचिः । तच्च फलताम्रपलाशादिकम् । अष्टसभिधमित्यष्टौ समिधः । ताश्चेध्मसमानवृत्तस्य भवन्ति ॥ ८ ॥

'तूष्णीम्' वाऽऽज्यस्थाल्यादि धर्मपरिप्राप्त्यर्थं तूष्णीं ग्रहणं मन्त्रवत् स्थालीपाकस्य पर्यग्निकरणं गृह्यान्तरादन्वेष्टव्यमनवश्रितस्य हि हविषः पर्यग्निकरणचोदना । अन्यस्तु सामान्येन सर्वबर्हिषामिध्मादीनां पर्यग्निकरणं बोद्धव्यम् । इध्मस्य हविष्टं (ष्ट्वं) युक्तं ब्राह्मण वाक्ये प्रेध्ममुख्यंति प्रहविरिध्म इति मन्त्रपर्यग्निकरणे परिवा जपति परिधिं तूष्णीं स्रुक्स्रुवौ संमृज्य तूष्णीं ग्रहणाद्वेदप्रख्यादिष्वपरादि संमार्जनं प्रक्षेपनं संमार्जनम् 'अदब्धेन त्वा' मन्त्रवदिति वक्तव्ये अदब्धेनेति वैचित्र्यार्थम् ॥ ९ ॥

---

१–२ ० घ. । २ स्ता, च. । ३–४ ० घ. । ५–६ ० घ. । ७–८ ० घ. । ९ दृष्टा दारवी, घ. । १० लं. घ. । ११–१२ ० घ. ।

तूष्णीमधिश्रित्योपाधिश्रित्य पश्चादग्नेरुपसाद्य मन्त्रवदुत्पूयावेक्षते ॥ १० ॥ तेजोसीत्याज्यꣳ यजमानोऽवेक्षते ॥ ११ ॥ आज्यस्थाल्याꣳ स्रुवं निधायाग्रेण स्थालीपाकमन्वायातयत्यपरेण मेक्षणम् ॥ १२ ॥ तूष्णीं प्राञ्चमिध्ममुपसमाधाय ब्रह्माणमामन्त्र्य ओं जुहुधीत्युक्ते दक्षिणेन हस्तेनान्तरेण जानुनी

---

'तूष्णीमाधिश्रित्य' अग्नावाज्यमित्यर्थः। उपाधिश्रित्य तस्मिन्नेवाग्नौ पूर्वार्द्धे भवशब्दात्पश्चाद्बर्हिषी सादयित्वा मन्त्रवदुत्पूयावेक्षतिसमानकर्तृकत्वादध्वर्युरवेक्षते। यद्वा यजमानकर्तृकपक्षोप्यस्ति दर्शयति न वा पूर्वत्वादध्वर्योरवेक्षणं कुतस्तेजोसीत्याज्यं यजमानो वेक्षत इति। सन्नियोगशिष्टो मन्त्रकर्तृविशेषो मन्त्रवदिति वचनादवगम्यते तस्मादवेक्षतेर्ह्यर्थकल्पनातो वरं स्वयंकर्तृकत्वकल्पा (ल्पना) गृह्यान्तरदर्शनात्। अन्यस्तु मन्त्रवदुत्पूयावेक्षते सर्वमध्वर्युकर्तृत्वं यजमानस्य तु तेजोसीत्यनेनैवावेक्षणमुत्पवनं विष्णोर्मनसेत्यादिना श्रौते दर्शनात्। इध्ममुपसमाधाय कुत एतत् यत्प्राञ्चमिध्ममुपसमाधाय वैतसमिध्ममुपसमाधायेति सति गुणविधिपरे वाक्ये इध्मशब्दोनूद्यते इतरथोभयविधाने वाक्याद्भिद्येत तस्मात्प्रकृताविध्मोस्तीति केनचिद्व्याख्यातं तदसत्। नह्यप्राप्तविधानेऽनेन गुणविधौ वा वाक्यभेदो दुष्यति यथागरिणसोद्यन्ते स्थालीपाकस्यामाकति ?। तथा च गृह्यान्तरेषु केषुचित् नैवेध्माः पठ्यन्ते। तस्माद् गृह्यान्तरादिध्मोपसमाधानमात्रमित्यवैम्यहं युक्तं च शाखान्तरादेवोप(य)मं ग्रहणं वैतसमिदमितिविकृतौ दर्शितम्। अन्यस्तु तूष्णीमिध्ममुपसमाधायेति केचित्पठन्ति न केवलमत्र यावत्पूर्वत्रापि पात्रप्रयोगे अष्टादशां दार्विध्ममिति व्याख्यातश्च यया। अत एव विकृतौ दर्शनमुत्पन्नम्। ब्रह्माणमामन्त्र्य ब्रह्मन् होष्यामिति ओं जुहुधि ब्रा(ब्र)ह्मणा एव जुहुधि यज्ञमित्यादि केचिन्नेच्छन्ति प्रकृतिविकारभावादिति सर्वत्रशब्दो ब्रह्मत्वमन्त्रेऽस्ति एषोऽनुज्ञातः सर्वत्रेन्यतोऽत्रापि स्यादित्यन्ये। अन्यस्तु एतस्मिन्नेव वा परत्र व्या ? मन्त्रान्यन्येन व्याख्यानानि। अहं तु व्याख्यास्यामि चरुन्नमचारयत्यपरेण

---

१-२ ० घ. । ३-४ ० घ. । ५ ब्राह्म, घ. । ६ चरुं, घ. ।

प्राङासीन आघारौ जुहोति प्राजापत्यमुत्तरार्द्धे प्राञ्चं मनसा ऐन्द्रं दक्षिणार्द्धे प्राञ्चमेव ॥१३॥ अथाज्यभागौ जुहोत्याग्नेयमुत्तरार्द्धे सौम्यं दक्षिणार्द्धे समावनक्ष्णौ ॥१४॥ युक्तो वह यदाकूतमिति

---

मेक्षणं तूष्णीमिध्ममुपसमाधाय ब्रह्मणानुज्ञातश्चरून्[1]संचारयति श्रितानि[2] पूर्वमुत्तरोत्तरत उद्वासितानि छान्दसो बहुवचनो द्रष्टव्यः (?) विवक्षया वाधिकृत्य यक्षं वा तान्युत्तरतो देशान्तरं संचार्यन्ते प्रयोगप्राशुभावाय तत्र किंचिद्दक्षिणं देशं नयन्ति । केचिदाहुः स्रुक्स्रुवाणां पश्चात् स्थाप्यते श्रौते यथा दर्शनात् तथा च तत्रोक्तमपरेण स्रुक्[4] दण्डापात्रीमिति । एतेनापरेण मेक्षणमात्मन इति केचित् । अन्यः स्रुक्स्रुवादीनामपरेण मेक्षणस्याप्रधानत्वात्तदा एवार्थात् पूर्वेण स्रुवादीनां चरुसंचरे तूष्णीमिध्माः[5] समाधायेत्यर्थः[6] समानोत्तरेत् मेक्षणस्याप्रधानत्वात्[7] ? अन्तरेण जानुनी बाहू कृत्वेत्यध्याहारः[8] स्मृत्यन्तरात् । अन्यस्तु सामर्थ्याद्बाहू ज्ञेयौ तयोरेव योगाधाने जानुमध्यसंयोगसंभवात् । प्राक् प्राङ्मुखः । आसीन उपविष्टः । दक्षिणेन हस्तेन स्रुवादि गृहीत्वा अन्तरेण सव्ये जान्वोरित्यर्थः । आघारौ जुहोति कथमित्याह—प्राजापत्यं मनसा संबन्धोऽन्नं इन्द्रायेति देवतासंगतिर्नोर्ध्वोध्वर[11] इति[12] मन्त्रः । प्राणाद्दक्षिणार्धे इत्यपूर्वविधिः । आघारौ जुहोति सामान्योपदेशः पूर्ववदेतस्य मते अन्तरेण[13] जानुनी इति न पूर्वशेषः प्रकरणधर्मत्वात् ॥ १० ॥ ॥ ११ ॥ १२ ॥ १३ ॥

'आज्य' आग्नेयमुत्तरार्द्धे सौम्यं दक्षिणार्द्धे समानवक्ष्णया साम्यश्चौ । अकुटिलतया अन्यस्तु समानौ सदृशापेक्षावित्यर्थः । छन्दोवत्सूत्राणीति छान्दसो वा निर्देशः । अध्येतृप्रमादाद्वा विपरीतः पाठः ॥ १४ ॥

'युक्तो वह जा' इह पठितव्यो विवाहे वा । ज्वलनात्मकस्याग्ने र्भवस्तदा महात्मानमग्निं योजयित्वाऽध्यस्येत्यर्थो[14] मे निर्देशः । अध्येतृप्रमा[16]

---

१ चरुं, घ. । २–४ ० घ. । ३ मन्तरत, ख. । ५ ध्मं, घ. । ६–७ ० घ. । ८ ध्यान. च. । ९–१० ० द. । ११–१२ ० घ. । १३ न, च. । १४ र्थन्. ग. च. । १५–१६ ० घ. ।

द्वाभ्यामग्निꣳयोजयित्वा नक्षत्रमिष्ट्वा नक्षत्रदेवताꣳ यजेत्तिथिं तिथिदेवतामृतुमृतुदेवतां च ॥ १५ ॥ उपस्तीर्याप उपस्पृश्य मेक्षणेन स्थालीपाकस्यावद्यति मध्यात् पूर्वार्द्धाद् द्वितीयं पश्चार्द्धात्तृतीयꣳ यदि पञ्चावदानस्य ॥ १६ ॥ अवत्तमभिघार्य स्थालीपाकं प्रत्यभिघारयति ॥ १७ ॥

अध्येस्येत्यर्थमेव योजयिता तस्य चोदितत्वात्[1][2][3]। नक्षत्रमिष्ट्वा पडेते यागा एतं रेवशब्दैर्योगः । ननु कृत्तिकादिभिः । अथ कृत्तिकाभिस्तदाष्टाविंशतिराहुतयो नक्षत्रेभ्यः पड्ऋतुभ्यः पञ्चदशतिथिभ्यस्तावत्य एव तद्देवताभ्यः स्युः नक्षत्रादीनामवचनात् तत्तत्त्वादेके वहु नक्षत्राय स्वाहेति युक्तं सर्वनक्षत्राण्येव इष्टानि भविष्यन्ति । यथा विश्वस्मै भूतायेति वर्त्तमानकालीनं नक्षत्रादि यष्टव्यमित्यत्र किंप्रमाणमेकवचनं चेन्न सामान्यविवक्षयाऽपि पूज्यते[6]। तदत्र शाखान्तरनिर्णयः[4]। तिथिदेवता प्रतिपदं स्वाहेतिवदना (ता) तिथीनां चन्द्रमाः अ[थ]वा शास्त्रान्तरात् ब्रह्मादयः । ऋतुमृतुदेवतां शास्त्रान्तरप्रसिद्धा वा अन्येनार्तेवस्तेभ्यः स्वाहेति वदता दर्शिता तस्यास्तु सर्वं चेदालूनविशीर्णमिव प्रतिभाति अयं शक्त्यो(क्यो)र्थः[8]। नक्षत्रमिष्ट्वा यस्यां तिथौ यन्नक्षत्रं तदेव स्वेन नामधेयेनेति तस्यैवात्मीया देवता श्रुत्युक्तायतना हि सामान्येनादेशो भवति[9][10]। यथा नाग्न्यादयो देवता देवशब्देनेज्यन्ते । अपित्वग्न्यादिशब्देन तथा नक्षत्रादीति द्रष्टव्यम् ॥ १५ ॥

'उपस्तीर्याभिघार्य' स्रुचिस्रुवेण अप उपस्पृश्योदकं स्पृष्ट्वा मेक्षणेन समिधा शृतस्थालीपाकस्य ओदनस्यावद्यति । उपसृज्योपस्तीर्यानयति मध्यादन्तरात् पूर्वार्द्धात्पूर्वभागाद् द्वितीयं द्वयोः पूरणं पश्चार्द्धात्तृतीयं त्रयाणां पूरणमवद्यति अत्र संबन्धः[11][12]। पञ्चावदानकल्पस्य जामदग्न्यादेरवत्तमभिघार्याज्येन प्रत्यवघारयत्येवाखण्डितमभिघारणं कृत्वा[13] ॥ १६ ॥ १७ ॥

१–४ ० घ. । २ र्थो, च. । ३ म, च. । ५ श्वाव, ग, च. । ६ ० ग, च. । ७–८ अलग्नः पाठः, ० घ. । ९–१० ० घ. । ११ पूर्वं, ख. ग. च. । १२ रात्र, ख. ग. च. । १३ संधारणं, ख. ।

अग्नये स्वाहेति मध्ये जुहोति ॥ १८ ॥ यो देवानामसीति रौद्रस्य ॥ १९ ॥ जयान्हुत्वाज्यस्य स्विष्टकृते समवद्यत्युत्तरार्द्धात्सकृद् द्विमात्रम् । द्विर्वा यदि पञ्चावदानस्य ॥ २० ॥ अवत्तं द्विरभिघार्य नात उर्ध्वंꣳस्थालीपाकं प्रत्यभिघारयति ॥ २१ ॥ अग्नये स्विष्टकृते स्वाहेत्यसꣳसक्तमुत्तरार्द्धपूर्वार्द्धे जुहोति ॥ २२ ॥ मेक्षणं दर्भाꣳश्चाधायानुमतिभ्याꣳव्याहृतिभिश्च त्वं नो अग्ने, स त्वं नो अग्ने अयाश्चाग्नेऽसीत्येताभिर्जुहुयात् ॥ २३ ॥ वि ते मुञ्चामि रशनाꣳ वि रश्मीनिति च हुत्वा पवित्रेऽनु प्रहृत्याज्येनाभिजुहोति ॥ २४ ॥ एधोऽस्येधिषीमहीति समिधमादधाति समिदसि समेधिषीमहीति द्वितीयाम् ॥२५॥ अपो अद्यान्वचा-

---

अग्नये आज्यभागयोर्मध्ये जुहुयादित्यर्थः । किं चेति यो देवा अनया ऋचा रौद्रस्य स्थालीपाकस्य मध्ये यदि विकृतौ रौद्रो न स्यादिहैव द्वितीयो रौद्रः स्थालीपाकः प्राप्यत इति स्यात् ॥ १८ ॥ १९ ॥

'जया' जयष्टक (?) त्रयोदशाहुतिका आकूताय स्वाहेत्यादि स्विष्टकृते समवद्यति इति निगदसिद्धम् । अन्यस्तु समवद्यति सहिताभ्यामाज्यस्थालीपाकाभ्यामित्यर्थः । उत्तरावदुत्तरस्य देशात्सकृदेकेनैव प्रयत्नेन द्विमात्रं द्विगुणमवदानात् । अवदानश्चाङ्गुष्ठपर्वमात्रः श्रौतादवगन्तव्यः । द्विर्वा द्वौ वा यदि पञ्चावदानः स्यात् । यजमान इत्यर्थः ॥ २० ॥

अवत्तं गृहीत्वेति स्रुचि द्विरभिघार्य द्विरभिघारयेदिति नात ऊर्ध्वं स्विष्टकृतादुत्तरकालं स्थालीपाकं प्रत्यभिघारयेदित्यर्थः । उत्तरार्द्धपूर्वार्द्धे तु उत्तरास्मिन्देशे असंसक्तः सर्वाभिराहुतिभिर्जुहुयादित्यर्थः । एतेन मयैव व्याख्याता अनेन व्याख्याताः पठिताः ॥ २१ ॥ २२ ॥

'मेक्षणैः' अग्नेरितिशेषः अनु (ना ग.) अनुमतिदेवताभ्यामृग्भ्यामन्वद्य नोऽनुमति रंतिमहु इति चै व्याहृतयः । धृक्रिये पठ्यते । गृहान्तं च भूः स्वाहेतिप्रभृतयस्त्वन्नो अग्ने जुहोति पवित्रे अपवित्रे अभिव्याप्य ते आहृत्य यथा तथा जुहोति । निगदमन्यत् ॥ २३ ॥ २४ ॥

'एधोऽस्येति' आदधातीति बहुवचनात्पन्न्याधादप्यानुमन्त्रित-

---

१–२ अग्निरस्तु तेऽसं. प. ।

रिपमित्युपतिष्ठते ॥ २६ ॥ आपोहिष्ठीयाभिर्मार्जयेत् ॥ २७ ॥ पूर्णपात्रं दक्षिणा ॥ २८ ॥ बर्हिरनुप्रहरति ॥ २९ ॥ एतेन[1] स्थालीपाकेन स्थालीपाकाः सर्वे[2] व्याख्याताः ॥ ३० ॥ इति द्वितीयपुरुषे द्वितीयः खण्डः ॥ २ ॥

---

भृथवत् । 'अपां अद्य' आशिममिदप्रमतीन्यर्थः । आपोहिष्ठीयाभिरापोहिष्ठ-शब्दवतीभिरित्यर्थः । मार्जयन्ते पानगन्यात्मानम् ॥ २५ ॥ २६ ॥ २७ ॥

पूर्णपात्रमासितं[3] भव दक्षिणा अध्वाध्वर्युभ्याम् । पूर्णपात्रमित्युत्तरपद-प्राधान्यम् । पात्रस्यैव पूर्णपीठरादेर्दानं[4] तण्डुलादेर्द्रव्यस्य पूरणार्थत्वात् गुणत्वम् । अन्यस्तु यद्यप्युत्तपदप्राधान्यं तथा द्रव्यस्य तण्डुलादि दानं मन्तत्वादर्थ(?)स्तस्यैव प्राधान्यमन्यश्च द्रव्यस्य परिमाणार्थत्वेन पात्रस्योपादा-नमिति गुणभूतेत्र मात्राद्रव्यस्य प्रदेयत्वान्मतिमेयत्वाच्च प्रधानभूतत्वेनं ॥२८॥

'बर्हिरनुप्रहरति' अग्नौ प्रक्षिपतीत्यर्थः । एतेनातिदेशसूत्रमिद-मनुपदिष्टकर्मकयो(का ये) अग्नीषोमीयप्रभृतयः स्थालीपाकास्ते एवंधर्मकाः । स्थालीपाक उपलक्षणं ततो वा कर्मादयोप्येवंधर्मका इति एवं च प्राक्पद-कृतालिङ्ग इत्यत्र केनचिद्व्याख्यानं महता प्रयत्नेन कृतमिध्म(ध्माना)मुपसमा-धानार्थं स्थालीपाकाद्यजमानस्य प्राशनार्थं च । अत्र तु वार्त्ताऽपि ते न श्रुता आज्यस्थाल्यां स्रुवं निधायाग्रेण स्थालीपाकमन्वापातयति अपरेण मेक्षणमिति प्राडासीन आघारा इति आख्यानजयन ब्राह्मणमित्येतेषु इत इध्ममुपसमाधायेत्यादिकं चिरं तन्नरपठितत्वादन्येन तु अन्येषां मतमुक्तं नात्र-पत्रमानादयः स्थालीपाका भवन्तीति अपठितत्वादित्यभिप्रायः । सत्यं तथापि गृह्यान्तरेऽग्न्याधेयदेवताभ्यो जुहुयादिति वचनाद्यदि क्रियते न दोषः । अथातः सर्वार्थमिदं सूत्रम् । अतन्त्राभावे परं इति परमतम् । अप्रति-षिद्धमनुमतमिति सर्वशास्त्रेषु[12] निश्चितमिति अन्येपृक्तं मया तत्रैव यथा पवमानादयो भवन्ति ॥ २९ ॥ ३० ॥

॥ इति पूरणव्याख्याने द्वितीयपुरुषे द्वितीयः खण्डः ॥

---

१ अनेन, ग. च. । २ सर्वत्र, घ. । ३ शि, घ. । ४ तण्डुलोदरादे, ख. ग. च. । ५ देर्, ख. । ६ अन्यश्च, ग. च. । ६-७ ० घ. । ८-१२ ० घ. । ९ कर्पट, ख. । १०-० ग, च. । ११ परत, च. ।

# तृतीयः खण्डः

अग्नये स्वाहेति सायं जुहोति प्रजापतय इति द्वितीयाम् ॥१॥ सूर्याय स्वाहेति प्रातः प्रजापतय इति द्वितीयाम् ॥२॥ अग्नीषोमीयः स्थालीपाकः पौर्णमास्यामैन्द्राग्नोऽमावास्यायामुभयत्र चाग्नेयः

'अग्नये' सायं प्रदोषे द्वितीयेति मनसा स्यात्। प्राजापत्यविधानं गुणत्वान्मानसस्य। अत्र होमे देवतामात्रं श्रूयते कालश्च तस्माद्द्रव्यं दध्यादि आहृत्यात्। अग्निहोत्रवत् तूष्णीं स्यात्। एषा चातुर्हायनद्विहायनइत्येन-माघविरुद्धम्। पश्चाद् गृह्यान्तरात्तण्डुलादि द्रव्यं ग्राह्यं परिसमूहनपर्युक्षणप-रिस्तरणमात्रं च द्रव्यस्य श्रवणे व (च) पाणी(णि)नां होमः। अपूर्वत्वा-त्तु जयान् प्रभृति तन्त्रस्य लिङ्गमस्ति सूर्याय प्रातर्व्युष्टायां शर्वर्यां गार्हप-त्यहोमसादृश्याभावात्समिद्धैवताभिरिति सायंप्रातरिति कालनियमात्सायं प्रा-तरिति यावज्जीवं होमो विधीयते। एवं च स्वयं होमादि ऋत्विजोऽनुपदेशा-देरतिदेशाच्च। महायज्ञत्वाद् द्वादशमुक्तं होमनिमित्तं दैवतं इति ॥ १ ॥ २ ॥

'अग्नीषोमीयः' भवतीति शेषः। पौर्णमास्यमावास्ययोश्चन्द्रति-थित्वात्तत्कालं ज्योतिः शास्त्रादवगम्य यजेत न तु चतुर्दशीप्रतिपदोर्गनिमि-त्तत्वात्। उभयत्र–उभयोः पौर्णमास्यमावास्ययोरित्यर्थः। आग्नेयोऽग्निदेवत्यः स्थालीपाको भवतीति। अयं च पाठक्रमाद् द्वितीयः स्यात्। न दर्शपौर्ण-मासदेवतावचनात्स एव क्रमो युक्तः। तस्मादाज्यदेवतावचनान्न एव क्रमो युक्तस्तस्मादाज्यस्योपांशुयाजी यष्टव्योऽनभिधानादेव पाठक्रमविरोधाच्च। यद्वा उत्तरोत्तरयोः पूर्वस्यैव लाघवार्थं नहि तन्त्रगं च दर्शपौर्णमासक्रम-क्रमाश्रया देवताः स्युस्तयोरनिहितमप्युपांशुरन्वाधेयवचनादि स्थाली-पाकवत्कुर्यात्। [illegible] [illegible] [illegible]

१—२ ० ४। २—३ [illegible]। ३—१ [illegible]। ६ [illegible]। [illegible]। १०—११ [illegible]।

आगन्तुः पूर्वः पौर्णमास्यामुत्तरोमावास्यायाम् ॥३॥ आश्वयुज्यां पौर्णमास्यां प्रातर्नित्येषु स्थालीपाकेषु स्थालीपाकमन्वायातयति ॥४॥ तस्याग्निंरुद्रं पशुपतिमीशानं त्र्यम्बकंशरदं प्रपातकं गा इति

तस्यायमाशयः । आग्नेयश्चेति वक्तव्ये उभयत्र चेति मध्ये चकारकरणम-क्रमेण ततो ज्ञायते स्थालीपाकानन्तरमाज्येनोपांशु विश्वादि यजेत् । [1]अत्वा-मिश्रयेति तदुक्तं ततो यथार्थे कर्मसन्निपातो विज्ञेय इति किं पुनर्यथार्थं दर्शपौर्णमासचोदनाप्रायमस्यम(अ)न्यस्तु पुनर्देवतादि वचनादिह नोपांशु-याज(ग)स्तथा च गृह्यान्तरे साक्षात्प्रतिषेधः । उपांशु याजेन्द्रमहेन्द्रवर्ज्जमिति उक्तोऽतिदेश एतेनेत्यत्र इदमपि कालनियमाद्यावज्जीवं स्यात् ॥ आगन्तुः पूर्वः पौर्णमास्यामुत्तरोमावास्यायाम् । आगन्तु नैमित्तिकं शान्त्यादि नित्यं वाग्रयणादि पर्वसु यद्विहितं तत्पौर्णमास्याः पूर्वं कर्त्तव्यम् । अमावास्याया-मुत्तरं पौर्णमास्यमावास्ययोरित्यत्र कर्मणि । आगन्तुशब्दात्कर्मण आगन्तु-र्भवति । [1]आगन्तूनामन्ते निवेश इत्यत्र शब्दानतिदेश्यते[2] आगन्तुर्निविशति ततश्च देशकालकर्त्रैक्याचोदनाभेदे सबर्हिराधारादि जयत्प्रभृतिषु तदादि तन्त्रं वक्ष्यति संघेष्वेकबर्हिरित्यत्र । यत्र त्वेका चोदना चोदितसंघात्तत्र बर्हिरा-देस्तन्त्रत्वं कर्मेत्यादि सिद्धमेव न निर्वपेत् । एवमागन्तुककर्मादा उपस्थाने क्रमार्थं वचनमागन्तुः पूर्व इति तत्रापवादः ॥ ३ ॥

'आश्वयुज्यामित्यादि' नित्येष्विति कोयं भेदो यावता त्वया उत्पद्यमानोऽपि नित्य एवाहृत्य विधेयकृतो न नित्याकृतिरिति नित्येष्विति बहुवचनं यदा तस्यामाग्रयणं स्यान्नित्यं वा शूलगवाभिप्रायेणेति । अनु पश्चादायातयति अपयतीत्यर्थः । यदि नित्ययोरन्वायातयति इति ब्रूयादागन्तुः पूर्वः पौर्णमास्यपवादकं न स्यात् । आग्रयण–स्थालीपाकान्वायातने नियमा-र्थतया चरितार्थत्वादिति नित्येष्विति बहुवचनम् ॥ ४ ॥

'तस्याग्निरुद्रम्' इति शब्दश्चार्थे तस्यात्ययान्यस्यावचयाग्न्या ? चेति प्रयजति ॥ ५ ॥

१ दत्वा, ग. । १–२ ० घ. । ३–४ ० घ. । ५–६ ० घ. । ७ स्याम, ख. । ८–९ ० घ. । १० ( तस्य अग्नि ''' प्रधानरुनिमित्तं पूर्वमाभ्युदयश्राद्धं षट्दै-वत्यचरुनिर्वाप । अग्नये स्वाहा १ ''' शरदे स्वाहा ६ ) अधिकं, घ. ।

यजति ॥५॥ दधिघृतमिश्रः प्रपातकस्तस्या नो मित्रावरुणा प्रवा॰ हवेति च हुत्वाऽम्भः स्थाम्भो वो भक्षीयेति गाः प्राशापयति ॥६॥ अवसृष्टाश्च वसेयुः ॥७॥ ब्राह्मणान् घृतवद्भोजयेत् ॥८॥ पर्वण्याग्रयणं कुर्वीत नानिष्ट्वाग्रयणेन नवस्याश्नीयात् ॥९॥

'दधिघृतमिश्रं' दधिघृतमिश्रस्तस्या नो मित्रावरुणा इति पठितोऽपि पृषातको द्रव्यं न देवतासंज्ञाविधानार्थत्वेन यत्र पृषातकशब्दः श्रूयेत तत्र दधिघृतमिश्रसंज्ञः प्रत्येतव्यः। ततश्च देवगणमध्ये शरदं पृषातको द्रव्यं न देवता-संज्ञा विधानानर्थक्यप्रसंगात्। गणमध्य आहुतिकमार्थपाठात्। तस्यानेन पिण्डपितृयज्ञस्थालीपाकाहुतिप्रकारस्य मन्त्रसमुच्चयार्थत्वात्तत्स्थालीपाकस्य गोस्य इति अन्यस्तु देवतावद् द्वितीया तस्य पाठाद् देवतैव। अन्यथा लाघवार्थं तत्रैव दधिघृतमित्याह। ब्रूयादेवं द्विः पृषातकं कर्त्तव्यं भवेत्। अत्र नोद्यं द्वितीयाहुतिर्यो देवानामस्तीति स्यात्। रौद्रस्थालीपाक इति अनवस्था नहि शाखाद्येपरं प्रतिपत्तिस्तस्मात्प्राशयति प्रतिमन्त्रेण वा प्रयोजयेदित्यर्थः। हुत्वाम्भस्थेति पृषातकहोमतच्छेषप्राशनयोरानन्तर्यचोदना तत्कथं स्विष्टकृदादि प्रतिपद्यते न किं पृषातकस्य तत्रोपकारोपेक्षित्वमस्ति बाढं यजति यागानु-क्रमार्थं हि पाठो न यजति यागार्थत्वाद् द्रव्यस्य यस्तुवै प्रत्ययः स यागा-पेक्षयानन्तरं प्राशनस्याहृतेन यागाङ्गत्वं प्राशनस्य यथा वाजपेयाङ्गत्वं बृहस्पतिसवस्य ॥ ६ ॥

'अवसृष्टाः' सा काले यद्येव प्राशनमपि वासकलस्तु। अस्तु यदिह होमानन्तरं होमस्तु प्रातर्नित्येष्विति एवं गाः। अत्र वासकारणास्ति अन्यस्तु प्राशनाङ्गत्वाद् गावः कालं गृहान्नोत्सृज्यन्ते ॥ ७ ॥

'ब्राह्मणान्' घृतवतीष्वे वैतन्गुणवद्भोजने गुणविधिनोन्नगम्य [illegible] लीपाके बहून् ब्राह्मणान् भोजयेत् ॥८॥ नहि ब्राह्मणभोजनानुवादेन [illegible] घृतवत्त्वं च गुणद्वयविधानं संभवति। एवं तर्हि अपूर्वत्वाद् ब्राह्मण[illegible]

१ वस्त. ग. च. । २ व इति, ग. च. । ३ जपेत्. [illegible] । ४ [illegible] । ५ चो, ख. ग. च. । ६ त्वाउ. ग. च. । ७ गुणे. [illegible]

वसन्ते यवानां शरदि व्रीहीणाम् ॥ १० ॥ अग्रपाकस्य पयसि स्थालीपाकं श्रपयित्वा तस्य जुहोति सजूरग्नीन्द्राभ्याᳬ स्वाहा सजूर्विश्वेभ्यो देवेभ्यः स्वाहा सजूर्द्यावापृथिवीभ्याᳬ स्वाहा सजूः सोमाय स्वाहेति ॥ ११ ॥ शरदि सोमाय श्यामाकानाᳬ वसन्ते-

---

विधीयतेऽत्रे । यद्वा ग्रहणादि स्थालीपाकाङ्गाद् ब्राह्मणाभिप्रायं बहुवचनं ते-पामपि पृपातकसंबन्धात् । कांस्यभोजिवद् घृतवदित्यविरुद्धं नित्य॑ ! मुत्तरं नित्येष्विति स्यात् । छन्दोनुविधानाद्वा सप्तमी मापादेरपि[3] नवस्याशितव्य-सामान्योपक्रमात् । देवा ओपधीपु पक्वास्विति पर्वणि वसन्ते शरदि वेत्येवम् । इतरथा सर्वदा पर्वण्यादिग्रहणं स्यात् । द्रव्यविपमार्थं वसन्तशरदोः पुनर्विधानं स्यात् । अतो यथासंभवं तथाऽत्विं(स्त्वि)ति । अन्यस्तु नानिष्ट्वाग्रहणे नव-स्याश्नीयादिति केचित्पठन्ति तस्यायमर्थः । नवान्नप्राशनाधिकारग्रहणमिति तेनावश्य कर्त्तव्य मित्युक्तं भवति । अन्ये आश्वयुज्यां च न तथेति तथाहि देशविशेषेपु क्वचिद्ग्रीष्मेपु व्रीहय एध्यन्ते शिशिरे यवाः क्वचिदन्यस्मिन्निति तस्मात् शरद्वसन्तयोः पर्वणी इत्येकवाक्यता[?] ॥ ९ ॥ १० ॥

'पयसी' त्यादि सुगमं सजूः सोमाय स्वाहेति श्यामाकानां स्थाली-पाकस्येति शेपः स्थालीपाकप्रक्रमात् ॥ ११ ॥

'वत्सः प्रथमजो दक्षिणा' प्रथमजात इत्यर्थः । ब्रह्मण एव यज-मानभागोपि क्षत्रविड्भ्यः प्रापितं तु न लभ्यते । यदि बह्वृचाद्यभिप्रायं श्रुतिग्रहणमिदम् । अथ [ भुञ्जीतेति ] भोजनभागिति श्रुतिस्तदा भागप्राशनं केचिदिच्छन्ति नेत्यपरे ॥ "तस्मिन् वर्षे यजमानस्य गवां मध्ये यः । प्रथमो जातो वत्सः स एव दक्षिणा । अस्य नवयज्ञकर्मणः समृध्यर्थमिमं प्रथमं वत्सं"

---

१ ० ग, च. । २ चित्य ? ख, ग, च. । ३ वसि, ख, च. । ४ त्ति, ख. । तृप्ति, घ. । ५ कर्मक, ख. । ६–७ ० घ. । ८ भोजनतीभागीति ? ख, ग, च. । ९–१० अधिकं, घ. ।

वेणुयवानामुभयत्र वाज्येन ॥ १२ ॥ वत्सः प्रथमजो दक्षिणा ॥१३॥ ब्राह्मणा एव हविःशेषं भुञ्जीतेति श्रुतिः ॥ १४ ॥ इति द्वितीयपुरुषे तृतीयः खण्डः ॥ ३ ॥

---

तंति( तन्नि ) प्कृतौ द्रव्यं वाऽध्वर्यो तुभ्यमहं संप्रददे । ब्रह्मणे पूर्णपात्रं कर्मापवर्गे । नवयज्ञस्याकरणे महान् दोषः स्यात् । कात्यायनेन प्रायश्चित्तमुक्तम् "अनिष्ट्वा नवयज्ञेन" ॥ १२ ॥ १३ ॥ १४ ॥

॥ इति पूरणव्याख्याने द्वितीयपुरुषे तृतीयः खण्डः ॥ अन्ये तु चतुर्थः ॥ ३ ॥



# चतुर्थः खण्डः

पशुना यक्ष्यमाणः पाकयज्ञोपचाराग्निमुपचरति ॥ १ ॥

पशुबन्धवत्तूष्णीमावृद्देवताहोमवर्जम् ॥ २ ॥

षट्सु षट्सु मासेष्वाग्रायणः पशुबन्धोऽर्थाति भविष्यन्कालतानुपपत्तिस्तत्र मध्येऽप्यपशुना यक्ष्यमाणं पाकयज्ञोपचारमग्निमुपचरति पशुनेत्यविकारार्थं वचनं यक्ष्यमाण इति भविष्यत्कालतानुपपत्तिस्तत्र मध्येऽन्युपचाराद्यजमान इति निर्देशो युक्तः। अपरं भविष्यः स्यादिति चेत्तन्न स्थालीपाकधर्मत्वात्पाकयज्ञोपचारः स्यादेव प्रधानाहुतेः प्राग् यजमाणोपदेशः स्यात्। अन्यस्तु—यक्ष्यमाण इति वचनाद्यक्ष्यमाणं यष्टुमिच्छुः पशुयागबुद्ध्योपारूढा? सम्यक् पाके यज्ञविधानेनाग्निमुपचरेदिति पूर्वमग्निं मथित्वा लक्षणं कृत्वा प्रणयेदित्युक्तं भवति। तेन यथा स्थालीपाकमाध्ये दर्शपौर्णमासयोर्योगे गार्ह्येऽग्निमन्थनं तथात्रापीत्यर्थः। पाकस्तनुरुच्यते तनुयज्ञोपचारमुपचरति कर्मत्वात् क्रियाविशेषणमुष्ट्रमुखन्यायेन वा द्वितीयोपचारमग्निमिति द्वे विशेषणपदे अस्मिन्मते स्यातां नोत्तरवेदिप्रणयनं न होतृप्रभृतयो न याज्यानुवाक्या नोपभृन्नाप्युपवमथ इति पाकयज्ञोपचारवाक्याद् गम्यते योऽयं पुरस्तादपवादः ॥ १ ॥ "अथ पाकयज्ञपशोः पदार्थानुक्रमणिका लिख्यते तथा च मानवसूत्रे षट्सु षट्सु मासेषु पशुना यजेत संवत्सरे संवत्सरे वेति। पशोः कालनियमः। मनुः (४–२८) नवेनानर्चिता इति तस्मादल्पसंभारतमेनापि पशुबन्धः कर्त्तव्य एव। तत्रादौ विधिना नान्दीमुखं श्राद्धम्। ऋत्विग्वरणम्[१]" ॥ १ ॥

'पशुबन्धवत्' तूष्णीमावृदिति प्राप्तेः पशुवत्तूष्णीमावृद्देवताहोमवर्जं सापवादातिदेशः। तत्र पशुबन्धेन तुल्यावृत् पशुबन्धवदित्यतिदेशात्तूष्णीं कार्यं देवताहोमं च वर्जयित्वा देवतामग्निं केचिदाहुरनादिष्टदेवतास्वग्निमिति वचनात्। इन्द्राग्नी अपरे पशुबन्धवदित्यतिदेशात्तदयुक्तमिव प्रधानानतिदेशादग्निहोत्रदर्शपौर्णमासाग्रायणदेवतासाम्यात्पशुमिह यज्ञवत्स्यात्। न चेद्देवताप्रधानयोगत्वाददतिदेशः स्यात्। ऐन्द्रवायवादि ग्रहण एव सोमविकारः। षड्होत्रादि होमो नेष्यते यस्तूपाकरणहोमः कथमिष्यते। यतो नोपवसथा-

१ आरम्भ, ख. घ. । २ बुद्धयुपा, ख. । ३–४ अधिक, घ. ।

**प्रोक्ष्यानुमान्योपपाय्य पर्यग्निं कृत्वा शामित्रं प्रणीय वपाश्रपणीभ्यामुदञ्चं प्रक्रममाणमन्वारभन्ते ॥ ३ ॥ संज्ञप्यमानमवेक्षते ॥ ४ ॥ संज्ञप्तं स्नपयित्वा यथादैवतं वपामुत्कृत्य श्रपयित्वाऽऽघारावाज्यभागौ हुत्वा—**

ङ्गत्वादतिदेशः स्यादैन्द्रवायवादिषड्ढोत्रादिहोमः ॥ २ ॥ "सर्वं श्रौतवन्मन्त्रवर्जम्" ॥

'प्रोक्ष्यानुमान्योपपाय्य पर्यग्निं कृत्वा' परिसंख्यानार्थमिदं क्रमार्थैर्न्यायगुणोत्तरविध्यभावाच्च । इतश्च यावदुक्तं गृहमेधीयाज्यनिर्वापादिवदन्यनिवृत्त्यर्थत्वात् । अन्येन तु यज्ञ्यञ्जनपरतयाव्याख्यानार्थं व्याख्यातं तन्न निष्प्रमाणत्वात् । अत एव तद्विपरीतं व्याख्यातमन्येन पृष्टजनं लिखतां । प्रक्रममाणमिति भविष्यति । वर्तमानोपदेशो वर्त्तमानसामीप्ये वर्त्तमानवद्वेति वचनात् । संज्ञप्यमाने च विध्यर्थं गुणार्थं वा संज्ञापरिमितत्वात् ॥ ३ ॥ ४ ॥ "तूष्णीं पशोः प्रोक्षणमनुमानयति स्तौतीत्यर्थः । तूष्णीमप उपपाययति तूष्णीं सर्वाङ्गेषु पशोः प्रोक्षणम् । उत्तरतः शामित्राय लक्षणं करोति । उद्धत्यावोक्ष्य । अथ तूष्णीं पर्यग्निकरणं शालाग्नेरुल्मुकेन पशुमग्निं यूपं शामित्रलक्षणे उल्मुकं निधाय ··· त्रिः पर्यग्निं करोति । अध्वर्युरुल्मुकेन सहितः । यूपात्प्रमुच्य पशुं गृहीत्वा उदञ्चं प्रक्रमयति । वपाश्रपणीभ्यामुदञ्चं प्रक्रममाणमन्वारभते । उल्मुकं शामित्रलक्षणे निदधाति । पशुशमित्रे प्रदाय तस्मिन् शामिता प्रत्यक् शिरसमुदक्पादमन्तरे वोष्माणं संज्ञपयति ॥" ॥ ३ ॥ ४ ॥

'संज्ञप्तम्' इदमपि पूर्वपरिसंख्यार्थो वाऽगतिक्रमः स्यात् । यत्तदुपाध्यायो विपरीतमुक्तवान् । यथादैवतं वपा अमुकदे त्वाजुष्टमिति मन्त्रेण इन्द्राग्निभ्यां त्वाघाराज्यभागौ हुत्वा जातवेदो वपयेति वपां जुहोति व्याख्यानं पूर्ववत् । दर्भाग्रोपासनं हुत्वा तूष्णीं वपति होमन्वात् प्रत इति मन्त्रः । इध्माघारादि ऋतुमृतुं देवतान्तं पशुबन्धवदित्युक्त्वा स्रुक् स्रुच्युपस्तीर्य हिरण्यशकलं वपां हिरण्यशकलान्यवदायाभिः स्रुवेणोपरिष्टपां ? जुह्वा वपां जुहोति । पुनः परिवृष्य अपरे आज्यभागौ हुत्वेति परिसंख्यां मन्यन्ते ।

१ देवतं. घ. । २-३ अधिकं. घ. । ४ न. घ. । ५-६ ० घ. । ७-८ अधिकं. घ. । ९-१० ० घ. । ११ द. घ. । १२-१३ ० घ. ।

## चतुर्थः खण्डः

पशुना यक्ष्यमाणः पाकयज्ञोपचाराग्निमुपचरति ॥ १ ॥
पशुबन्धवत्तूष्णीमावृद्देवताहोमवर्जम् ॥ २ ॥

---

षट्सु षट्सु मासेष्वाग्रायणः पशुबन्धोऽपीति भविष्यत्कालतानुपपत्तिस्तत्र मध्येऽग्न्यपशुना यक्ष्यमाणं पाकयज्ञोपचारमग्निमुपचरति पशुनेत्यविकारार्थं वचनं यक्ष्यमाण इति भविष्यत्कालतानुपपत्तिस्तत्र मध्येऽन्युपचाराद्यजमान इति निर्देशो युक्तः। अपरं भविष्यः स्यादिति चेत्तन्न स्थालीपाकधर्मत्वात्पाकयज्ञोपचारः स्यादेव प्रधानाहुतेः प्राग् यक्ष्यमाणोपदेशः स्यात्। अन्यस्तु—यक्ष्यमाण इति वचनाद्यक्ष्यमाणं यष्टुमिच्छुः पशुयागबुद्ध्योपारूढा? सम्यक् पाके यज्ञविधानेनाग्निमुपचरेदिति पूर्वमग्निं मथित्वा लक्षणं कृत्वा प्रणयेदित्युक्तं भवति। तेन यथा स्थालीपाकसाध्ये दर्शपौर्णमासयोर्योगे गार्ह्येऽग्निमन्थनं तथात्रापीत्यर्थः। पाकस्तनुरुच्यते तनुयज्ञोपचारमुपचरति कर्मत्वात् क्रियाविशेषणमुष्ट्रमुखन्यायेन वा द्वितीयोपचारमग्निमिति द्वे विशेषणपदे अस्मिन्मते स्यातां नोत्तरवेदिप्रणयनं न होतृप्रभृतयो न याज्यानुवाक्या नोपभृन्नाप्युपवसथ इति पाकयज्ञोपचारवाक्याद् गम्यते योऽयं पुरस्तादपवादः ॥ १ ॥ "अथ पाकयज्ञपशोः पदार्थानुक्रमणिका लिख्यते तथा च मानवसूत्रे षट्सु षट्सु मासेषु पशुना यजेत संवत्सरे संवत्सरे वेति। पशोः कालनियमः। मनुः (४–२८) नवेनानर्चिता इति तस्मादल्पसंभारतमेनापि पशुबन्धः कर्त्तव्य एव। तत्रादौ विधिना नान्दीमुखं श्राद्धम्। ऋत्विग्वरणम्" ॥ १ ॥

'पशुबन्धवत्' तूष्णीमावृदिति प्राप्तेः पशुवत्तूष्णीमावृद्देवताहोमवर्जं सापवादातिदेशः। तत्र पशुबन्धेन तुल्यावृत् पशुबन्धवदित्यतिदेशात्तूष्णीं कार्यं देवताहोमं च वर्जयित्वा देवतामग्निं केचिदाहुरनादिष्टदेवतास्वग्निमिति वचनात्। इन्द्राग्नी अपरे पशुबन्धवदित्यतिदेशात्तदयुक्तमिव प्रधानानतिदेशादग्निहोत्रदर्शपौर्णमासाग्रायणदेवतासाम्यात्पशुमिह यज्ञवत्स्यात्। न चेदेवताप्रधानयोगत्वाददतिदेशः स्यात्। ऐन्द्रवायवादि ग्रहण एव सोमविकारः। षड्होत्रादि होमो नेष्यते यैस्तैरुपाकरणहोमः कथमिष्यते। यतो नोपवसथा-

---

१ आरम्भ, ख. घ. । २ बुद्ध्युपा, ख. । ३–४ अधिक, घ. ।

प्रोक्ष्यानुमान्योपपाद्य पर्यग्निं कृत्वा शामित्रं प्रणीय वपाश्रपणीभ्यामुदञ्चं प्रक्रममाणमन्वारभन्ते ॥ ३ ॥ संज्ञप्यमानमवेक्षते ॥ ४ ॥ संज्ञप्तꣳ स्नपयित्वा यथादैवतꣳ वपामुत्कृत्य श्रपयित्वाऽऽघारावाज्यभागौ हुत्वा—

---

ङ्गत्वादतिदेशः स्यादैन्द्रवायवादिषड्ढोत्रादिहोमः ॥ २ ॥ " सर्वे श्रौतवन्मन्त्रवर्जम् " ॥

'प्रोक्ष्यानुमान्योपपाद्य पर्यग्निं कृत्वा' परिसंख्यानार्थमिदं क्रमार्थेऽन्यागुणोत्तरविध्यभावाच्च । इतश्च यावदुक्तं गृहमेधीयाज्यनिर्वापादिवदन्यनिवृत्त्यर्थत्वात् । अन्येन तु यद्व्यञ्जनपरतयाव्याख्यानार्थं व्याख्यातं तन्न निष्प्रमाणत्वात् । अत एव तद्विपरीतं व्याख्यातमन्येन पृथग्जनं लिखता । प्रक्रममाणमिति भविष्यति । वर्तमानोपदेशो वर्त्तमानसामीप्ये वर्त्तमानवद्वेति वचनात् । संज्ञप्यमाने च विध्यर्थं गुणार्थं वा संज्ञापरिमितत्वात् ॥ ३ ॥ ४ ॥ " तूष्णीं पशोः प्रोक्षणमनुमानयति स्तौतीत्यर्थः । तूष्णीमप उपपाययति तूष्णीं सर्वाङ्गेषु पशोः प्रोक्षणम् । उत्तरतः शामित्राय लक्षणं करोति । उद्धृत्यावोक्ष्य । अथ तूष्णीं पर्यग्निकरणं शालाग्नेरुल्मुकेन पशुमग्निं यूपं शामित्रलक्षणे उल्मुकं निधाय ... त्रिः पर्यग्निं करोति । अध्वर्युरुल्मुकेन सहितः । यूपात्प्रमुच्य पशुं गृहीत्वा उदञ्चं प्रक्रमयति । वपाश्रपणीभ्यामुदञ्चं प्रक्रममाणमन्वारभते । उल्मुकं शामित्रलक्षणे निदधाति । पशुशमित्रे प्रदाय तस्मिन् शामिता प्रत्यक् शिरसमुदकपादमन्तरे वोप्माणं संज्ञपयति ॥ " ॥ ३ ॥ ४ ॥

'संज्ञप्तम्' इदमपि पूर्वपरिसंख्यार्थो वागतिक्रमः स्यात् । यस्तदुपाध्यायो विपरीतमुक्तवान् । यथादैवतं वपा अमुकदे त्वाजुष्टमिति मन्त्रेण इन्द्राग्निभ्यां त्वाघाराज्यभागौ हुत्वा जातवेदो वपयेति वपां जुहोति व्याख्यानं पूर्ववत् । दर्भाग्रोपासनं हुत्वा तूष्णीं वपति होमन्वान् प्रत इति मन्त्रः । इध्माघारादि ऋतुमृतुं देवतान्तं पशुबन्धवदित्युक्त्वा स्रुक् स्रुच्युपस्तीर्य हिरण्यशकलं वपां हिरण्यशकलान्यवदायाभिः स्रुवेणोपस्तिर्यपां ? जुह्वा वपां जुहोति । पुनः परिवप्य अपरे आज्यभागौ हुत्वेति परिसंख्यां मन्यन्ते ।

---

१ देवतं. घ. । २-३ अधिक. घ. । ४ न. घ. । ५-६ ० ध. । ७-८ अधिकं. घ. । ९-१० ० घ । ११ द, घ. । १२-१३ ० घ. ।

**जातवेदो वपया गच्छ देवाꣳस्त्वꣳहि होता प्रथमो बभूव ।**
**घृतस्याग्ने तन्वा संभव सत्याः सन्तु यजमानस्य कामाः स्वाहा ॥**
**इति वपां जुहोति ॥ ५ ॥ स्वाहा स्वाहेति परिवप्यौ[1] ॥ ६ ॥**
**स्थालीपाकमन्वायातयति समानदेवतं पशुना ॥ ७ ॥**

---

तेषां स्थालीपाकावसरे हुतावाज्यभागाविति पुनःप्रसङ्गनिवृत्तिवाक्ये कथमिध्मोपसमाधानायाज्यभागवर्ज्जमृतुदेवतोक्तं[2] परिसंख्या तस्य वचनमनुप्रमाणाप्रवृत्तिः परिसंख्यानं प्रयोगाङ्गस्य स्वकालेभ्युपगम्या[3]कालविधानं न युक्तम् । न च पशुवदतिदेशादिध्मः । आचारे च वपाहोमादूर्ध्वंस्युस्तदाज्यभागौ हुत्वेत्युपलक्षणं यथा जयप्रभृतिभिर्हुत्वेति न जयेभ्यः पूर्वाहुतयो लुप्यन्ते नाप्युत्तर एवमत्रापि युक्तमकृतावाज्यभागाविति विकल्पे प्राप्ते नित्यार्थं वचनमाज्यभागौ हुत्वा ॥ ५ ॥—“संज्ञप्तं स्नपयति । पत्न्यासिञ्चति । पशोः सर्वाङ्गस्पर्शनं वपामुत्कृन्तन्ति । इन्द्राग्निभ्यां त्वा वपामुत्कृन्तामीत्यनेन इषेत्वेति वपामुत्खिदति । एकशृङ्ग० अन्तराग्निं शूर्पं च वपाहरणम् । अग्नेर्दक्षिणत उपविश्य वपाश्रपणम् । अग्नौ दर्भाग्रनिरसनम् । उपेतानामन्यतम आज्येन वपामभिजुहोति । शृतां ज्ञात्वा वपाश्रपण्यौ प्रवृहति । वपां पात्र्यां दक्षिणतो बर्हिषि सादयति । शमिता पशुं विस्रंसयति । तूष्णीं प्राञ्चमिध्ममुपसमाधायेत्यादि ऋतमृतुदेवतान्तम् । ततो वपा होमः । स्रुच्युपस्तीर्य । ततोऽभिघारयति । स्वाहा देवेभ्य इति पुरस्ताद्वपाया जुहुयात् । जातवेदो वपया गच्छदेवानिति वपां जुहोति । विश्वेभ्यो देवेभ्यः स्वाहा इत्युपरिष्टाद्धोमः । अग्नौ तूष्णीं वपाश्रपण्यौ प्रहरति । ततो ब्राह्मणभोजनम् । अस्य वपाहोमकर्मणः समृद्ध्यर्थम् ॥ ५ ॥ ६ ॥

‘स्थालीपाकं’ पुरोडाशनिवृत्त्यर्थं पुनर्वचनं हुतावाज्यभागौ ननु हुतावेव[4-5] काशङ्का कृताकृताविति कश्चिद्विकल्पं मन्येत । ननु वाज्यभागौ हुत्वेत्युक्तं[6] नानुवादाविशेषाच्च तथापि स्यात्ततश्च विकल्पः स्यात् । भवति च पाक्षिकोऽनुवादो यथा नित्येषु स्थालीपाकेष्विति बहुत्वं स्याच्चेवं किं न

---

१ वाप्यौ, ग. च. । २ क्तं, घ. च. । ३ म्य, ख. घ. । ४–५ अधिकं, घ. ।
६ क्तं ननु, ग. घ. च. ।

पाकेन शेषो व्याख्यातः ॥ १२ ॥ पशोः पशुरेव दक्षिणा ॥ १३ ॥
इति द्वितीयपुरुषे चतुर्थः खण्डः ॥ ४ ॥

उद्यतेऽनुमतिरित्यादि पशोः। ननु वरोऽपि पशुरेव स च पशुवन्न्ववदित्युक्तो सजातीयः। पशुः पशोर्देनिणेति पुनरुक्तः। यद्वा प्रकृतावधि वरेण सहेयं दक्षिणा विकल्प्यते पशोरित्यधिकारार्थन्वान्। अनन्तरं कर्ममण्डलं चतुरस्रं वा स्थण्डिलं गोमयेनोपलिप्य लक्षणं च विधाय परिसमूहनादि बर्हिस्तीर्त्वा ब्रह्माद्यासनानि पात्राणि प्रयुनक्ति प्लक्षशाखां वपाश्रपण्यौ द्विगुणारशनामवदानश्रपणी स्वधितिपवित्रे स्रुचं स्रुगाज्यस्थालीरित्येकादश पशुदात्र्यादीनि च शूलाक्तनियूपाहुत्यादि अङ्गुलिमात्रपूर्वं च खाला(ता) विद्यन्ते। प्रयुनक्ति स्थालीपाकयोरुपकल्पनामिध्मवन्न तु प्रयोगानां मूलात्। अन्यस्तु तदुपेतकल्पनमुत्तमया आज्यनिर्वपनादि तेजोसीत्यवेक्षणास्थानमालयोग्यादि पञ्च जुहोतीत्यन्तं पश्चादग्न्यादानप्रभृतिनिर्मन्थप्रचारे लुप्यते प्रोक्षणादि परिसंख्यानात्। वरदानादि शिरस्यपिधानान्तोपपाशुयोजनान्तप्रोक्षो(क्ष्यो)पपाय्य पुनः प्रोक्ष्य पुनः पर्यग्निं कृत्वा शामित्रमुत्करस्योत्तरतो लक्षणं कृत्वा प्रणीय तत्तदेव प्रक्रम्यमाण वपाश्रपणीभ्यामन्वारभ्यते उल्मुकमग्रतो ननु तुरियशामित्रस्य प्रणीतत्वाद्यु ? पश्चात् स्वरुणार्जनादि वपाश्रपणान्ते इध्ममुपसमाधाय प्रधानस्थाने वपाहोमप्रकारेण तूष्णीमुत्करे मार्जनं बहवो ( बहून् ) ब्राह्मणांस्तर्पयित्वाऽवदानानि श्रपयति सादिते मुख्ये स्थालीपाकमधिश्रित(त्य) पर्यग्निह(क)रणं पुरोडाशस्थानत्वादनिरुक्तास्विष्टकृच्च स्थालीपाकस्य हुत्वा पशुदेवतायै अग्नये च स्विष्टकृत्स्थाने जुष्टां देवेभ्य इत्यादि···ष्ट···भिघारणान्तं त्र्यङ्गैः स्विष्टकृत्॥ [ इदं पुस्तकत्रयोपलब्धमिति गृहीतम् ] ॥ "जयानं··समवद्यति । स्रुचि उपस्तीर्य दक्षिणस्य कपिललाटस्येत्यादि त्रिभ्यः स्विष्टकृदङ्गेभ्यः सकृदवद्यति। ततोऽभिघारयति। अग्नये स्विष्टकृते। स्थाली०···। मेक्षणं दर्भांश्चाधायेत्यादि कर्मसमापनम्। पशोः पशुरेवदक्षिणा अध्वर्युब्रह्मणोः। अस्य पाकयज्ञपशोः समृद्ध्यर्थम्" ॥ ११ ॥ १२ ॥ १३ ॥

॥ इति पूरणव्याख्याने द्वितीयपुरुषे चतुर्थः खण्डः ॥ ४ ॥



१ सा, ख. ग. च. । २ तु—अन्यस्तु पशुरेव न पूर्वमात्रमपि स्थालीपाकनिमित्तकमित्यवधारणार्थम्, ख. । ३–६ ० घ. । ४ प्र्या, ख. । ५ ङ्गौ, ग. च. । ७–८ अधिकं, घ. । ९ पञ्चम, ख. ग. च. ।

# पञ्चमः खण्डः

---

रौद्रः शरदि शूलगवः ॥ १ ॥ प्रागुदीच्यां दिशि ग्रामस्याऽसकाशे निशि गवां मध्ये तष्टो यूपः ॥ २ ॥ प्राक् स्विष्टकृतोऽष्टौ शोणितपुटान् पूरयित्वा नमस्ते रुद्रमन्यव इति प्रभृतिभिरष्टभिरनुवाकैर्दिक्ष्वन्तर्दिक्षु चोपहरेत् ॥३॥ नाश्रृतं ग्राममाहरेत् ॥४॥

---

'रौद्रः शरदि शूलगवः' रुद्रो देवताऽस्य शरदि(दी)ति ऋतुनियमः। शूलगव इति पशुबन्धोनैनैवोच्छ्र? पशुसिद्धान्तेनावाग्रयणादिवत नित्यमध्ये विधाने नित्येयं वस्त्र? स्यात्तदकरणे प्रत्यवेयम्। अत्र विकारानाह प्रागुदीच्यां दिशि दिङ्नामान्यन्तराल इति बहुव्रीहिः। ग्रामस्येति निशि गवां मध्ये कालदेशगुणनियमा एते तष्टो यूपान् (पः) यूपपक्षे नियमः प्रकृतोऽष्टौ शोणितेन पूरयित्वेति गम्यते। जयान्कृत्वाष्टौ पुटान् प्राच्यादिक्रमेण दिनमन्त्र? ष्टभिरनुवाकैरुपहरेदुपपरैर्हरेत्स्थापयेन्निवेदयेदित्यर्थः ॥०॥ " प्रौष्ठपदी रौद्रः शरदि शूलगवः सर्वं पूर्ववत्। विशेषाः कथ्यन्ते। रुद्रो देवता। प्रागु० असकाशे दूरे रात्रौ गवां मध्ये अतष्टो यूपः शूलगवादन्यत्राष्टाश्रिः। अतष्टमूलः। निर्वापः। देवस्य वः। रुद्राय वो जुष्टान्निर्वपामि प्रधानस्थाने यो देवानामसीति। होमः॥ प्राक् हरेत् प्राच्यादिक्रमेण " ॥ १ ॥ २ ॥ ३ ॥

'शेषं' भूमौनिनयेत्। नाश्रृतं ग्राममाहरेत्। एव च भृतमाहरेदित्यर्थोक्तम्। अपि च चर्म चर्म च नाहरेदित्यर्थः। अयूपानेके। अयूपान यूपरहितान्। तत्र यज्ञे पशूनेके गृह्यकारा आहुरिति। अत्र यो देवनामसीति स्थालीपाकाहुतेः। रुद्राय स्वाहेति अङ्गाहुतिः। शेषमुक्तम्। अन्यस्तु किमनेकः पशुर्भवति पुटा( उता )ष्टाविति ननु च एक एव स्यात इति पुनः संदेहः सत्यमेवं तथापि सूत्रप्रत्ययं श्रुत्वास्ति संदेहः यदेवमभिहितं शूलगव इति तत्रेदं विचार्यते किमियं रूढिसंज्ञोतार्थेन्व (न्वर्थ) संज्ञा तत्र यदि रूढिस्तदा एक एव। अर्थेन्व ( न्वथा ) र्थे स्त्रियाष्टौ। यतः शूलगव इति शूलः संदे

---

१ पुटानि ग-च.। २-४ ०ष.। ३ हुति.स.। ५-२ हृन्यि.....। ७ श्रि.ग.च।

शेषं भूमौ निखनेदपि चर्म ॥ ५ ॥ अयूपानेके पाकयज्ञपशू-नाहुः ॥ ६ ॥ इति द्वितीयपुरुषे पञ्चमः खण्डः ॥ ५ ॥

(पं इ)ति ज्ञायते संघश्च बहुषु पशुषु भवति तेनैकस्तावद् व्याख्यास्यामः। वयं तु ब्रूमः । अष्ट भवन्ति कुतः शूलगव इति शूलबहुत्वं गम्यते तच्च पशुबहुत्वे गम्यते। तच्च पशुबहुत्वे(त्वं) भवति बहवोऽपि हृद्यास्तदा भवन्ति तद्बहुत्वे च शूलबहुत्वम्। अन्यथाष्टौ यूप? कृत्ये पठन्ति तस्माच्चाष्टौ पशवो भवन्ति इति गम्यते अष्टौ च शोणितपुटानीत्युक्तम्। तच्च पशुबहुत्वे अष्ट संभवन्ति। एत एवास्य स्वल्पं संभवति प्रचारश्च प्राजापत्यपशुवद् ज्ञेयः। नमः॥ "नाश्रृतं अश्रृतम् ऊ वध्यपशुशिरादिकं ग्रामं नाहरेत्। चर्मापि नाहरेत्। सर्वं भूमौ निखनेत् अयूपानेके ...। अन्यत्सर्वं पूर्ववत्। इति शूलगवपदानुक्रमणिका समाप्ता॥ अथ पशोः प्रत्याम्नायो लिख्यते। यदि अल्पसंभारतमः। पशुयागं कर्तुम-समर्थश्चेत्। तद्द्रव्येण पायसेन स्थालीपाकेन यजेत। प्रागुदञ्चमिति सूत्रे स्थालीपाकधर्मो विहितः स्थालीपाकपक्षे शोणिताभावात्स्थालीपाकमध्यात्। उदकं निःसार्य तेनोदकेनाष्टौ पुटान्पूरयित्वा प्राच्यादिक्रमेण नमस्ते रुद्रमन्यव-इति प्रभृतिभिरष्टभिरनुवाकैर्दिक्ष्वन्तर्दिक्षु सर्वासु दिक्षु प्रक्षेप इत्यर्थः। शेषः स्थालीपाकधर्मेण । इति पशोः प्रत्याम्नायपदार्थानुक्रमः ॥४॥॥५॥॥६॥

इति पूरणव्याख्याने द्वितीयपुरुषे पञ्चमः खण्डः ॥ ५ ॥



१–२ ० ष. । ३ यत, घ. । ४–५ अधिकं घ. ।

## षष्ठः खण्डः

अथातो ध्रुवाश्वकल्पं व्याख्यास्यामः ॥१॥ आश्वयुज्यां पौर्णमास्याम् ॥ २ ॥ ऋत्विगव्यङ्गः स्नातः शुचिरहतवासाः॥३॥ प्रागस्तमयान्निष्क्रम्योत्तरतो ग्रामस्य पुरस्ताद्वा शुचौ देशेऽश्वत्थस्याधस्तान्न्यग्रोधस्य वाऽपां वा समीपे वेद्याकृतिं कृत्वा तस्यां चतुष्कोणावनस्पतिशाखायामवसक्तचीरायां गन्धस्रग्दाम-

अथातो वृमः । 'अथ' शब्दोऽधिकारार्थः । अतः शब्दो हेतौ ध्रुवाश्वमिति कर्मणो नामधेय तस्य कल्पो विधानं तद् व्याख्यास्याम इति प्रतिज्ञानं वक्ष्यमाणस्य । एवं च काम्यमिदं सामान्येनोपदेशस्य प्रयत्नात् । कामश्चाश्वानां ध्रुवत्वं ध्रुवाश्वमिति नामधेयानुरूपं नित्यपशुप्रसङ्गेनायं काम्य उच्यते येन पुनरेव चोक्तं तस्य नूनं नित्याधिकारादिदमपि नित्यमतः प्रमादाद्वाऽनुक्तावज्ञानाद्वा इतरथा तन्मतानुसारी अनुकुर्वन् प्रत्यवेयात् । आश्वयुज्या तिथिनियममाह ॥ "यस्य यजमानस्य गृहेऽश्वा भवन्ति तस्य यजमानाश्वानां पुष्ट्यर्थमेतत्कर्म करोति ध्रुवाश्वकल्प इति कर्मनामधेयम् " ॥१॥ ॥२॥

'ऋत्विगव्यङ्ग' ऋत्विग् हुतधानार्पेयः। अव्यङ्गो ऽहीनाङ्गोऽनधिकाङ्गश्च ॥ शुचिर्निर्मलो ऽमानो विद्याकायकर्मणा ।अहतवासा नवमन्यपूर्व वासो यस्येति स तथोक्तः॥ " ऋ० अव्यङ्गः । नहीनाङ्गो नाधिकाङ्गश्च । ऋत्विक् शब्देनाध्वर्युरुच्यते । अत्र ऋत्विग्ग्रहणात्स्वयंकर्तृकाण्यपि कर्माणि भवन्ति । स्नातः शुचिरहतवासाः " ॥ ३ ॥

'प्रागस्तमयान्निष्क्रम्य' तिष्ठत्युत्तरतो ग्रामस्य पुरस्ताद्वा अपां वा समीपे कालदिग्देशगुणनियमाः । वेद्याकृति कृत्वा प्रकृतत्वात्पाशुक्या वेदेराकृतिः स्यात् तस्यां वेद्यां कृतायां किंविशिष्टायामाह चतुः कोणावसक्तचीरायाम् । चतुः कोणेषु उच्छ्रवनस्पतेः शाखासु ज्येष्टिषु अवसक्तान्यवबद्धा-

१ तं, ग. घ. च. । २ नोक्तं, ख. ग. च. । ३–४ अधिकं, घ. । ५–६ अधिक, घ । ७–८ ० घ. ।९–१० ० घ.

वत्यां चतुर्दिशं[1] विन्यस्तोदकुम्भसहिरण्यबीजपिटिकायामपूपस्रस्तरलाजोल्लोपिकमङ्गलफलाच्चवत्यां सर्वगन्धसर्वरससर्वौषधीः सर्वरत्नानि चोपकल्प्य प्रतिसरदधिमधुमोदकस्वस्तिकनन्द्यावर्त्तवत्यामग्निं प्रणीयाश्वत्थपलाशखदिर[2]रोहितकोदुम्बराणामन्यतम-

---

नि चीराणि चित्रा पताका यस्याः सा तथोक्ता । तथा गन्धाश्चन्दनागरुप्रमुखाः । स्रजः सुमनोमालास्ता एव दामा रास्नास्[3]तद्वत्यां वेद्यां तथा चतुर्दिशं विन्यस्तपूर्णकुम्भ' सहिरण्यबीजपीटिकायां ' चतुर्दिक्षु सहिरण्याः पूर्णा घटा यस्याः । व्रीह्यादिबीजपूर्णा उकल[4]भाण्डानि च यस्याः सा तथोक्ता तथा लाजा अपूपस्रस्तरेति चतुर्दशपदत्वधर्मे तुपमण्डकस्रस्तरवत्यां वेद्यां लाजा भ्रष्टव्रीहयस्तद्वत्यां लोपिकपिष्टमयानि च तद्वत्यामक्षता अनवहता व्रीहयस्तद्वत्यां सर्वगन्धवत्यां सर्वरत्नानि यस्यां सर्वौषधिव(म) त्यां ग्राम्यारण्या ओषधयः प्रतिसरवत्यां सूत्रमयः प्रतिसरः । दधिमधुमोदकस्वस्तिकनन्द्यावर्त्तवत्यां मोदकाः स्वस्तिका नन्द्यावर्तो गोधूमविकाराः । एवं विशिष्टायामग्निं प्रणीय । अश्वत्थ खादिररोहिकोपलाशोदुम्बराणामन्यतमस्येध्ममुपसमाधाय तिस्रः प्रधानदेवता इति यजति प्रणीयग्रहणं प्रत्यक्षनयनमग्नेः । अर्चयन्ति । अश्वत्थादीनां समुच्चयः स्याद् द्वन्द्वनिर्देशात्तन्निवृत्त्यर्थमन्यतमस्येत्युक्तं वेति वाशब्दं पठन्ति । अन्यतमस्य वेति तेषां समुच्चयो वान्यतमस्येति विकल्पः । उच्चैः श्रवसो भवतीति विष्णुमिति स्थालीपाकैः । स्थालीपाके विधिरुक्तः । मायं होमादूर्ध्वं पवित्र उली ? . .चीत्री तत्स्थालीपाकं श्रपयित्वा । ऋतुदेवतान्ते उच्चैः श्रवसे स्वाहा वरुणाय स्वाहा, विष्णवे स्वाहेति स्थालीपाकानामाज्यस्याश्विभ्यां स्वाहा, अश्वयुग्भ्यां स्वाहा जयादितन्त्र [ म् ] ममाप्तव्यम् । यतो न पशुसमानदेवता इमे स्थालीपाका अपोत्तरकालीनाः किं तर्हि अल्पवाचचनादपूर्वत्वामित्युक्तं पशुमिश्रेति समानदेवता यजति । अतः पशुविधिः । उच्चैः श्रवमं प्रभृति देवतार्थांश्छागानुपाकुर्यादुक्त इध्मः । वपानां युगपद्धोमो मन्त्रैक्यात् । जातवेदो वेपादिहोमेषु रुहः ? ( ऊहः ) पाकयज्ञैः

---

१ धि, ग. च. । २ कं, म. ग. घ. । ३ गम्ना, ग. च. । ४ उहक, घ. । ५–६ ० घ. । ७–८ ० घ. । ९–१० घ. । १०–११ ० घ. ।

स्येध्ममुपसमाधाय तिस्रः प्रधानदेवता यजत्युच्चैःश्रवसꣳ वरुणꣳ विष्णुमिति स्थालीपाकैः पशुभिश्चाश्विनौ चाश्वयुजौ चाज्यस्य ॥ ४ ॥

पशोः प्रकृतित्वेऽपि तद्वन्मानने इत्यतिदेशान्न किंचिदेतत् । एतवत्या स्थालीपाका अङ्गत्वेन पुनः श्रप्यन्ते । अङ्गैः प्रचर्य अश्विनौ चाश्वयुजी चाज्यस्य जयान् स्विष्टकृत् त्र्यङ्गैरुप्तः । यदि प्रधानान्तरवनस्पतिमिष्ट्वाऽश्विनौ वाश्वयुजौ यजेत् प्रकृत्यनुग्र आगन्तूनामन्ते निवेशवत्स्थालीपाकेन शेप उक्तः ॥

॥ " जयान्...। अपां वा समीपे वाशब्दश्चकारार्थे । अपां च समीप इत्यर्थः। एवं दिग्देशकालनियमाः । चतुर्षु कोणेषु । वनस्पतिशाखायामवसक्तानि चीराणि वस्त्रख(ष)ण्डानि पताकालक्षणानि यस्याः सा तथोक्ता । गन्धस्रग्दामवत्यां पुष्पमालावत्यामित्यर्थः। अगृहीतपुष्पप्रकरवत्यामित्यर्थः । चतुर्दिशं चतुर्दिक्षु । अपूपस्रस्तर० । तस्यां वेद्यां सर्वगन्ध० चोपकल्प्य कङ्कणं प्रतिमरदधि० इध्मार्थेऽश्वत्थ० समाधाय तत्र तिस्रः प्रधानदेवता उच्चैः श्रवसं वरुणं विष्णुमिति । तास्तिस्रो देवताः स्थालीपाकै र्यजेत पशुभिश्च स्थालीपाक धर्मस्तु प्रागुदक्ष्वमिति सूत्रे आग्नेयस्थालीपाके विहितः । पवित्रे स्रुव० अवदानधर्मेण स्थालीपाकस्यावद्यति । उच्चैःश्रवसे स्वाहेति जुहोति । ततो द्वितीय स्थालीपाकस्यावद्यति । वरुणाय स्वाहेति जुहोति ततस्तृतीयस्थाली० विष्णवे स्वाहेति जुहोति । ततश्चतुर्गृहीतमाज्यं गृहीत्वा अश्विभ्यां स्वाहा ततः पुनरवद्यति । अश्वयुग्भ्यां स्वाहेति द्वितीयम् । ततोजयादिकर्मसमापनम् । इमे स्थालीपाकाः पशुतन्त्रपठिता न भवन्ति । तत्र वपाहोमादनन्तरं तद्देवत्यस्थालीपाकः स्यात् । ततः स्थालीपाकतन्त्रं समाप्य पशुयागः प्रारभ्यते । तद्विधानं पूर्वोक्तं तत्र उच्चैःश्रवसं वरुणं विष्णुमिति पशुभिर्यजेत । तत्र प्रतिदैवतः पशुः । एकमुच्चैःश्रवसे वरुणाय तृतीयं विष्णवे । वपानां युगपद्धोमः । मन्त्रैक्यात् । जातवेदो वपया गच्छ देवानिति । ततः पूर्ववत् पश्वङ्गहोमः । पूर्वमुच्चैःश्रवसे " ॥ ४ ॥

१-४ ० घ. । २ माने ० ख. । ३ म्प्यत्र ग. च. । ५-६ अधिकं, घ. ।

जयान् हुत्वा या ओषधयः समन्न्यायन्ति पुनन्तु मा पितरोऽग्नेर्मन्व इति चतुर्भिरनुवाकैरपोऽभिमन्त्र्याश्वान्स्नपयन्ति[1] ॥ ५ ॥ गन्धस्त्रग्दामभिरलंकृत्य प्रदक्षिणं देवयजनं त्रिः परियन्ति ॥६॥ प्राहर्षं कारयन्ति ॥ ७ ॥ इष्टे यथास्थान[2]ꣳ व्रजन्ति ॥ ८ ॥ गौरनड्वाँश्च दक्षिणा ॥ ९ ॥ इति द्वितीयपुरुषे षष्ठः खण्डः ॥६॥

' या ओषधयः ' अपां समीप इत्युक्तं तासामभिमन्त्रणं स्नैपनं चाश्वानाम् । तानश्वान् गन्धस्रग्दामभिरलंकरणदेवयजनप्रदक्षिणं त्रिः परियन्ति । प्रहर्षं कारयति वडवादर्शनाभीष्टं यथार्थस्वस्थानं व्रजन्ति । अश्वा गौरनड्वांश्च दक्षिणा अश्वा मा ? वाता (तो)त्राधिकारो न परकीयं (:) स्नाप्यत इति ॥ ॥ " देवयजनशब्देन वेदिरुच्यते । प्रहर्ष का० प्रहर्षं हेषारवम् । इष्टेर्यथास्थानं व्रजन्ति । इष्टै (:) समाप्ते कर्मणि अश्वशालायां व्रजन्ति ध्रुवाश्च कल्पः समृद्धर्यम् । " ॥ ५ ॥ ॥ ६ ॥ ॥ ७ ॥ ॥ ८ ॥ ॥ ९ ॥

इति पूरणव्याख्याने द्वितीयपुरुषे षष्ठः खण्ड ॥ ६ ॥



१ स्नाप, ग. च. । २ इष्टस्थानि, ग. च. । ३ स्र, ग. च । ४–५ ० घ. । ६ री, घ. । ७–८ । अधिकं, घ. ।

## सप्तमः खण्डः

आग्रहायण्यां पौर्णमास्यां पयसि स्थालीपाकꣳ श्रपयित्वा तस्य जुहोति—

अपः श्वेतपदाग्नहि पूर्वेण चापरेण च ।
सप्त च वारुणीरिमाः प्रजाः सर्वाश्च राजबान्धव्यैः स्वाहा ॥
श्वेतो रुषत्यो विदधात्यश्वो दधद्गर्भꣳ वृषः सत्वर्यां ज्योकॣ ।
समं जनाश्चक्रमयो वसानाः प्रोषादसाविरसि विश्वमेतत् ॥
श्वेताय रौषिदश्वाय स्वाहा.
न वै श्वेतस्याभ्याचारे अहिर्जघान किंचन ।
श्वेताय वैतहव्याय स्वाहा. ॥
अभयं नः प्राजापत्येभ्यो भूयात् स्वाहा ॥ इति ॥ १ ॥

'आग्रहायण्यां पौर्णमास्याम्' आग्रहायणी मार्गशीर्षी तस्यां पयसि स्थालीपाकं[1] श्रपयित्वा तस्यै[2] जुहोति। अपः श्वेतपदेत्याद्या आहुतीश्चतस्रः प्रधानस्थाने यद्यपि सर्पबलीनामुत्तरकालं सर्पयागा स्थालीपाकेनायं क्रियते तथापि विना तदङ्गप्रतिपादकस्य प्रकरणादेर्विनियोजकस्याभावात्तस्मान्नित्योयं सर्पयागो विनैव सर्पबलिभिर्भवत्येवं येषां तु सर्पबलयो नित्यास्तेषामप्यङ्गप्रधानत्वाभावान्निरूपणीयः स यदीप्येतेति चरमस्यैव प्राथम्यात्स्यात्सर्पबलीनामङ्गतास्तु विभ्यादिति भयान्निमित्तत्वम् ॥ "आग्र० जुहोति तत्रादौ प्राणायामकरणं पात्राणामासादनं च। निर्वापः। देवस्य व० श्वेतपत् श्वेतरूपत् श्वेतवैहव्यप्रजापत्येभ्यो जु० स्थालीपाकाधिश्रयणं पूर्ववत्। स्थालीपाकस्यावद्यति। अथ श्वेतपदागहीत्यनेन प्रथमामाहुतिं जुहोति। अभयं नः स्वाहेति चतुर्थीम्। ततो जयादिकर्मसमापनम्। अध्वर्युब्रह्मणोर्दक्षिणादानम्। [illegible]ब्राह्मणभोजनम्। तस्मिन्दिने रात्रौ मृदुतृणमये स्वस्तरे " ॥ १ ।

१ वा, ग. च. । २ सोः, ग. च. । ३–४ ० छ. । ५–६ [illegible] छ. ।

स्रस्तरेऽहतꣳ वास उदग्दशमास्तीर्योदकाꣳस्येऽश्मानꣳ व्रीहीन् यवान्वास्य परिषिञ्चति स्योना पृथिवि भवेति द्वाभ्याꣳ सुत्रामाणमिति द्वाभ्याम् ॥ २ ॥ शमीशाखया च सपलाशयोदश्च त्रिःसमुन्मार्ष्टि स्योना पृथिवि भवेति द्वाभ्याꣳ सूत्रामाणमिति द्वाभ्यां नमो अस्तु सर्पेभ्य इति तिसृभिश्च ॥ ३ ॥

शाम्यन्तु सर्पाः स्वशया भवन्तु ये अन्तरिक्ष उत ये दिवि श्रिताः।
इमां महीं प्रत्यवरोहेम ।
शिवामजस्राꣳ शिवाꣳ शान्ताꣳ सुहेमन्तामुत्तरामुत्तराꣳ समां क्रियासम् ॥

इति ज्येष्ठ प्रथमानुदीच आवेशयति ॥४॥ उदीर्घं जीवो असुर्न आगादप: प्रागात्तम आज्योतिरेति । आरैकपन्थां यातवे सूर्या-

अभ्यागतप्रत्यवरोहणमाह—'स्रस्तरे' मृदुतृणशयनार्थं अहतं वास उदगग्रदशमास्तीर्य उदकांस्ये उदकवति अश्मानमूलं व्रीहिः षष्टिकादिर्यवं धान्यविशेषः । तेषु प्रक्षिप्य परिषिञ्चति । उदकेन वा समन्तं स्योनापृथिवी भवेति मन्त्रद्वयेन सकृत्परिषिच्य पुनः सकृन्मन्त्रद्वयेन यद्वा चत्वारोऽभिषेकाः प्रति मन्त्रं शमीशाखया पर्णसहितया त्रिरिति प्रतिवाक्यं मन्त्रगणं सकृत्सकृदुच्चारणेन त्रिग्रहणं क्रियते प्रतिमन्त्रमित्यभ्यावृत्त्यर्थमितरथानुवादमात्रमनर्थकं स्यात् । उदकमुदकं निषेच संमार्गं करोति ॥ "द्वाभ्यां सकृत परिषिञ्चति । त्रिः समु० नमोऽस्तु सर्पेभ्य इति तिसृभिरृग्भिस्तृतीय समुन्मार्जनं करोति । एवं सप्तभिर्मन्त्रैस्त्रिः समुन्मार्ष्टि " ॥ २ ॥ ॥ ३ ॥

'शाम्यन्तु' सर्पा इति मन्त्रेण ज्येष्ठप्रथमानुदीच दक्षिणत आरभ्य [illegible] ज्येष्ठत्वं [illegible] गमनकाले च तत्र प्रत्यवरोहणं [illegible] । [illegible] स्थापित न [illegible] यथा [illegible] । [illegible] । यां वा [illegible]

[illegible]

**त्रीणि नाभ्यानि फाल्गुन्यामाषाढ्यां कार्त्तिक्याम् ॥ ९ ॥ तासु नाधीयीत ॥१०॥ तासु पयसि स्थालीपाकः स व्याख्यातः ॥ ११ ॥ ॥ इति द्वितीयपुरुषे सप्तमः खण्डः ॥ ७ ॥**

'त्रीणि नाभ्यानि' कर्माणि भवन्ति इति तान्याह-'फाल्गुन्याम्' निगदव्याख्यातं तासु नाधीयीत । अङ्गार्थं पुनर्न निषेध इत्यष्टकासु वक्ष्यामः। अनादिष्ट दैवतत्वादाग्नेयः स्यात् । ननु नित्ये आग्नेये स्थालीपाकः फाल्गुन्यादिनिमित्तकः पयसीति गुणविधिः स्याद्यथाग्निहोत्रमिवेन्द्रियकामस्य नैतदन्त्यस्वरूपत्वादनित्यमप्यस्ति । तत्र प्रसङ्गानित्यसिद्धिस्तथा च मित्रो जनान्यातयतीत्यादौ पूर्वाहुत्या सरूपे न्यां दुग्धा (ग्ध्वा) पुनरग्निहोत्र मुक्तम् । तस्मात्तण्डुलैरग्निहोत्रे नास्ति प्रसङ्गानित्यसिद्धिः । पय आदिना पुनरग्निहोत्रं होतव्यमितरथा यथास्रजमविछिद्येतेति नित्यविच्छेदः स्यात् कथिता व्यञ्जनादिदोषा एव शो ? रित्यनुषञ्जनेन यत्स्वरूपहानिः क्रियते अग्नयेऽनुब्रूहीति केवलस्याग्नेः प्रयोगात् । अनुषङ्गस्य च समुच्चयार्थम् ॥ ॥ "अथ सूत्रक्रमात्रीणि नाभ्यानि कर्माणि भवन्ति । फाल्गु० । तासु तिथिषु नाधीयीत । आचारेणान्य इति सूत्रेण सर्वासु पौर्णमासीषु अनध्याये न प्राप्ते पुनरनध्ययनग्रहणमृतुसन्धिष्वनध्यनप्राप्त्यर्थम् । तासु पयसि स्थालीपाकः । स त्वाग्नेयेन स्थालीपाकेन व्याख्यातः । अनादिष्टदेवतेष्वग्निमिति वचनात् । अग्निः सर्वा देवता इति श्रुतेः । तद्विधानं प्रागुदञ्चनमिति सूत्रे विहितम्-इति नाभ्यकर्मक्रमः" ॥ ॥ ९ ॥ ॥ १० ॥ ॥ ११ ॥

॥ इति पूरणव्याख्याने द्वितीयपुरुषे सप्तमः खण्डः ॥ ७ ॥



# अष्टम: खण्ड:



तिस्रो ऽष्टकाः॥ १ ॥ ऊर्ध्वमाग्रहायण्याः प्राक् फाल्गुन्यास्तामिश्राणामष्टम्यः ॥ २ ॥ तासु नाधीयीत ॥ ३ ॥ तासु पयसि स्थालीपाकꣳ श्रपयित्वा तस्य जुहोति—

या देव्यष्टकेष्वर्पसापस्तमास्तपा अव्रया असि ।
त्वꣳ यज्ञे वरुणस्यावया असि तस्यै त एना हविषा विधेम ॥
उलूखला ग्रावाणो घोषमकुर्वत हविः कृण्वन्तः परिवत्सरीयम्

'तिस्रोऽष्टकाः' त्रीणि नाम्यानीति त्रिसंख्यामाम्येनानन्तरमुच्यते तिस्रोऽष्टका इति अष्टकादिसमुदायस्यैकं कर्मत्वम् । चातुर्मास्यवत् तासां कालमाह—ऊर्ध्वमाग्रहायण्यास्तामिश्राणां कृष्णपक्षाणामित्यर्थस्तासु नाधीयीत । सर्वास्वष्टकास्वनध्ययनसिद्धमाचारेणान्य इत्येवं तर्हि नियमार्थस्ततोऽन्यास्वष्टमीष्वधीयीतेति तदसत् । अनध्याय-प्रकरण एवैतद्वक्तव्यं नाष्टकाप्रकरणे ऽनुपयोगात् । तास्विति सामान्यलक्षणापि न भवति तिस्रोऽष्टकास्त्रिरात्रमिति आचारेणैवसिद्धत्वात् । तस्मात् क्रत्वर्थमिदमध्ययनम् । प्रकरणाद्यज्ञोपवीतीतिवत् । यथा यज्ञोपवीती दक्षिणाचार इति एवं च यद्यधीयीताष्टकाकर्म विगुणं स्यात् तत्त्वान्नातं प्रायश्चित्तं क्रत्वर्थं कुर्यादभोजनं द्वितीयं प्रायश्चित्तं स्नातकव्रतलोपात् ॥ " तासां मध्ये प्रथमा मार्गशीर्षकृष्णपक्षे । मध्यमा पौषकृष्णपक्षे । उत्तमा माघकृष्णपक्षे । तासामादौ श्राद्धं न कुर्यात् । यथाह कात्यायनः—नाष्टकासु भवेच्छ्राद्धं न श्राद्धे श्राद्धमिष्यते इति "
॥ १ ॥ २ ॥ ३ ॥

'तासुपयसि' इत्यादीनि सिद्धं या देव्यष्टके उलूखला ग्राव वा यः याज्ञनाः (३) संवत्सरस्य पतन्तः स्थालीपाकान् । हेमन्तो वसन्तो० शान्ता पृथिवी. आपो मरीची. कविरग्निरिन्द्र (४). विश्वा आदित्या इति पञ्चात्मन्दं ॥

१ स्यात्, ग. च. । २ पदम्, ग. च. । ३ ल, ग. च. । ४–५ अधिक, घ. ।
४ पदमा, ग. च. । ५ ल, ग. च. । ६–८ ० घ. ।

एकाष्टके सुप्रजसः सुवीरा ज्योग्जीवेम बलिहृतो वयं ते ॥
यां जनाः प्रतिनन्दन्ति रात्रीं धेनुमिवायतीम् ।
सꣳवत्सरस्य या पत्नी सा नो अस्तु सुमङ्गली ॥
सꣳवत्सरस्य प्रतिमाꣳ ये त्वा रात्रीमुपासते ।
तेषामायुष्मतीं प्रजाꣳरायस्पोषेण सꣳसृजस्व ॥

इति चतस्रः स्थालीपाकस्य ॥ ४ ॥ अष्टकायै सुराधसे स्वाहेति सर्वत्रानुषजति ॥ ५ ॥

हेमन्तो वसन्तो ग्रीष्म ऋतवः शिवा नः शिवानो वर्षा अभयाश्रिरं[1] नः
वैश्वानरोऽधिपतिः प्राणदो नो अहोरात्रे कृणुतां दीर्घमायुः ॥
शान्ता पृथिवी शिवमन्तरिक्षं द्यौ नो देव्यभयं कृणोतु ।
शिवा दिशः प्रदिश आदिशो न आपो विद्युतः परिपान्त्वायुः ॥
आपो मरीचीः परिपान्तु विश्वतो धाता समुद्रो अभयं कृणोतु ।
भूतं भविष्यदुत भद्रमस्तु मे ब्रह्माभिगूर्त्तꣳ स्वराक्षाणः[2] ॥
कविरग्निरिन्द्रः सोमः सूर्यो वायुरस्तु मे अग्निर्वैश्वानरो अपहन्तु पापम् ।
बृहस्पतिः सविता शर्म यच्छतु श्रियꣳ विराजं मयि पूषा दधातु ॥
विश्वे[3] आदित्या वसवश्च सर्वे रुद्रा गोप्तारो मरुतश्च सन्तु ।
ऊर्जं प्रजाममृतं दीर्घमायुः प्रजापतिर्मयि परमेष्ठी दधातु ॥

इति पञ्चाज्यस्य ॥ ६ ॥

---

"तत्रादौ पात्राणामासादनं पवित्र अवदानधर्मेण स्थालीपाकस्यावद्यति या देव्यष्टकेष्विति प्रथमामाहुतिं जुहोति । उलूखला ग्रावाण इति द्वितीयाम् । एवं स्थालीपाकं हुत्वा स्रुवेण पञ्चाज्याहुतीर्जुहोति हेमन्तो वसन्त इति प्रथमाम् " ॥ ४ ॥ ५ ॥ ६ ॥

---

१ शरं, ग. च. । २ रारक्षा, ग. च. । ३ विश्वा, ग. च. । ४–६ अधिकं, घ. ।

जयान्हुत्वेडामग्न इति स्विष्टकृदिति ॥ ७ ॥ एवꣳ सर्वासु ॥ ८ ॥ इति द्वितीयपुरुषेऽष्टमः खण्डः ॥ ८ ॥

---

इडामग्न इत्युक्त्वा स्विष्टकृतहोमं जुहुयादित्यर्थः । अग्नये स्विष्टकृत इति मन्त्र एवोच्यते । अतिदेशसूत्रमनर्थकं कुतस्तासु पयसि स्थालीपाक इत्यादि धर्मस्तासु सर्वास्वेवोपदिष्टं तास्विति बहुवचनमेवं तर्हि गृह्यान्तरोक्ताष्टकासंग्रहार्थः । एवं सर्वास्विति तेन प्रोष्ठपदाष्टकास्वप्येवं स्यात् । उपसंहारार्थं वा धूमादेरिवात्र चोद्यमाग्रहायण्या ऊर्ध्वं तिस्रोऽष्टकाः प्रागेव फाल्गुन्या भवन्ति । अनर्थकं फाल्गुनीग्रहणमधिकमासे कदाचित्फाल्गुनीद्वयं स्यात्तदा द्वितीया फाल्गुन्यवधित्वेन गृह्यते न प्रथमेति ह्यष्टकाहोमं चतुरष्टकोवेति च गृह्यान्तरे येनोक्तमाग्रहायण्याः कथं प्राक् फाल्गुन्यास्तिस्र एवेत्याशङ्क्याधिकमासेऽपि तिस्र एवेति नियमार्थमिति परिहृतं तन्नामासु तु तन्निमित्तग्रहणाद्यौचित्यानुवादत्वात् । यास्तिस्रोऽष्टका इत्यनूद्य ता एकं कर्मेति तासामेकविधानार्थं । न चाग्रहायणीद्वयं कदाचिदपि संभवति पुनरुक्तत्वादेवमग्रहायणोमासस्य सौर चान्द्रमसमनयोर्भेदेन तु सर्वदैवाग्रहायणद्वयं कदाचिदेव स्यात्तदा मासद्वयसन्निपातः स्यात् ॥ "ततो जयहोमः विधिना स्विष्टकृते समस्ताति । इडामग्न इति मन्त्रेण स्विष्टकृद्धोमः । एवं सर्वासु पूर्वं तिस्रोऽष्टकाः । [illegible] । एवं सर्वास्विति पुनर्वचनं भाद्रपदग्रहणार्थम् । उत्तमायां निर्देशः । तदत्रास्मिन् खण्डे वक्ष्यति" ॥ ७ ॥ ८ ॥

॥ इति पुरन्दरव्याख्याने द्वितीयपुरुषेऽष्टमः खण्डः

## नवमः खण्डः

उत्तमायाः प्रदोषे चतुष्पथेऽङ्गशो गां कारयेत् ॥ १ ॥ यां य आगच्छेत्तस्मै तस्मै दद्यात् ॥ २ ॥ श्वो ऽन्यां कारयेत् ॥ ३ ॥ तस्या वपां जुहुयात्—

वह वपां जातवेदः पितृभ्यो यत्रैतान्वेत्थ निहितान्पराके
मेदसो घृतस्य कुल्या अभिनिःस्रवन्तु सत्याः सन्तु
यजमानस्य कामाः स्वाहा ।

इति ॥ ४ ॥ अथास्या वक्षस उद्गोदनꣳ श्रपयति ॥ ५ ॥ तस्याष्टकाहोमकल्पेन शेषो व्याख्यातः ॥ ६ ॥

---

उत्तमायाः—इदानीमष्टकावन्नित्यं पितृयज्ञमाह 'उत्तमाया' इत्यादि उत्तमायाः फाल्गुन्याः प्राग्याष्टका तस्या यः प्रदोषस्तस्मिन्प्रदोषे गां कारयेत् । शमितारं प्रेष्यत्यङ्गशो गां कुरुतेति यो य आगच्छेत्कार्यवशाच्चतुः पथे तस्मै तस्मै दद्यात्पितरोऽत्र कर्मणि देवता स्त्री गौः कुतः श्वो ऽन्यां द्वितीयामिति प्रतीतेः । अनुवाक्याद्यन्ते चास्याः प्रयोगादोदनस्याप्यन्तर एव श्रपणं नैवमोदनशब्देन शामित्यस्माभिः कल्प्यते नाभिधानवृत्त्या प्रतीयते शालाग्नि रपि आदिग्देशसंप्रत्ययात् तस्मादोदनं स्थालीपाकत्वात्—शालाग्नौ श्रपयेदिति लच्यते तस्याष्टकाहोमेन शेषो व्याख्यातस्तस्यवक्षस ओदनस्य चाष्टका होमेनाष्टकाहोमविधिना शेष उक्ताद्योन्यः सोऽत्र शेष उच्यते तस्योदनादेः म तस्य मानो य उत्तरो विधिरिति । इमं स्तोममर्हत इत्यादि (:) सोऽष्टकाहोमव- दित्यर्थः । ननु वपाहोमस्याशेषश्रुतत्वाद्यभावात् । वपा भेदस्य न शेष उक्ता- देव हेतोरोदनः प्रधानः प्रधानं द्वितीयं ता एव कर्त्तव्या गोर्वा प्रतिनिधिः कार्यः म चागमसादृश्यात्पश्वङ्गं पायसं वा स्यात् प्रतिनिधिनापि नित्यं कार्यं मन्त्राणां- समानत्वात् । मांसादोदनाच्चावदाय चतस्र आहुतीः सह जुहुयात् या देव्यष्टका इत्यादि पञ्चोत्तरा आज्यस्येडामग्न इति स्विष्टकृत् ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

---

१ पथं गत्वाङ्गशो, ग. च. । २ प्रदद्यात्, ग. च. । ३ न्यां, ग. च. ।
४–५ ० घ. । ६–७ ० घ.

**अवशिष्टं भक्त४ं रन्धयति ॥ ७ ॥ श्वोऽवशिष्टं भक्तं रन्धयित्वा पिण्डानामावृता त्रीन्मा४ंसौदनपिण्डान्निदधाति ॥८॥**

" इदानीमुत्तमाया विशेषा लिख्यन्ते उत्तमाया माघकृष्णाष्टम्याः । तस्यां यः प्रदोषस्तस्मिन्प्रदोषे चतुष्पथे गत्वा गां कारयेत् । कार्यवशाद्यो य आगच्छति पश्वङ्गानि तस्मै तस्मै दद्यात् । का ( क ) लौ गौः ( ? ) पशोर्निषेधत्वात् । गृहे पायसं पाकं श्रपयित्वा यो य आगच्छेत्तस्मै तस्मै दद्यात् पितॄन्प्रीणात्विति अपसव्येन दद्यात् । पश्वभावेऽपि पायसमिति वचनात् । श्वोऽन्यां कारयेत् । श्वो नवम्यामित्यर्थः प्रभाते सति अन्यां गां कारयेत् । पितरोऽत्र द्वितीयां नवम्यां दिवसे तस्याप्यभावे पायसमित्यर्थः । तत्रादौ पात्राणामासादनम् । पवित्रे ततः स्थालीपाकतण्डुलांस्त्रेधा विभज्य एकेन भागेन मांसस्थालीपाककरणम् । भागद्वयमवशेषणीयं ब्राह्मणभोजनार्थं पिण्डार्थं च विधिना स्थालीपाकाधिश्रयणं पूर्ववत् ततो वापहोमः । अथ स्थालीपाकस्यावद्यति तस्याष्टकाहोमकल्पेन शेषो व्याख्यातः । मेक्षणं दर्भांश्चाधायेत्यादि कर्मसमापनम् । अध्वर्युब्रह्मणोर्दक्षिणादानम् ॥ ६ ॥

' अवशिष्टं भक्तं रन्धयति ' बहून् पाकान् वपावक्षसोरुपयुक्तयोर्यदन्यत्तदवशिष्टं तस्यार्द्धं भक्तं च रन्धयति । कथं पुनरर्द्धं लभ्यते यावतावशिष्टमित्युक्तं नैष दोषः श्वो विशिष्टमिति पुनरवशिष्टवचनादर्द्धमिति गम्यते भक्तं मांसोदनं बहूननेकविधान्पाकविशेषान् रन्धयति साधयति किमर्थं रन्धयति इति चेदुक्तं ब्राह्मण एव हविःशेषं भुञ्जीत. ब्राह्मणभोजनार्थं रन्धनमिति श्वोऽवशिष्टं रन्धयित्वा श्वो दशम्यामवशिष्टं ब्राह्मणभोजनाद्यदवशिष्टमर्द्धं तदभक्तमोदनमित्यर्थाद्रन्धयित्वा साधयित्वा किं कुर्यादित्याह पिण्डानामावृत(तॉ)त्रीन् मांसोदनपिण्डान्निदधाति पिण्डानामावृता पिण्डपितृयज्ञपिण्डानामावृदितिकर्त्तव्यता तया आवृता त्रीन् मांसोदनपिण्डान्निदधाति मांसस्यौदनं मांसौदनमथवा मांसं च तदेव तच्चामावेति मांसौदनं तस्य त्रीन्पिण्डान्निदधाति त्रिग्रहणात्सर्वमेव मांसौदनश्चा ( श्च ) तेषु पिण्डेषु प्रतिपादयेत् तेन पितृयज्ञहोमो न भवति तेनापि ब्राह्मणभोजनमवशेषयेत् ।

१—२ अधिपन्. प. । ३-४ ० प. । ५ मानीया आ. ग. च. । ६ ना ( पिण्ड-पितृयज्ञवत्सर्वमनाप्य ) द. । ७ नं, ८. ।

## श्राद्धमपरपक्षे पितृभ्यो दद्यात् ॥ ९ ॥

अन्येतु अवशिष्टभक्तं रन्धयित्वा बहूनङ्गविकारान् अपयति पिण्डानामित्यादि तेषां पाठे नवम्यामेव सर्वमेव च मांसं त्रिषु प्रतिपाद्य अत्र रन्धयित्वेति सिद्धं अपयतीति बहु एकार्थमनुदितं न पुनरुक्तदोषः ॥ ७ ॥ ८ ॥

( बहून्पाकविशेषान् रन्धयित्वा अवशिष्टं भक्तं रन्धयति । भक्त- )
( शब्देन मांसमुच्यते । भागद्वयावशिष्टतण्डुलानां मध्ये एकं भागं रन्धय- )
( तीत्यर्थः । तेन पाकेन मांसावशिष्टेन च ब्राह्मणान् भोजयेत् । अपसव्यं )
( कृत्वा एभिर्ब्राह्मणभोजनैः पितॄन्प्रीणाति । एतत्सर्वं नवम्यां कुर्यात् । )
( श्वो दशम्यामवशिष्टभक्तं रन्धयति तृतीयभागतण्डुलानित्यर्थः । तेन )
( त्रीन्मांसोदनपिण्डान्निदधाति तद्विधानमाह कर्षूकरणं यथाविधि स्तरणम् )
( एत पितरो० )

इदानीं पिण्डानामावृतेति प्रसङ्गात्स्वप्रधानं नित्याधिकाराच्च नित्यं श्राद्धमाह—'श्राद्धमपरपक्षे पितृभ्यो दद्यात्' तत् सत्यं विधीयते यस्यां बुद्धौ सा श्रद्धा उपवासादिभिरनुष्ठिता श्रौतस्मार्त्तादिषु कर्मसु आदरेण प्रवृत्तिर्या तया श्रद्धावान् उच्यते पुमान् श्रद्धया यन्निवर्त्यते तत् श्राद्धं रूढ्यापि पित्र्यं कर्मोच्यते तस्य कर्मणः साधनं यत्पायसादि द्रव्यं तदिह श्राद्धमित्युच्यते तदपरपक्षे पितृभ्यो दद्यात् । श्राद्धग्रहणं संज्ञार्थं तेनापरपक्षादन्यत्रापि स्मृतिवचनादयनमृताहतीर्थादौ अनेन विधिना श्राद्धं स्यात् । अपरपक्षग्रहणममावास्यायामन्यत्रेति गम्यते । सप्तमीनिर्देशादेकस्मिन्नहनि श्राद्धं कृत्वा कृती भवति न प्रत्यहं न हि कालावृत्तौ कर्मावृत्तिः । अत्यन्तसंयोगे तिथिनिर्देशादन्यत्रापि । पितृभ्य इति पितामहप्रपितामहशब्दौ लुप्तौ बहुवचनात् (द) सरूपैकशेषत्वं गमकत्वात् । मातृपितामही प्रपितामहीशब्दा ( नुप्रास्ते ) लुप्ता द्रष्टव्याः पुमान् स्त्रियेतिवचनादन्वष्टकासु हि स्त्रीभ्योऽपि श्राद्धदानं स्मर्यते हारीतेर्न तु मातुः पिण्डदानं पितृपिण्डदानादनन्तरमुक्तम्—

'श्राद्धादीनां तथा पिण्डी पिण्डान्दद्यात्सुयन्त्रितान् ।
उदकाञ्जलिं दीपं च भोजनाभ्यञ्जने तथेति ॥'

१-२ ० घ । ३-४ एतन्मध्यस्य स्थाने ब पुस्तके यदस्तितदर्धचन्द्रद्वयमध्येऽस्मै निवेशितं द्रष्टव्यम । ५-६ ० घ. । ७ इदं पदं ० घ. । ८-९ ० घ. ।

अनुगुप्तमन्नं ब्राह्मणान् भोजयेत् नावेदविद्भुञ्जीतेति श्रुतिः ॥१०॥

मातापित्रोरुपकाराय आद्यमेकादशेहनि श्राद्धं स्मृतं तीर्थादिष्वपि ताभ्यां पुत्रः प्रीत्यर्थमाचरेत् ॥

पितॄणां पिण्डयज्ञस्तु स्त्रीणां नैव निरूप्यते।

पितुर्नाम्नासावित्येकवचनेन उत्पत्तिविनियोगाभ्यां पितृभ्य इति संप्रदानश्रुतेः मनुहारीताद्युक्तविधानाद् ब्राह्मणेषु पितृवदस्या(म्) प्रपूजयेत्। अपरपक्षशब्देनामावास्या गृह्यते ( माघान्तामावास्या ) ॥ ९ ॥

'अनुगुप्तमन्नं ब्राह्मणान् भोजयेत्'। अनुगुप्तमननुभूतमन्नं शूद्रपतितरजस्वलासारमेयादिभिर्न स्पृष्टमनालोकितमन्न(म्) शाल्योदनपायसादि ब्राह्मणांस्त्रिप्रभृति असंभवेऽप्यसम्पत्तौ वा भोजयेदनुगुप्तादेवान्नात् पिण्डं दद्यात्। हुत्वोच्छिष्टं ब्राह्मणेभ्यः प्रदाय पिण्डेभ्योवशेषयेदिति भोजयितुं नियोगो हारीतवचनात्। नावेदविदो भोजयेदिति श्रुतिः। अवेदवित् श्राद्धमेव न प्रतिपद्येतेत्यर्थः। अथवा नावेदविदो भोजयेदिति भोजयितुं नियोगाधिकारित्वात् सर्वदा नाधियज्ञाधिदेवताध्यात्मस्वरूपं यो वेत्ति। अथ वा सर्वदैकदेशवित्। विधिवाक्यानां चोत्पत्तिविनियोगप्रयुक्तमधिकारहेतुमनुष्ठ विधेयविवेक [illegible] [illegible]प्रधानविशेषं च प्रकृतिविकृतिभावं [illegible]र्थापेक्षितार्थान्यस्य[illegible]योश्च प[illegible]रूपानियमौ वचनुवातौ (?) अपूर्वार्थवादत्वेन प्रसङ्गादृतौ [illegible]विधगोदान[illegible]णयोर्वृत्तं त्रिविधवस्तुनोऽश्च यो वेत्ति स वेदवित् तं वेदाध्ययनशीलं भोजयेत्। नावेदविदुपवेशकादि पक्ति(ङ्क्ति) दूषकं न भोजयेत्। श्रुतिक्रमं प्रतिषेधाति[illegible]यार्थं व्यतिक्रमेण भोक्तुः सकाशाद् भोजयितुः [illegible] प्रायश्चित्तं यथा स्यात्। पञ्चम्यादिषु पुत्रकामादेगुरु[illegible] [illegible]। [illegible]न्तयोगे श्राद्धं न तस्मिन्नेवापरपक्षे पञ्चम्यादितिथिषु पुनः पुनः श्राद्धदानं [illegible] [illegible]न्यस्मिन्नेवापरपक्षे [illegible] [illegible] [illegible] गुणान्तरानुरोधेन प्रधान[illegible] [illegible] [illegible]परपक्षे संभवन्ति। [illegible] [illegible] [illegible] [illegible] श्राद्धं न कुर्यात् [illegible] [illegible]। [illegible]

१-२ [illegible] [illegible]

९ [illegible] [illegible]

१२- [illegible] [illegible]

यदि गवा पशुना वा कुर्वीत प्रोक्षणमुपपायनं पर्यग्निकरण-मुल्मुकहरणं वपाहोममिति ॥११॥ त्रैधं वपां जुहुयात् स्थाली-पाकमवदानानि च ॥१२॥ सोमाय पितृमते स्वधा नम इति जुहोति

---

[1]अथवाऽपरपक्षस्य पञ्चमीप्रभृतिषु काम्यं श्राद्धं काम्यत्वं नित्यत्वं च संयोगपृथक्त्वादेकस्य न भवति अग्निहोत्रादिवदतो नैमित्तिकं गुणमाह— 'यदि गवा पशुना वा कुर्वीत' श्राद्धमपरपक्ष इत्यनुवर्त्तते कुर्वीतेत्यनुवादः ददातीत्यनुवर्त्तते करोतेरिव विशेषो ददाति। किं करोति देवदत्त इति करोतिविशेषविविदिषया [3]प्रश्ने वरं ददातीति प्रतिवचने दानविशिष्टं करोति [4]ब्रूते। प्रोक्षणे चोपपायनं पर्यग्निकरणं वपाहोम इति परिसंख्या। [5]अपूर्वविधित्वं तु युक्तम्। इतरथा यूपोऽपि स्यादाघारादि यश्च समानजातीयं तत् परिसंख्याया उपाकरणादेः पाशुकस्य निवृत्तिः स्यान्न स्थालीपाकसंबन्धस्याघारादेः। इच्छन्ति तस्यापि निवृत्तिं तस्मात्प्रोक्षणाद्यपूर्वविधिः। त्रैधं वपां जुहोति त्रीनवयवान् कृत्वा एकैकमवयवं सोमाय पितृमते इत्येकैकेन मन्त्रेण जुहोति स्रुवेण दर्वीहोमत्वात्। गृह्यकर्मत्वात् स्थालीपाकमपि त्वेवं कृत्वा जुहोति वपावत् कृत्स्ने द्वितीयानिर्देशात्—त्रैधसंबन्धाच्च [7]अवदानानां पञ्चविंशतिं हृदयादीनामङ्गानां तेषामेकादश हुत्वा पुनरेकादशोत्तराणि जुहोति त्र्यङ्गावदानैः संयुक्तमिति। एवं मासि मासि नियतं तन्त्रम्। एवं शब्दो यदि गवा पशुना वेत्यादिविधानं परामृशति। मासि मासीत्यनुवादोऽपरपक्ष इत्यनेन गतत्वात्। यद्वा प्रोष्ठपद्या ऊर्ध्वमेव लोकप्रसिद्धापरपक्षे तदित्याशङ्का मासिमासीत्युक्तं नियतमावश्यकम्। कथम् पुनरयं गोपशुः छागपशुर्वा कर्त्तव्य इत्याह तन्त्रं पिण्डपितृयज्ञे तन्त्रं कल्पोक्तविधानमिति यावत्। पिण्डपितृयज्ञे व्याख्यातमिति विशेषः। अन्ये तु पितृयज्ञशब्देनैवात्र पशुपितृयज्ञमाहुः तैरत्र पितृयज्ञतन्त्रमसूचितं लिखितम्। अन्ये तु पितृशब्दं न पठन्ति। अत्र प्राचीनावीत्युत्तरतः पश्चात्संस्तीर्य पात्राणीत्यारभ्य केश्वासुद्धवानाम्तृणातीति (?) त्यार्तपशुशाखा प्रकल्प्य प्रोक्षणादिवपाश्रे-

---

१–२ ० घ. । ३ प्राश्न, ग. च. । ४ भूते, ग. घ. च. । ५–६ ० घ. । ७ बन्ध, ग. । ८ शब्दोनात्रमे ( त्रैवं ) पशु, ग. च. । ९–१० ० घ. ।

यमायाङ्गिरस्वते पितृमते स्वधा नम इति द्वितीयाम् । अग्नये कव्यवाहनाय स्वधा नम इति तृतीयाम् ॥ १३ ॥ एवं मासि मासि नियतं तन्त्रं पिण्डपितृयज्ञे ॥ १४ ॥ इति द्वितीये नवमः खण्डः ॥ ९ ॥

---

पेणान्ते सव्यं श्रुचमुदकुम्भमन्वाहरन्ते पशु(मु)वो(प)कल्प्य प्रोक्षणादि वपाश्रपणान्ते सव्यमावपनमुदककुम्भमन्वाहरत्युपवहते । एत पितरो मनोजवा इत्यादि मूलदेशे निनयनान्ते वपाहोमः स उक्तः । स्थालीपाकशब्दात्सिद्धैस्तण्डुलैः । अपि त्वोद्वास्य सव्यमन्वाहृत्यानयनं स्थालीपाकं च उक्तश्चैव होमः । अङ्गानि विविधानि कृत्वा सव्यमिति यज्ञान्यपूपाङ्गं वाभ्यञ्जन ऊर्णास्तुकं चात्रैवमुक्तशेपः । यूपोपसिक्तमाहुतित्रयं जुहोति अवदानशेपस्य श्रि(श्रृ)तमांसस्य रन्धयित्वातिथ्यादिभोजनं प्रतिपत्तिः कार्याभिधायि[२] यदिवेति गुणान्तरेण पूर्वोक्तगुणस्य विकल्पः प्रतीयते यदि वा मध्यकारणाद्योनिर्धनः प्रतिभाति यतो यदि गवा पशुना वा कुर्वीतेति यदि शब्दः पशुबन्धात् कदाचित्कृतं च । एवं मासि मासि नियतमिति नित्यत्वं च एकस्मिन् पशुपितृयज्ञे विरुद्धधर्मद्वयं मास एवाशे(?)यितुं शक्यमिति तर्ह्येवं मासि मासि नियतमित्यनुसूत्रम् । अथ समाधीयते चेत्तदा भेदमाश्रितमनुगुप्तान्नश्राद्धादिदमन्यत् श्राद्धान्तरं यदि गवा पशुना वेत्यादि एवं यदिशब्दोऽत्र वाक्योपादाने योऽग्निष्टोमं जुहोति यकुन्यः परिधिमनक्तीतिवत् शाखान्तरं सिद्धं यदिशब्देनानुवदति यद्युत्सृजेत् । माता रुद्राणामित्यत्राप्येवं स्यात् यदा प्रवृत्तो विकल्पो न(?)नोपक्रम्य विरमेदिति नियतं वचनम् ॥ "एवं मासि मासि अमावास्यायाममावास्यायां नियतं कुर्यात् । मानवसूत्रे ( १-१-२ ) तन्त्रपिण्डपितृयज्ञे । इति अमावास्याश्राद्धपदार्थानुक्रमः । माघकृष्णदशम्यां पिण्डपितृयज्ञवत् । पिण्डपितृयज्ञ(ज्ञे)अन्वाहार्यम्" ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥

॥ इति पूरणव्याख्याने द्वितीये नवमः खण्डः ॥ ९ ॥



---

१-३-० घ. । २ यी, ग. । ४-९ अधिकं घ ।

# दशमः खण्डः

## फाल्गुन्यां पौर्णमास्यां पुरस्ताद्धानापूपाभ्यां भगं चार्यमणं

नित्यानेव प्रकृत्याह—फाल्गुन्यां पुरस्तादेकाहे द्व्यहे वा अग्न्याधेयवत्। येद्वा पूर्वान्ह इत्यर्थः। पूर्वशब्दस्य सप्तम्यामस्तातौ प्रत्यये पुरादेशः। कालार्थेनोपक्रम्य धानानां समूहो धानं चाऽपूपश्च धानापूपौ। एकवचनान्तोऽथ धानाशब्दः समासेऽतो धानापूपाभिर्बहुवचनं चोद्यं बहुवचनेऽपि अथ(र्थे)त एकं बहुत्वमथाशङ्क्यते अपूपान् लोकवत्स्रपयेत्। अपूपत्वाद्धविर्होमानां यवा-नवहत्य प्रभृज्य लोकवदेव आयोजनं प्रथमसीरिकसंवदनं पर्यायनं स्त्रे क्षेत्रे प्रथमं परिगमनं प्रवयनं बीजवपनं प्रथमं प्रवलनं प्रथमं धानानां लवनं प्रथमं स्रवनमिति केचित्पठन्ति। तत्र क्वचिद्देशान्तरे हेमन्तकाले पानीयेन क्षेत्रभूमिः स्राव्यते। सीतायज्ञः। तसामनडुह्यः। वहवतेतीत्यर्थ इति प्रथममनुगच्छति मातृभिः सहेतितन्तीत्युच्यते इत्यन्ये। अनडुद्(द्)यज्ञः। अनडुहा पुण्येहव-स्त्विति ब्राह्मणं भोजयेदिति स्मृतिः स इहानडुद्यज्ञ इह स्यात्। कृषिवृत्तिजीविनं रेतेषु निमित्तेषु एता देवता अवश्यं यष्टव्या नित्याधिकारात् कृषिष्विति मन्यन्ते गृह्योक्तं सुमयानां यातुं लाङ्गलं पवीरिचमिति मन्त्रवर्णाच्च स्वाध्याया-विरोधिनी कृषी चेत् दिष्टेवा भूमिं भूमिशयांश्चैव हन्ति काष्टमयोमुखमिति यथोक्तकारिणं प्रतिवचनम्। ननु यत्खट्वाकीटसहस्राण्यपि क्नन्त्राह्मणो प्रतिग्रहादौ परिवदनं दोषं न पश्यति तं प्रति सांवत्सरेषु च पर्वसु एता एव देवता यजति संवत्सरस्येमानि सांवत्सराणि पर्वाणि पक्षमास समन्वयः। बहुवचनममृतसन्वमसि मनुतेति सायं प्रातस्तथा दर्शपौर्णमासयोश्चेति स्यात्। न ध्रुवरुणमाज्यमानादेशाद्धविपः महाग्नि यथातीर्थयात्रां व्रजेदन्यार्थे प्र[व]सन्स गङ्गादिनदीमासाद्य समुद्रं वा तडाकं वा देवखातं वा नदा प्रधानस्थाने वरुणाय स्वाहेति यजेत्। अन्यस्त्वाह—यो नदीतीरे वसति तडागनद्योः समीपे स तयोः प्रथमपूरे वरुणं यजेत्। उदधिशब्देन कूप उच्यते

१ मर्य, ग. च. । २ तद्दिने वा, घ. । ३–६ ० घ. । ४ वस्त्वनी, ग. ।

च यजेत् ॥ १ ॥ इन्द्राण्यां हविष्यान् पिष्ट्वा पिष्टानि समुत्पूय यावन्ति पशुजातानि तावतो मिथुनान् प्रतिरूपान् श्रपयित्वा

तस्य प्रधानसाधने वरुणं यजेदिति अत्यल्पमिदमुच्यते उदधि कूप इति वापीपुष्करिण्योरपि प्रथमसाधने स्यात् । भवति यजतीति शेषः । ओषधिषु पक्वासु वा क्षेत्रे प्रथमसमागमे च वनस्पतिषु अश्वत्थादिषु तथा प्रधानस्थाने आज्येन सोमाय स्वाहेति यजेत् । अन्यस्तु नीवाराद्योषधिषु प्रथमभक्षणे शम्यादिवनस्पतिफलप्रथमभक्षणे सोमं यजेतेति व्याख्यातवान् । अनादिष्टदेवतादेशो नास्ति यथा त्रीणि नाम्यानि उपनयनादीनि च तेष्वग्निं यजति अग्निः सर्वा देवता इति श्रुतेः । कथं वा कस्मान्नभवति अनादिष्टदेवतेषु सिद्धायतनपर्वतादिष्विति नद्यादिप्रकारसाहचर्यात् स्यादेवं यदि नद्यादिषु देवताकाङ्क्ष्य(ङ्क्षा)न स्यात् । अस्ति च सा तस्मात्तद्विषयं स्यात् । अन्यस्ता-(स्तु) नद्यादिषु प्रथमं क्रियमाणेषु धर्मार्थमर्थवादेषु तेषामदृष्टसंस्कारार्थं वरुणाय यागः कर्त्तव्यः । यथा दृष्टार्थं भिद्यादिति ब्रूते तेषामोषध्यादिषु प्रथमप्ररोपितासु धर्माद्यर्थं वनस्पतये यागः तथा च पुराणादौ 'पञ्चाम्रवापी नरकं न पश्यति' इत्याग्नेयस्तत्रविषयः ॥ द्वितीये नवमः ॥ " धानापू०.... यजेत् । पवित्रे श्रुव । अथ धाना लौकिकवद् भृज्जेत् । अपूपान् लोकवद् भृज्जेदेव-( अपूपत्वाद्धविर्होमानां यवानवहत्य प्रभृज्य लोकवदेव ) विधिना-निर्वापः । ततो धानाभर्जनम् । ततः पात्रत्रये धानात्रिधाविभागकरणम् । अपरस्मिन् पात्रत्रयेऽपूपस्यापि त्रिभागकरणम् । श्रुच्युपस्तीर्य धानानामवद्यति । भगाय स्वाहा इति होमः । एवमर्यम्णे एवमपूपस्यापि । ततो जयहोमः ।…। ततः कर्मसमापनम् । इति भगार्यम्णोर्यागपदार्थानुक्रमः ॥ १ ॥

भगार्यम्णोर्यागादनन्तरम् इन्द्राण्यान् हविष्यान् पिष्ट्वा पिष्टानि समुत्पूय ततः पवित्रादिकानामासादनं कांस्यपात्रं च यजमानस्य गृहे यावन्ति पशु-जातानि उत्पूतेन पिष्टेन तावतो मिथुनानप्रतिरूपान् कृत्वा श्रपयति । भृत-मभिघार्य तदनन्तरं रात्राविन्द्राण्यां चरुः कर्त्तव्यः । तेन हविर्मध्ये पिष्टमयानि

१ ण्याऽह, ग. । ण्यानह, च. । २-४ ० घ. । ३ नव, च. । ५-६ अधिकं, घ. । ७-८-० ग. च, ।

काꣳस्येऽध्याज्यान्कृत्वा तेनैव रुद्राय स्वाहेति जुहोति । ईशाना- येत्येके ॥ २ ॥ सायमपूपाभ्यां प्रचरत्यग्नीन्द्राभ्याम् ॥ ३ ॥ आग्नेयस्तुन्दिलो न तस्य स्त्रियः प्राश्नन्ति सर्वामात्या इतरस्य ॥ ४ ॥ स्थालीपाकेनेन्द्राणीꣳ श्वो वा ॥ ५ ॥ संघेष्वेकवद्बर्हि- रग्निराघाराज्यभागाज्याहुतयः स्विष्टकृच्च ॥ ६ ॥ अग्निरिन्द्रः सोमः सीता सवितासरस्वत्यश्विनानुमती रेवती राका पूषा

---

मिथुनमिथुनरूपाणि कर्तव्यानि ततः कांस्यपात्रे आधाज्यन (?) कृत्वा परिप्लुताज्यं कृत्वा तेनैव कांस्यपात्रेण रुद्राय स्वाहेति जुहोति ( आज्यप्लुतं कृत्वा कांस्यपात्रेणैव रुद्राय ) मैत्रायणीयाचार्यादन्ये ईशानाय स्वाहेति हूयन्ते ततो जयहोमादिकर्मसमापनम्[3] ॥ २ ॥

तस्मिन्नेव पौर्णमासीदिने सायंकाले अग्नीन्द्राभ्यामपूपाभ्यां प्रच- रति । आग्नेयस्तुन्दिलः—मध्याधिकः । पवित्रादिकानामासादनम् । तत ? अपूपद्वयकरणं पूर्वमग्नये द्वितीयमिन्द्राय । एतयोर्यथाविधि अधिश्रयणमाग्ने- यस्यापूपस्य स्त्रियो न प्राश्नन्ति । इतरस्य ऐन्द्रस्यापूपस्य सर्वामात्याः प्राश्नन्ति ततो दक्षिणादानं कर्मसमापनम् ॥ ३ ॥ ४ ॥

तस्मिन्नेव फाल्गुनीदिने स्थालीपाकेन इन्द्राणीकर्म करोति श्वो वा । ततः पवित्रादिकानामासादनम् इति फाल्गुनीपदार्थानुक्रमः ॥ ५ ॥

यदि कथंचिदनेकप्रधानानि कर्माणि सन्ति विवाहादीनि यदा तन्त्रेण क्रियन्ते तस्मिन्कर्मण्येवान्यस्मिन्कर्मसमूहे च एकवद्बर्हिः तथैवाग्निराघा- राज्यभागाज्याहुतयः स्विष्टकृत् । एतत्सूत्रं सर्वत्र व्यापकम् ॥ ६ ॥

अथ इन्द्रादिसंयोगानां पदार्थानुक्रमाः कथ्यन्ते । तेषु इन्द्रादिसंयोगेषु पूर्वं पूर्वेद्युः श्राद्धकरणम् । विधिना मातृपूजनमाभ्युदयिकश्राद्धं च । इन्द्रा- दिसंयोगानां कर्मणां प्रारम्भनिमित्तं श्राद्धं पार्वणश्राद्धमित्यादिप्रयोगेण श्राद्धं कुर्वन्ति तत्र इन्द्रादिसंयोगदेवतानुक्रमः । अग्निः । इन्द्रः । एवं द्वादश इन्द्रा-

---

१—२ ग. । २—३—४ ग. च. । [illegible]

रुद्र इत्येतैरायोजन–पर्ययन–प्रवपन–प्रलवन–सीतायज्ञ–खलयज्ञतन्तीयज्ञानडुद्यज्ञेष्वेता देवता इति यजति साँवत्सरेषु च पर्वसु ॥ ७ ॥ नद्युदधिकूपतडागेषु वरुणँयजत्योषधिवन-

भियोगदेवताः । अथ हलाभियोगकर्मनामधेयानि । अथानुक्रमः । आयोजनं कर्षणसामग्रीकरणम् । पर्ययनं प्रथमं क्षेत्रे गमनं प्रवपनं वीजवपनं कस्मिंश्चिद्देशे हेमन्तादौ पानीयेन क्षेत्रभूमिः स्राव्यते तत्र ( स्रवन ) मपरं सीतायज्ञकरणं तत्र मोदकादिभिः सीतापूजनम् यदा खले धान्यमानयति तदा खलयज्ञः । उत्पूते धान्ये तत्र तन्तीयज्ञः । गृहागते धान्ये तत्र अनडुहय ( द्य ) ज्ञः । तत्रानडुहाभ्यांशृङ्गाभ्यां करणं मालामुकुटवन्धनं पवित्रादिकानामासादनम् । ओम् अग्नये स्वाहा । ओम् इन्द्राय स्वाहा इति द्वादश प्रधानाहुती र्जुहोति ततो जयहोमः । एवं सर्वेषु हलाभियोगेषु कुर्यात् । इति हलाभियोगानुक्रमः । स्वस्ति एतानि कर्माणि संवत्सरेषु च पर्वसु सर्वप्रायश्चित्तं तन्त्रेण कुर्यात् नद्युदधि–आयोजनं प्रथमसौरिकसंवदनम् । प्रथमं सीरिसं पर्यायनम् स्वे क्षेत्रे प्रथमं परिगमनं प्रवपनं वीजवपनं प्रथमं प्रस्रवनं प्रथमं धान्यानां लवनं प्रथमं स्रवनमिति केचित्पठन्ति । तत्र क्वचिद्देशान्तरे हेमन्तकाले पानीयेन क्षेत्रभूमिः प्लाव्यते । सीतायज्ञः कृषिवृत्तिजीवनैरेतेषु निमित्तेषु एता देवता अवश्यं यष्टव्या नित्याधिकारात् । सांवत्सरेषु च पर्वसु एता एव देवता यजति । संवत्सरस्येमानि सांवत्सराणि पर्वाणि पञ्चमासमन्वय (?) वहुवचनमृतसत्यमभिमनुतेति (?) सायं प्रातस्तथा दर्शपूर्णमासयोश्चेति स्यात् ॥ ७ ॥

नद्युदधि...यजति–वारुणं यवमयं स्थालीपाकं करोति । ओषधि...यजति । ओषधयो व्रीहियवादयः । वनस्पतय आम्रफलादयः । एतयोः समागमे विधिना सोमं यजति । अनादि...यजति । अग्निः सर्वा देवता इति श्रुतिवचनात् । नद्यु वरुणमाज्यमनादेशात् ! हविषा सहाग्निः । यदा तीर्थयात्रां व्रजेदन्यार्थे वा प्रवसेत् स गङ्गादि नदीमासाद्य समुद्रं वा तडागं वा देवखातं वा तदा प्रधानस्थाने वरुणाय स्वाहेति यजेत् । अन्यस्त्वाह यो नदीतीरे वसति तडागनद्योः समीपे स तयोः प्रथमपूरे वरुणं यजेत् । उदधिशब्देन कूप उच्यते । तस्य प्रथमसाधने वरुणं यजेदिति अत्यल्पमिदमुच्यते । उदधिः कूप इति वापीपु-

रुद्र इत्येतैरायोजन–पर्ययन–प्रवपन–प्रलवन–सीतायज्ञ–खलयज्ञतन्तीयज्ञानडुद्यज्ञेष्वेता देवता इति यजति साम्वत्सरेषु च पर्वसु ॥ ७ ॥ नद्युदधिकूपतडागेषु वरुणं यजत्योषधिवन-

भियोगदेवताः । अथ हलाभियोगकर्मनामधेयानि । अथानुक्रमः । आयोजनं कर्षणसामग्रीकरणम् । पर्ययनं प्रथमं क्षेत्रे गमनं प्रवपनं बीजवपनं कस्मिंश्चिद्देशे हेमन्तादौ पार्नीयेन क्षेत्रभूमिः स्राव्यते तत्र ( स्रवन ) मपरं सीतायज्ञकरणं तत्र मोदकादिभिः सीतापूजनम् यदा खले धान्यमानयति तदा खलयज्ञः । उत्पूते धान्ये तत्र तन्तीयज्ञः । गृहागते धान्ये तत्र अनडुह्य ( घ ) ज्ञः । तत्रानडुहाभ्यांश्रृङ्गाभ्यां करणं मालामुकुटबन्धनं पवित्रादिकानामासादनम् । ओम् अग्नये स्वाहा । ओम् इन्द्राय स्वाहा इति द्वादश प्रधानाहुती जुहोति ततो जयहोमः । एवं सर्वेषु हलाभियोगेषु कुर्यात् । इति हलाभियोगानुक्रमः । स्वस्ति एतानि कर्माणि संवत्सरेषु च पर्वसु सर्वप्रायश्चित्तं तन्त्रेण कुर्यात् नद्युदधि–आयोजनं प्रथमसीरिकसंवदनम् । प्रथमं सीरिणं पर्यायनम् स्वे क्षेत्रे प्रथमं परिगमनं प्रवपनं बीजवपनं प्रथमं प्रस्रवनं प्रथमं धान्यानां लवनं प्रथमं स्रवनमिति केचित्पठन्ति । तत्र क्वचिद्देशान्तरे हेमन्तकाले पार्नीयेन क्षेत्रभूमिः प्लाव्यते । सीतायज्ञः कृषिवृत्तिजीवनैरेतेषु निमित्तेषु एता देवता अवश्यं यष्टव्या नित्याधिकारात् । सांवत्सरेषु च पर्वसु एता एव देवता यजति । संवत्सरस्येमानि सांवत्सराणि पर्वाणि यजमानमन्वय (?) बहुवचनमृतमत्यमभिमनुतेति (?) सायं प्रातस्तथा दर्शपूर्णमासयोश्चेति स्यात् ॥ ७ ॥

नद्युदधि...यजति–वारुणं यवमयं स्थालीपाकं करोति । ओषधि.. यज-ति । ओषधयो व्रीहियवादयः । वनस्पतय आम्रफलादयः । एतयोः समागमे नि-धिना सोमं यजति । अन्नादि...यजति । अग्निः सर्वा देवता इति श्रुतिवचनात् । ननु वरुणस्यान्यत्रादेशात् । हविषा महाग्निः । यदा नौप्रियार्थं [illegible] वा तरेत् न गङ्गादि नदीनामाध [illegible] वा तडागं वा [illegible] वा तदा [illegible] [illegible] यजेत् । [illegible] यो [illegible] [illegible] न तयोः प्रथमस्ये [illegible] यजेत् । [illegible] । [illegible] प्रथमनाथने [illegible] [illegible] [illegible] [illegible]

## स्पतिषु सोममनादिष्टदेवतेष्वग्निम् ॥ ८ ॥ इति द्वितीये दशमः खण्डः ॥ १० ॥

---

ष्करिण्योरपि प्रथमसाधने स्यात् । ओषधिषु पक्वासु वा क्षेत्रे प्रथमसमागमे च वनस्पतिषु अश्वत्थादिषु तथा प्रधानस्थाने आज्येन सोमाय स्वाहेति यजेत् । अन्यस्तु नीवाराद्योपधिषु प्रथमभक्षणे शम्यादिवनस्पतिफलप्रथम भक्षणे सोमं यजतीति व्याख्यातवान् । अनादिष्टदेवतादेशो नास्ति यथा त्रीणि नाम्यानि उपनयनादीनि च तेष्वग्निं यजति अग्निः सर्वा देवता इति श्रुतेः ॥ ८ ॥

इति पूरणव्याख्याने द्वितीये दशमः खण्डः ॥ १० ॥



---

१ एतद्व्याख्यानं घ पुस्तके सूत्रानुक्रमेण ग च पुस्तकयोस्तु प्रथमसूत्रे एव व्याख्यानं न द्वितीयादिसूत्राणामिति यथोपलब्धं गृहीतम् तद्यथासंभवं वेदितव्यम् ॥

## एकादशः खण्डः

अवसानꣳ समꣳ समूलम् ॥ १ ॥ दक्षिणाप्रवणमन्नकामस्य मारुकास्तत्र प्रजा भवन्ति ॥ २ ॥ सर्वतः समवस्रावम् ॥ ३ ॥ समवस्रुत्य वा यस्मात्प्रागुदीचीरापो निर्वहेयुस्तद्वा ॥ ४ ॥ गर्त्तं खात्वा यत्तैः पाꣳसुभिः प्रतिपूर्येत तद्वा ॥ ५ ॥ यदि धारयिष्णूदकतरꣳ स्यात् ॥ ६ ॥

---

उक्तानि नित्यानि साधनानि शालाग्निसहितानि इदानीं महायज्ञा वक्तव्यास्ते च गृहे भवन्ति तेन गृहकरणं तावदाह 'अवसानं समं समूलम्' अवस्यन्ति समाप्नुवन्ति श्रौतस्मार्तानि कर्माणि यस्मिंस्तदवसानम्। सममुच्चनीचप्रदेशरहितम्। समूलं दूर्वाद्योषधिसमन्वितं पर्यवस्येदिति शेषः। ननु च शालाग्निकरणात्प्रागेतद्वक्तव्यम्। यस्य पैतृकं गृहं नास्ति तदर्थमिहोच्यते पितृगृहमो(मां)चित्यादनूदितमेव। ज्वलयन्तोऽग्निं जागरयेयुरित्यत्र उद्वाहे च संततामुलपराजिमित्यत्र वर्णितम्। दक्षिणेनोन्नत भावितमवेदं कोनामाताधामवेत्यं क्रीणीते तथा च वार्त्तागे भवन्ति। [illegible] मां किं माता या स्तनेना वद्धार्यं मारयति। एवं तर्हि दक्षिणप्रवणं वर्जयेदित्येवमर्थमयमुपदेशः ॥ १ ॥ २ ॥

सर्वतः सर्वासु दिक्षु यत्रोदकं परिषिक्तं भवति तदित्यर्थः। समवस्रुत्य यस्मात्प्राची(दि)गुदीची(च्यो)रापो निर्वहेयुस्तद्वा उदकं यत्र परिषिक्तं तत् सर्वा दिशो गत्वा ततः प्राच्योदच्या निस्सरति तत्रावसानं कुर्यात् तत्रैव गर्त्तं खात्वा यत्तैः पांशुभिर्निर्भोन्नैर्गिरिति गम्यते प्रतिमान्तात्। यदि [illegible] तस्य [illegible] धारयिष्णुरुदकतरं स्यात्। यदा उदकं परिषिक्तं [illegible] धारयति तदवसानं कार्यम्। उदकतरमतिशयेनोदकयुक्तं [illegible] उदकशब्दस्यात्र लोपः। [illegible] यत्रोदकं [illegible] [illegible] स्यात् यत्रोदकं [illegible] तत्रैव [illegible] [illegible]

इदमहꣳ विशमन्नाद्याय तेजसे ब्रह्मवर्चसाय परिगृह्णामीति वेश्म परिगृह्य गर्त्ते हिरण्यं निधायाच्युताय ध्रुवाय भौमाय स्वाहेति जुहोति ॥ ७ ॥ समीचीनामासीनि पर्यायैरुपतिष्ठते प्रतिदिशं द्वाभ्यां मध्ये ॥ ८ ॥ उदकाꣳस्येऽश्मानꣳ व्रीहीन्यवान्वास्य परिषिञ्चति स्योनापृथिवि भवेति द्वाभ्याꣳ सुत्रामाणमिति द्वाभ्याम् ॥ ९ ॥ शमीशाखया च पलाशयोदकं त्रिः समुन्मार्ष्टि स्योना पृथिवि भवेति द्वाभ्याꣳ सुत्रामाणमिति द्वाभ्यां नमो अस्तु सर्पेभ्य इति तिसृभिश्च ॥ १० ॥

इदं तत्र भवनो भद्रमयमूर्जो ऽयꣳ रसः ।
प्राप्येयं मानुषान्कामानपदर्शोऽपर्णी नङ्क्ष्यसि ॥
इति मध्यमाꣳ स्थूणामासिच्य गर्त आसिञ्चति ॥ ११ ॥

---

इदमहम् अनेन मन्त्रेण वेश्मदेशपरिग्रहः । गर्त्ते हिरण्यमाज्यं संस्कृत्य [illegible] होमः । पूर्वमिदमहमिति मन्त्रेण गृहं ग्राहयति । मध्यमायाः । स्थूणायाः । गर्त्ते [illegible] गर्ते हिरण्यं निधाय आज्यसंस्कारणम् । अच्युता- [illegible] जुहोति ॥ ७ ॥

समीचीनामासीनेति चतुर्भिः पर्यायैः प्रतिदिगुपस्थानं निगदसिद्धम् । [illegible] द्वाभ्यां [illegible] मध्ये उपस्थानं कुर्वीत ॥ ८ ॥

[illegible] परिषिञ्चति [illegible] ॥ ९ ॥

[illegible]

इहैव तिष्ठ नितरा तिल्वला स्थिरावती ।
मध्ये पोषस्य पुष्पतामा त्वा प्रापन्नघायवः[1] ॥
आ त्वा कुमारस्तरुण आ त्वा परिसृतः कुम्भः ।
आ वत्सो[2] जगता सह आ दध्नः कलशमैरयम् ॥

इति मध्यमाꣳ स्थूणामभि मन्त्रयते ॥ १२ ॥
वसूनां त्वा वसुवीर्यस्याहोरात्रयोश्चेति गर्त्ते स्थूणामवदधाति ॥१३॥

ऋतेऽवस्थूणा अधिरोह वꣳशो अग्ने विराजमुपसेधशक्रम् ॥

इति मध्यमꣳवꣳशमवदधाति ॥ १४ ॥ तूष्णीꣳशिष्टाः स्थूणा वꣳशाश्च ॥ १५ ॥ प्राग्द्वारं दक्षिणाद्वारꣳ वा मापयित्वा गृहानहꣳ सुमनसः प्रपद्ये वीरꣳ हीत्येतया प्रपद्यते[3] यथा पुरस्ताद्व्याख्यातम् ॥ १६ ॥

प्रैतु राजा वरुणो रेवतीभिरस्मिन्स्थाने तिष्ठतु पुष्यमाणः ।
इराꣳ वहन्ती घृतमुक्षमाणास्तेष्वहꣳ सुमनाः सꣳवसाम ॥

नितरां स्थूणाभिमन्त्रणे द्वे ऋचौ ऋतूनोप्या अनेन मन्त्रेण गर्त्ते स्थूणा निधीयते ऋते वस्थूणामध्यमं वंशस्य स्थूणायामवधानमन्त्रोयम् ॥११॥१२॥

तूष्णीं शिष्टाः स्थूणा वंशाश्च आद्ध्याल्लोकवत् ॥ १३ ॥ १४ ॥ १५ ॥

प्राग्द्वारं दक्षिणाद्वारं च प्रत्यग्द्वारमुत्तरमनाम्नानान्न भवतः । प्रदर्शनार्थं वा वा-शब्दः । पुरस्तादुद्वाहे यथा वर्णितं मङ्गलानि प्रादुर्भवन्ति । उत्पराज्या येप्वध्येति प्रवनं गृहानहमित्येतया गेहिण्या मूलेन वा यद्वा पुण्योक्तमन्याहिताग्निमित्यादिकम् ॥ १६ ॥

'प्रैतु राजा वरुणो '-प्रतिपादनमहान्तमुदकुम्भमुत्तरपूर्वस्यां दिशि अनेन मन्त्रेणेति अरिष्टास्त्वा उदञ्चनमुदकोद्धरणभाण्डं परिप्लवनमन्यापवन्दनेन

१ इव, ग. च. । २ त्सौ, ग. च । ३ देवे. ग । ४-५ ० ८. । ६-७ ० घ. । ८-९ ० ८

इत्युत्तरपूर्वस्यां दिशि प्रैतिपानेमुदकुम्भमवस्थापयति ॥ १७ ॥

समुद्रꣳ वः प्रहिणोमि स्वाꣳ योनिमभिगच्छत

अरिष्टा अस्माकꣳ वीरा मा परासेचि मत्पयः ।

इत्युदञ्चनम् ॥१८॥ वास्तोष्पत्यं पयसि स्थालीपाकꣳ श्रपयित्वा तस्य जुहोति । अमीवहा वास्तोष्पते वास्तोष्पत इत्येताभ्याम्–

वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो

अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति नो जुषस्व ॥

वास्तोष्पते शग्मया सꣳसदा ते सक्षीमहि रणवया गातुमत्या

पाहि क्षेम उत योगे वरं नो यूयं पात स्वस्तिभिः सदा नः ॥

इति ॥ १९ ॥ जयप्रभृति समानम् ॥ २० ॥ इति द्वितीय एकादशः खण्डः ॥ ११ ॥

---

मन्त्रेणेति । प्रैतिपानमुदपानार्थमुदकुम्भमवस्थापयति । समुद्रम् इत्युदञ्चनम् । एवं परिपूर्णं गृहं सुशोभितं कृत्वा वास्तोष्पत्यम् ॥ १७ ॥ १८ ॥

वातोष्पत्यं पयसि प्रधानस्थाने अमी वहा वास्तोष्पते वास्तोष्पते प्रतिजानीहेति द्वौ वास्तोष्पते वास्तोष्पते प्रतरणो वास्तोष्पते शग्मयेति प्रघट्टोक्ते द्वे ऋचौ स्थालीपाकस्य एताश्चतस्रो जुहोति पूर्णपात्रं दक्षिणान्तसिद्धम् । वास्तोस्पत्यं तस्य जुहोति तत्र पवित्रादिकानामासादनम् । एवं चतुर्थस्थालीपाकस्य जुहोति ततो जयहोमः । अस्य वास्तोष्पतेर्यजमानकर्मणः समृध्यर्थम् ॥ १९ ॥ २० ॥

इति पूरणव्याख्याने द्वितीये एकादशः खण्डः ॥ ११ ॥



---

१ प्रा, घ. । २ दन, ग. च. । ३ सुजाते, ग. च. । ४–५ ० घ. । ६–७ ० घ. । ८–९ ० ग. च. ।

## द्वादशः खण्डः

**वैश्वदेवस्य सिद्धस्य सायं प्रातर्बलिँ हरेत् ॥ १ ॥**

गृहप्रकरणमभिधाय तत्र स्थानविशेषेषु बलिहरणं वैश्वदेवाख्यमाह 'वैश्वदेवस्य' विश्वेषां देवानामिदं विश्वे देवा देवता अस्येति वैश्वदेवमन्नं सिद्धस्येति सामानाधिकरण्यात् सर्वार्थपचनं वैश्वदेवशब्देनोच्यते। "वैश्वदेवे तु निर्वृत्ते" (भ. ३. १०८) इत्यादि प्रयोगदर्शनात् । तदर्थं पचनं वैश्वदेवमिहोच्चरितं सिद्धशब्दस्येति विशेषणात् सिद्धस्येति स्थालीपाके श्रपणधर्मव्यवच्छेदार्थमतो व्रीहियवापचारे नैव ततः सामान्यं नियमतः प्रतिनिधेयं तस्मादिङ्गुदैर्वेदरैर्वापि महायज्ञा निर्वर्त्या इति सिद्धशब्दोपादानत उक्तम् । अहरहर्जुहुयादाकाष्ठादहनारहर्दद्यादुदपात्रादित्यादि सर्वसिद्धशब्दो नित्यपर्यायः इति गृह्यते तत्र षष्ठीनिर्देशान्वयात्सायंप्रातर्ग्रहणेन नित्यत्वप्रतिपादनाच्च तत्र महामतिष्को(ःको)ऽप्याह स श्रपयति ग्रहणे कर्त्तव्ये यत्सिद्धशब्दोपादानं तल्लौकिके सिद्धस्येति प्रमाणान्तरगम्यज्ञापनार्थं तैत्तिरीयके च दर्शनादिति तदसत् सिद्धस्येति निष्पन्नवस्तुतामात्रं पाकस्य बोधयति न पुनरमुष्मिन्नग्निविशेषे सिद्धस्येति प्रमाणान्तरगम्यो ह्यग्निविशेषः । ननू(तू)क्तं तैत्तिरीयके । दर्शितं यदि तैत्तिरीयके लौकिके पचनं तत्रैव तत् । मैत्रायणीयके किं तेनापि कठवाजसनेयादिमनुहारीताद्युक्ते कः प्रद्वेषः । तैत्तिरीयकवार्त्तायामाह तैत्तिरादश्रुतां न हि तैत्तिरीयके विद्यमानोपासनीयस्य शालाग्नौ पचनमस्ति किं तत्रैवानुप्रवेशितशालाग्निः । आहिताग्निस्तद्विषयं तद्व्याख्यानमापस्तम्बधर्मशास्त्रवचनमन्यैर्व्याख्यातृभिस्तदपि निगृहीतं स्ते(ते)हि शालाग्न्यर्थं धारयन्ति । अर्द्धेन पचन्तीति । आतश्चैव सदा न भयेन (?) श्रद्दधीमहि येनाग्नौ सिद्धस्येति कर्त्तरि षष्ठीत्यवोचन्नाकर्त्तृका क्रियास्तीत्यवदन् । अपर आह लौकिकेऽग्नौ सिद्धस्येति नास्याग्निगृहाद्धरेयुर्नान्यत आहरेयुरितिवचनात् । निर्ह[र]णाच्च न चेतस्ततोऽप्यनुतिष्ठति किं तर्हि अनकृतदिवनस्यानुगतमग्निमस्य गृहाद्धरन्ति । अन्यतश्चा-

१ हर्नोरहर्द. ग. च । २–१ ० ८. ।

हरन्ति। एतच्चाप्यन्यथोक्तवन्तस्तत्पुरस्ताद्दर्शितम्। यदि च लौकिकाग्नौ पचनं स्यादेकादशाहोत्कर्षो नोपपद्येत। अथ पिण्डपितृयज्ञ एकेन पिण्डेन एकादशेऽहनि शालाग्न्यभावान्न प्राप्नोति तस्मादुत्कृष्यतीति औद्वाहिकोऽग्निरपिनावश्यं धार्येत इति यद्यवश्यमसौ धार्यः स्यात्तत्रैव श्राद्धं स्यात्तत्कथमग्निभावादुत्कर्षो भवेदपि चैकादशेह्नि औद्वाहिकेऽग्नौ यमदैवत्यां शान्तिमुक्तवान्। यस्तस्यैकादशेहन्यग्न्यभावः कथं तदलं महामति(ते) कथय योप्यौद्वाहिकेऽष्टकावैश्वदेवादीनि न करोति सोऽपि तच्चाह सर्वथा प्रसिद्धं केन हेतुनोत्कृष्य उत्तरेहनि नीतिमिति असूत्रान्तर्हितं वा सूत्रं कुत एकादशेहनि नित्यत्वाद् गृहपतित्वे संजातेऽपि न गृहमेधित्वं क्रियते अग्न्यभावात्पितृयज्ञाधीनत्वात्पाचिके शालाग्निविधानमध्ये उत्पाद्य पाकार्थं शालाग्निकरणादिति विधिविदां निश्चयः। उत्तरकालं भार्यया सहाधिकारात् शालाग्निविधानादनौचित्यात्प्रेतपितृकस्योद्वाहिकाभावाद् द्वादशेहनि श्राद्धचोदना पाकार्थं शालाग्निकरणमिति विधिविदां निश्चयः। तथा चाहुः—

**' यथा पाणिगृहीतायां प्रजा सन्तानवर्द्धनी।**
**एवं परिगृहीतेऽग्नौ पाकः पुष्टिकरो भवेत् ॥ '**

इत्याहिताग्नेः सव्यापसव्यो नित्यो हुतशेषं वैश्वदेवमेव स्मृतिवचनात्पाकयज्ञ इति आमिक्षाख्येन हविषा लक्ष्यते। प्रजननं चापतत् हविर्यद्वैश्वदेवमिति। एवं बलिं हरेदिति होमसमुदायो बलिहरणशब्देन प्रयोगबोधनाद्वाक्ये लक्ष्यते। अग्नये सोमायेत्यादीनि चतुर्थ्यन्तानि पदानि देवागारे उदकुम्भसकाश इत्यादीनि सप्तम्यन्तत्वात्स्थानविशेषवाचकानि पदानि पुम्स्नादित्यादेरव्ययत्वात्सप्तमीलोपः। गृहगृह्याभ्यां देवताभ्य इति वाक्यम्। देवागारे कुलदे'' उदकुम्भप्रतिपादनं धन्वन्तरितर्पणे देवागार इव धन्वन्तरितर्पणमुक्तम्। उभयलिङ्गबलिशब्दमनुमीयते। उत्तरमुत्तरमिति दीर्घाकारः प्रयोगाभिगम्ये च स्त्रीलिङ्गो न च विशेषणं दिवा प्रातः। नक्तं सायमुपक्रमणात् वैश्वदेवहोमसमसंस्कारं केचिदिच्छन्ति। हुतं दद्याद्धुतमश्नीयादिति वचनात्। अन्यत्रयमिदमुच्यते नाहुतमिति सर्व एव महायज्ञा अप्रम-

१–२ ० घ. । ३–४ ० घ. ।

अग्नीषोमौ धन्वन्तरिँ विश्वान्देवान्प्रजापतिमग्निँ स्विष्टकृतमित्येवँ होमो विधीयते ॥ २ ॥ अथ बलिँ हरत्यग्नये नमः सोमाय धन्वन्तरये विश्वेभ्यो देवेभ्यः प्रजापतये अग्नये स्विष्ट-

स्कारान्न तदश्नीयाद्यस्य चाग्रन्नदीयते भुञ्जीतपितृसेवितमित्यादिवचनात्तदसदिति । अन्ये तु संस्कारत्वे प्रति पाकमावृत्तिः स्यात् सायं प्रातश्च नियमो नोपपद्यते प्रतिषेधानुपपत्तेश्च न बलिहरेदिति । न च यदर्थः पाकः सोढा साधनस्य पाकस्य गुणतोऽपि भवति प्रत्युक्ता(ता)वशिष्टस्याश्नीयादिति वचनादुपयुक्तसंस्कारत्वं स्वयं भोजनस्य गम्यते । नाहुतमश्नीयादिति तु होमादीनामवश्यकर्त्तव्यताख्यापनपरम् । "अदत्वा तु य एतेभ्यः पूर्वं भुङ्क्ते" (म. ३–११ ) इतिवत्[३] तस्मात्पुरुषसंस्कारार्थतैवेतिसिद्धम् ॥ " वैश्वदेवनिमित्तमभ्युदयश्राद्धम् । पाकं श्रपयेद्बलिनिमित्तं श्राद्धमाभ्युदयिकं वैश्वदेवं कुर्वीत । ततो यजमानत्यागः कर्त्तव्यः । यदा यजमानः प्रवासं करोति तदा पत्नीत्यागः कर्त्तव्यः । अत्रिः—

सान्गिकः पितृयज्ञान्ते बलिकर्म समाचरेत्
अनग्नि (र्) हुतशेषेण बलिं काकबलिं हरेत् ॥ "

देवयज्ञं तावदाह अग्नीषोमा इत्येवं होमो विधीयते । इति शब्दः प्रकारार्थे अतःप्राक्स्विष्टकृत एवंप्रकारदेवताः प्रगृह्यन्ते वाक्याधिकोपसंहरेस्याभ्युदयादुत्पत्त्यनर्थको ( ? ) वेत्येवं शब्दौ न च द्वितीयान्तत्वाद्यदितरेषां शब्दा अन्तरप्रयोजनं कुर्यात् । नाप्यग्नीषोमौ देवता उच्यन्ते होमो विधीयत इति स्वाहाकारयोगं दर्शयति । अतश्चतुर्थी प्रयोक्तव्या । अग्नीषोमाविति निर्देशार्थं न देवतार्थं बलिहरणसाहचर्यप्रत्यभिज्ञापनाय यथाग्नीषोमौ चतुर्थी (षी) वा अतः–अग्नीषोमा इति प्रायणीये स्रुवेण होममग्निहोमत्वात् । हस्तेन वा बलिं हरेदिति चोदनासाम्यात् ॥ अग्नये स्वाहेति षडाहुतीर्जुहुयात् ॥ २ ।

इदानीं भूतयज्ञानधिकरोति अग्नौ बलिं हरतीति पाठक्रमेणानन्तर्याभ्योक्तत्वादथशब्दोऽधिकारार्थ एव युक्तः । यद्वा बलिं हरेदिति लाघवित्वान्नचोक्तबलिहरणमथशब्दस्या ( ? ) बलिहरणमाह अथ बलिं हरतीति यथा हविष

१ नन्दाग्र. ग. च । ३–३ ० ङ । ४–५ ... । ६–७ ० घ. । ८–९ ० ङ. । १०–११ ० ग. च । १२–१३ ० ङ ।

कृत इत्यग्न्यागार उत्तरामुत्तराम् ॥ ३ ॥ अभ्य इत्युदकुम्भसकाशे ॥ ४ ॥ ओषधिभ्य इत्योषधिभ्यो वनस्पतिभ्य इति गृहमध्यमायां स्थूणायाम् ॥ ५ ॥ गृह्याभ्यो देवताभ्य इति गृहमध्ये ॥ ६ ॥ धर्मायाधर्मायेति द्वारे ॥ ७ ॥ मृत्यव आकाशायेत्याकाशे ॥ ८ ॥ अन्तर्गोष्ठायेत्यन्तर्गोष्ठे ॥ ९ ॥ वहिर्वैश्रवणायेति वहिः प्राचीम् ॥ १० ॥ विश्वेभ्यो देवेभ्य इति वेश्मनि ॥ ११ ॥ इन्द्रायेन्द्रपुरुषेभ्य इति पुरस्तात् ॥ १२ ॥ यमाय यमपुरुषेभ्य इति दक्षिणतः ॥ १३ ॥ वरुणाय वरुणपुरुषेभ्य इति पश्चात् ॥ १४ ॥ सोमाय सोमपुरुषेभ्य इत्युत्तरतः ॥ १५ ॥ ब्रह्मणे ब्रह्मपुरुषेभ्य इति मध्ये ॥ १६ ॥ प्राचीमापातिकेभ्यः सम्पातिकेभ्य ऋक्षेभ्यो यक्षेभ्यः पिपीलिकाभ्यः पिशाचेभ्योऽप्सरोभ्यो गन्धर्वेभ्यो गुह्यकेभ्यः शैलेभ्यः पन्नगेभ्यः ॥ १७ ॥ दिवाचारिभ्यो भूतेभ्य इति दिवा नक्तं चारिभ्यो भूतेभ्य इति नक्तम् ॥ १८ ॥ धन्वन्तरये धन्वन्तरितर्पणम् ॥ १९ ॥

---

एकेषां सायं प्रातः पूर्वान्हः प्रातः स्यात् । मुख्यवृत्या सायंप्रातःसंध्या प्रातर्दिवा लक्ष्यते सायं नक्तमिति बलिं देवतायै निवेद्येत्तन्नहरेन्निवेदयेत् । सायं प्रातः कालयोर्वैश्वदेवस्य पाकस्य सर्वार्थस्य सिद्धस्योपपन्नस्य बलिं महचरितात्पञ्चयज्ञान् हरेत् । कुर्यादितिवाक्यार्थ (:) । महायज्ञा (:) प्रचोदनपा । अतस्तेषां यज्ञानामेके केऽपि प्राक्प्रयुक्ते ततश्च महायज्ञेषु निवृ(वृ)त्तेषु यतिप्पतरा(यदीतरा)र्थं वा पचेत तदा नैव बलिहरणं होमश्च स्यातामिति सायं प्रातरेव बलिं हरेत् । उत्तरामुत्तरामितिदीर्घाकारौः ॥ ३ ॥

गृहगृह्याभ्यो देवताभ्य इति वाक्यं देवागारे कुलदेव उदकुम्भप्रतिपादनं धन्वन्तरितर्पणे देवागार इव धन्वन्तरि तर्पणमुक्तं ततो निर्दिष्टविभागबलिं हरेत् ।

---

१ खा, घ. । २–३ ० घ. । ४–९ ० घ. । ६–७ ० ग. च. ।

**अद्भिः सꣳसृज्य पितृभ्यः स्वधेति शेषं दक्षिणां भूमौ निनयेत् ॥ २० ॥ पाणी प्रक्षाल्याचम्यातिथिं भोजयित्वाऽवशिष्टस्याश्नीयात् ॥ २१ ॥ इति द्वितीयपुरुषे द्वादशःखण्डः । १२ ।**

अग्न्यगार उत्तरामुत्तरामिति दीर्घाकाराः। ॐ अग्नये नमः। ॐ सोमाय नमः। अथ उदकुम्भसकाशे ॐ अद्भ्यो नमः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥

पितृयज्ञमधुनाह—अद्भिः संसृज्य शेपशब्दात्प्रभूतमन्नं बलिहरणार्थमुद्धृत्य यथा स्वधाकारार्थं शिष्येत् । पितृभ्य इति विरूपैकशेपात् पितामहप्रपितामहयोरैश्रातस्तावदेहरहः स्वधां करोति ॥ "अद्भिः संसृज्य अपसव्येन पितृभ्यः स्वधा १ शेपं दक्षिणा भूमौ निनयेत् " ॥ २० ॥

'पाणी प्रक्षाल्य' कथमेतत् पाणी प्रक्षाल्यातिथीन् भोजयित्वेति नायं क्रमः कैमुह्यतिथीन् भोजयित्वा पाणी प्रक्षाल्यावशिष्टस्याश्नीयादिति क्रमः। तस्माद्ब्राह्मण आहार्ये आहृते हस्ता अवनेनिर्जीतेति श्रुतिः । वामादेव्यादीयतिद्वेप ? नित्यत्वादग्रब्राह्मणाय दत्वा भिक्षां च भिक्षवे अवशिष्टग्रहणादुद्धृत्या ? श्च भोजयित्वेति षष्ठीनिर्देशात्पत्नी अवशेपयेत् । अवशिष्टस्यैवाश्नीयादिति नियमार्थः। ततश्च सर्वोपयोगेनात्मार्थं पुनः पचेत् । स्वजनगृहादौ च न भुञ्जीत तदितरलोकयात्रापराङ्मुखस्य स्वल्पपरिच्छदस्य चि[त्त]वृत्तेर्युज्यते। महापरिग्रहस्य तु यात्रापराङ्मुखतया स्वजनगृहादावभुञ्जानस्य हि ? जनादिविद्वेपादकीर्त्या युज्यते योगक्षेमात क्रृत्तिकः (?) स्याज्ज्योतिष्टोमाश्वासहायस्य न सिध्येयुस्तस्माल्लोक उक्तमजिह्ममनुरुध्यमानाया वध्यावजाल ( वशिष्टाशन ) विप्लवप्रयुक्त्यास्वजनगृहादौ भुञ्जानेव नियमभङ्गीकृता स्यादवशिष्टाशननियोगस्योत्सर्गत्वात् । यद्वावशिष्याश्नीयादिति नेदं पश्चाद् भोजनपरं कि तर्हि देवतातिथिपितृभ्यो गृही पचेदित्येवं परमिति ततश्च प्रवानादि [पु] आत्मार्थं पचनमलहाग्निप्रवाने ॥ २१ ॥

इति द्वितीये द्वादशः खण्ड । १२ ॥

—⁂—

१ दक्षिण. ग. च. । २–३ ० घ. । ४–५ इदमधिकम् छ. । ६ दि. ट. । ७–८ ० घ । ९–१० ० घ ।

# त्रयोदशः खण्डः

अथातः षष्ठीकल्पं व्याख्यास्यामः ॥१॥ शुक्लपक्षस्य पञ्चम्यां प्रत्यङ्मुखो हविष्य[1]मन्नमश्नीत ॥२॥ अधः शयीत दर्भेषु शालिपलालेषु वा प्राक्शिराः ब्रह्मचारी ॥३॥ श्वोभूत उदित आदित्ये स्नानं पानं[2] भोजनमनुलेपनं स्रजो वासांसि न प्रत्याचक्षीत ॥४॥ यावद्दद्यात्तावदश्नीयाद्यद्यद्दद्यात्तत्तदश्नीयादन्यत्रामेध्य-पा-

'अथातः षष्ठीकल्पं व्याख्यास्यामः'। अथ शब्दोऽधिकारार्थः षष्ठीकल्पाख्यं कर्माधिकृतम्। अतः शब्दो हेत्वर्थः। अत इदं कर्म वक्ष्यमाणफलशतसहस्रस्य संयोजे[3](य)नैकपरस्य वा अतो व्याख्यास्यामः। षष्ठ्यां यत्क्रियते तदपि षष्ठीत्युच्यते। कर्माष्टकानां तस्य कल्पे विधानं व्याख्यास्यामः। वक्ष्याम इति तत्संप्रयोजनत्वात्सामान्योपदेशः। इदानीं विशेषाननुपदिशति शुक्लपक्षे निगदसिद्धम् ॥ १ ॥ २ ॥

अधस्ताद्दर्भान् हन्ति तेऽप्यधः शयित्वमस्तीति गम्यते शालिपलालेषु वा। अधः शयीतेति संबध्यते प्राक्शिरा ब्रह्मचारी मैथुनवर्जीत्यर्थः। श्वो भूते उदिते आदित्ये[6] श्वो भूते द्वितीयेऽह्नीत्यर्थः। उदित आदित्ये प्रागुदयादपि श्वो भूतः कालोऽस्तीत्युदित आदित्यग्रहणम्। स्नानं पानं भोजनमनुलेपनं स्रजो वासांसि न प्रत्याचक्षीत स्नाहि याहीत्युक्तं न प्रत्याख्यायीत-(यात्) "श्वो भूते प्रातःकाले न प्रत्याचक्षीत न निराकुर्यात्। पानमुदपानं पयःपानं वा तस्मिन्षष्ठीदिने यः कोऽपि ददाति न निराकुर्यात्" ॥ ३ ॥ ४ ॥

ननु भोजनं यदि न प्रत्याचक्षीत तदानीं बहुशो भोजनं यदि स्याद्भोज्यं च तदा कथमित्याह—यावदर्स्यं तावदश्नीयात्। तदेव दशकृत्वाद(?)-नुपदेश्यं पाठान्तरं वा यावद्द्यात्तावदश्नीयाद्यावन्मात्रं भुक्तं न दुष्यति तावदश्नीयात्। यद्यद्दद्यात्तत्तदश्नीयादन्यत्रामेध्यपातकिभ्यः। अमेध्यमयज्ञियम्।

१ हविष्यान्न, ग. च. । २ यानं गानं पानं, ग. च. । ३ योगस्यैकत्व, घ. ।
४ हन्ति तेऽपि ० घ. । ५–६ ० घ. । ७–८ ० घ. । ९–१० एतन्नास्त्यधिकं, घ. ।

तकिभ्योऽभिनिविष्टकवर्जम् ॥ ५ ॥ अस्तमित आदित्ये पयसि स्थालीपाकꣳ श्रपयित्वाऽथैतैर्नामधेयैर्जुहोति

धनदाꣳ वसुमीशानां कामदाꣳ सर्वकामिनाम्
पुण्याꣳ यशस्विनीं देवीꣳ षष्ठीꣳ शक्र जुषस्व मे ॥
नन्दी भूतिश्च लक्ष्मीश्चादित्या च यशस्विनी
सुमना वाक् च सिद्धिश्च षष्ठी मे दिशतां धनम् ॥
पुत्रान्पशून्धनं धान्यं बह्वश्वाजगवेडकम्
मनसा यत्प्रणीतं च तन्मे दिशतु हव्यभुक् ॥
कामदाꣳ रजनीꣳ विश्वरूपाꣳ षष्ठीमुपवर्त्ततु मे धनम्
सा मे कामा कामपत्नी षष्ठी मे दिशतां धनम् ॥
आकूतिः प्रकूतिर्वचनी धावनिः पद्मचारिणी मन्मना भव स्वाहा ॥

---

माषादीति केचित् तदसत् पातकिसाहचर्यात् । गृञ्जनाद्यमेध्यमशुचीति द्रष्टव्यम् । अमेध्यं प्रत्याचक्षीतेत्यर्थः । प्रतिप्रसवसूत्रत्वादेवं पातकिनोऽप्युक्तं प्रत्याचक्षीत । पातकिनो मनुगौतमादिधर्मशास्त्रेभ्य इ(ए)व मन्तव्याः । अभिनिविष्टकवर्ज्जं यद्दद्यात्तदश्नीयात् । अभिनिविष्टकं गणान्नम् । अभिनिवेशिते हि तस्मिन्नहमहमिकया बहवः स्वामिन इति । पर्युषितमित्यन्ये । अभिनिविष्टकं दास्यं वानुमतिनिविष्टं कदाचिद्विपदन्नमित्यर्थः । म च त्रया (ये) प्रतिषिद्धे ( स्मृत्या प्रतिषिद्धे ) अभिनिविष्टो यस्तस्यान्नं वर्जयेत् । एवं चामेध्यमिति जात्या दुष्टमन्नं पातकिनामाश्रयदुष्टमभिनिविष्टकम्॥ "[1]अमेध्यमयज्ञियम् मेधो यज्ञस्तस्यानह(र्ह)ममेध्यम् । तथा महापातकिना दत्तम् तथा अभिनिविष्टकदत्तम् । जातिदुष्टदत्तं वर्जयेदिति प्रत्येकं संबध्यते[2]" ॥ ५ ॥

'अस्तमित आदित्ये' संध्यायामित्यर्थः । पयसि स्थालीपाकं श्रपयित्वा तस्य जुहोति प्रधानस्थाने धनदावसुरीशानमित्यादिना षष्ठीनाम-

---

१-२ एतत्त्वनधिकं घ. टीकैव ।

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्
ईश्वरीँ सर्वभूतानां तामिहोपह्वये श्रियम् ।
नानापत्रका ( क ) सा देवी पुष्टिश्चातिसरस्वती
अरिं देवीं प्रपद्येयमुपवर्त्तयतु मे धनम् ॥
हिरण्यप्राकारादेवि माँ वर आगच्छत्वायुर्यशश्च स्वाहा ॥
अश्वपूर्णाँ रथमध्याँ हस्तिनादप्रमोदिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मादेवी जुषताम् ॥
उपयन्तु मां देवगणास्त्या(ना)गाश्च तपसा सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् श्रीः श्रद्धां (कीर्त्तिं वृद्धिं ग. च.) दधातु मे ॥

श्रियै स्वाहा, ह्रियै स्वाहा, लक्ष्म्यै स्वाहा, उपलक्ष्म्यै स्वाहा, नन्दायै स्वाहा, हरिद्रायै स्वाहा, षष्ठ्यै स्वाहा, समृद्ध्यै स्वाहा, जयायै स्वाहा, कामायै स्वाहेति ॥६॥ जयप्रभृति समानम् ॥७॥ षण्मासान्प्रयुञ्जीत त्रीन्वोभयतः पक्षान् ॥ ८ ॥

---

धेयानि तैर्नामधेयैर्वक्ष्यमाणैर्जुहोति । एकविंशतिमाहुतीः । "अथ षष्ठीदिनेऽस्तमित आदित्ये पवित्रादिकानामासादनम् । धनदां वसुरीशानामिति प्रथमाहुतिं जुहोति । कामाय स्वाहेत्यन्तमेकविंशति ( ? ) स्थालीपाकाहुतीर्जुहोति । मन्त्रैर्नामभिश्च एकविंशतिराहुतयो भवन्ति" ॥ ६ ॥

'जयत्प्र(प्र)भृति समानम् । षण्मासान्प्रयुञ्जीत' षट्सु शुक्लपक्षेषु षष्ठीत्यर्थः । त्रीन्वोभयतः पक्षान् प्रयुञ्जीत शुक्लकृष्णपक्षेषु षट्सु षष्ठीं प्रयुञ्जीतेत्यर्थः । "एवं षण्मासान्प्रयुञ्जीत । उभयोः पक्षयोस्त्रीन्मासान्वा षट् शुक्लपक्षषष्ठ्यः । त्रिभिर्मासैर्वा शुक्लाश्च कृष्णाश्च षट् षष्ठ्यः प्रयोज्याः" ॥ ७ । ८ ॥

---

१–२ अधिकं, घ. । ३–४ अधिकं, घ. ।

शतसाहस्रसꣳयोग एकवरो वा ॥ ९ ॥ गौरनड्वाꣳश्च दक्षिणा ॥ १० ॥ इति द्वितीये त्रयोदशः खण्डः ॥ १३ ॥

---

'शतसहस्रसंयोगः'। लक्षसंयोगोऽयं पष्ठीकल्पः। शतं च सहस्रं च संयोगोऽस्य वा शतसहस्र इयं पष्ठी। एकवरो वा। एकेषु श्रेष्ठं पुत्रजन्मादिकं वरस्तस्य संयोगः। गवां शतसहस्रकाम इदं प्रयुञ्जीत एकवरकामो वेत्यर्थः शतसाहस्रपश्वादिकामसंयोगः। पुत्राद्येकवरो वा गौरनड्वांश्च दक्षिणा समुद्राक्षिसैपासमासे विधानात्। अथ जयत्प्रभृतिसमानमित्येतेनान्तरं विधीयते तदा पूर्णपात्रं वाधितत्वात्प्रतियोगं स्यात्। एतत्कर्म गतश्रीकेन कर्त्तव्यम् ॥ ९ ॥ १० ॥

॥ इति पूरणव्याख्याने द्वितीयपुरुषे त्रयोदशः खण्डः ॥ १३ ॥



---

१–२ [illegible] द. । ३–४ [illegible] द । ५–८ [illegible] । ६–७ [illegible] द ।

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्
ईश्वरीꣳ सर्वभूतानां तामिहोपह्वये श्रियम् ।
नानापत्रका ( क ) सा देवी पुष्टिश्चातिसरस्वती
श्रिरं देवीं प्रपद्येयमुपवर्त्तयतु मे धनम् ॥
हिरण्यप्राकारादेवि माꣳ वर आगच्छत्वायुर्यशश्च स्वाहा ॥
अश्वपूर्णाꣳ रथमध्याꣳ हस्तिनादप्रमोदिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मादेवी जुषताम् ॥
उपयन्तु मां देवगणास्त्या(ना)गाश्च तपसा सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् श्रीः श्रद्धां (कीर्त्तिं वृद्धिं ग. च.)
दधातु मे ॥

श्रियै स्वाहा, ह्रियै स्वाहा, लक्ष्म्यै स्वाहा, उपलक्ष्म्यै स्वाहा, नन्दायै स्वाहा, हरिद्रायै स्वाहा, षष्ठ्यै स्वाहा, समृद्ध्यै स्वाहा, जयायै स्वाहा, कामायै स्वाहेति ॥६॥ जयप्रभृति समानम् ॥७॥ षण्मासान्प्रयुञ्जीत त्रीन्वोभयतः पक्षान् ॥ ८ ॥

---

धेयानि तैर्नामधेयैर्वक्ष्यमाणैर्जुहोति । एकविंशतिमाहुतीः । "अथ षष्ठीदिनेऽस्तमित आदित्ये पवित्रादिकानामासादनम् । धनदां वसुरीशानामिति प्रथमाहुतिं जुहोति । कामायै स्वाहेत्यन्तमेकविंशति ( ? ) स्थालीपाकाहुतीर्जुहोति । मन्त्रैर्नामभिश्च एकविंशतिराहुतयो भवन्ति" ॥ ६ ॥

'जयत्प(प्र)भृति समानम् । षण्मासान्प्रयुञ्जीत' षट्सु शुक्लपक्षेषु षष्ठीत्यर्थः । त्रीन्वोभयतः पक्षान् प्रयुञ्जीत शुक्लकृष्णपक्षेषु षट्सु षष्ठीं प्रयुञ्जीतेत्यर्थः । "एवं षण्मासान्प्रयुञ्जीत । उभयोः पक्षयोस्त्रीन्मासान्वा षट् शुक्लपक्षषष्ठ्यः । त्रिभिर्मासैर्वा शुक्लाश्च कृष्णाश्च षट् षष्ठ्यः प्रयोज्याः" ॥ ७ ॥ ८ ॥

---

१–२ अधिकं, घ. । ३–४ अधिकं, घ. ।

काषायवाससः पश्यति ॥ १० ॥ उष्ट्रान्सूकरान् गर्दभान्दिवाकीर्त्यादीनन्यांश्चाप्रयतान्स्वप्नान्पश्यति ॥ ११ ॥ अन्तरिक्षं क्रामति ॥ १२ ॥ अध्वानं व्रजन्मन्यते पृष्ठतो मे कश्चिदनुव्रजति ॥ १३ ॥ एतैः खलुविनायकैराविष्टा राजपुत्रा लक्षणवन्तो राज्यं न लभन्ते ॥ १४ ॥ कन्याः पतिकामा लक्षणवत्यो भर्तॄन्न लभन्ते[२] ॥ १५ ॥ स्त्रियः प्रजाकामा लक्षणवत्यः प्रजां न लभन्ते ॥ १६ ॥ स्त्रीणामाचारवतीनामपत्यानि म्रियन्ते ॥ १७ ॥ श्रोत्रियोऽध्यापक आचार्यत्वं न प्राप्नोति ॥ १८ ॥ अध्येतॄणामध्ययने महाविघ्नानि भवन्ति ॥ १९ ॥ वणिजां वणिक्पथो विनश्यति ॥ २० ॥ कृषिकराणां कृषिरल्पफला भवति ॥ २१ ॥ तेषां प्राय-

---

क्रमयति अध्वानं गच्छति पृष्ठतो(तस्त)दनुकश्चिद्व्रजतीति । पलायमानमपश्यन् क्रोधनिविष्ट आक्रमतीव मन्यते। जाग्रदपि मोदरमिदगणोर्नि पृष्ठतः ?। अन्यदपि एवं रूपं चोदयति उष्ट्रदर्शनादि ? ति च ॥ ४-१३ ॥

'एतैः खलु विनायकैराविष्टा' एते ये विनायकैराक्रान्तास्तेषां किं भवतीत्याह—लक्षणवन्तो रणप्रत्ता इत्यादि प्रथमं लक्षणं पुरुषस्य स्त्रियाश्च ज्योतिषादिशास्त्रोक्तम् । आचारवतीनां गुरुशुश्रूषा चरमशय्या गुरोरुत्थानं गृहकृत्ये दक्षता ह्रीः क्षान्तिर्मनोवाक्कायसंयम इत्याचारसंयुक्तानाम्। अध्यापक इत्यादि आचार्यत्वमध्यापननिमित्तं गरीयस्त्वम् । अध्येतॄणां विद्यार्थिनाम् । वणिक्पथो वाणिज्यसेवा (वणिग्भावो विनिडभारो ?) वा॥ "शालकटङ्कटादि विनायकाधिष्ठितानां लोष्टं मृद्गातीत्यादिरूपाणि राज्यं न लभन्त इत्यादि फलनाशा भवन्ति" ॥ १४-२१ ॥

'तेषां प्रायश्चित्तं' दुरितशोधनमित्यर्थः। संयोगकरणमिति यावत्। मृगोधिवासः कुलायकुन्त्यन्तको मृगमृत्तिकोपादेया रोचना गुग्गुलः प्रसिद्ध-

---

१-२ ० ग. च. । २ यज्ञा, ग. च. । घ. ङ. प. । ४-० ग. च. ।
५-६ ० घ. । ७-८ अधिकं, घ ।

# चतुर्दशः खण्डः

अथातो विनायकान्व्याख्यास्यामः ॥ १ ॥ शालकटङ्कटश्च कूष्माण्डराजपुत्रश्चोस्मितश्च देवयजनश्चेति ॥२॥ एतैरधिगताना-मिमानि रूपाणि भवन्ति ॥ ३ ॥ लोष्टं मृद्नाति ॥ ४ ॥ तृणानि च्छिनत्ति ॥५॥ अङ्गेषु लेखान् लिखति ॥ ६ ॥ अप[1]स्वप्नं पश्यति ॥ ७ ॥ मुण्डान् पश्यति ॥ ८ ॥ जटिलान् पश्यति ॥ ९ ॥

---

'अथातो विनायकान्व्याख्यास्यामः'। अथातः शब्दावधि-कारहेत्वर्थौ। अथ विनायकान् व्याख्यास्यामः। नत्वनधिकृतेनाधिकृतं विद्यात्। यस्माद्दौर्भाग्ययोगो विनायकाधिष्ठाने[2] भवति अतो[3] व्याख्यास्यामः। तेनाधिकृतो विनायकाः। सौभाग्यकरणत्वाद्विनायकानाम्। आनन्तर्यं वाथ-शब्दः काम्यकर्माधिकारात्। षष्ठीकल्पादनन्तरं काम्यहेतुकं व्याख्यास्यामः। संबन्धानै(ने)वाथ काम्यानन्तरम्। काम्यं पुनरत्र पराङ्मुखीभूतानां भाग्या-(ग्याना)मात्मनोऽभिमुखं(खी)करणमिति हेतौ अतस्तत्कस्य हैतुकं व्याख्या-स्यामः। भवति हि सौभाग्यतदुपायो हेतुत्वे[4]। विनायकाश्चत्वारः शालकट-ङ्कटादयः। श्रेयसो विघ्नशमनार्थं यत्तेषां पूजाकर्म तदपि विनायका इत्युक्तं वा उच्यते तान्व्याख्यास्याम इत्याह—शालकटङ्कटश्च कूष्माण्डराजपुत्रश्चोस्मित-श्चादेवयजनश्चासुगमम्। एतैः—तेषां विनायकानामधिगतानामधिष्ठितानां भूताक्रान्तानामाविष्टानां पुरुषेषु तेषां तैरिति वा। अधिगतानामुपहताना-मित्यर्थः॥ इमानि रूपाणि चिन्हानि भवन्ति जायन्ते ॥ १ ॥ २ ॥ ३ ॥

तान्याह—'लोष्टं मृद्नाति तृणं छिनत्ति' विना प्रयोजनेन मर्म-च्छेदनेन लोष्टतृणं करोति। अपस्वप्नं पश्यति मुण्डान् पश्यतीत्यादि अपः-शयानः पश्यति तथा मुण्डजटिलादींश्च पश्यति। अन्तरिक्षं रात्रौ शयानः

---

१ पः, क. घ. । २ नां, ग. च. । ३ तो(ते)स्ते, ग. च. । ४ तं, घ. । ५ का, घ. । ६–७ ० घ.

काषायवाससः पश्यति ॥ १० ॥ उष्ट्रान्सूकरान् गर्दभान्दिवा-
कीर्त्यादीनन्यांश्चाप्रयतान्स्वप्नान्पश्यति ॥ ११ ॥ अन्तरिक्षं क्रा-
मति ॥ १२ ॥ अध्वानं व्रजन्मन्यते पृष्ठतो मे कश्चिदनुव्रजति
॥ १३ ॥ एतैः खलु विनायकैराविष्टा राजपुत्रा लक्षणवन्तो राज्यं
न लभन्ते ॥ १४ ॥ कन्याः पतिकामा लक्षणवत्यो भर्तॄन्न
लभन्ते ॥ १५ ॥ स्त्रियः प्रजाकामा लक्षणवत्यः प्रजां न लभन्ते
॥ १६ ॥ स्त्रीणामाचारवतीनामपत्यानि म्रियन्ते ॥ १७ ॥ श्रोत्रि-
योऽध्यापक आचार्यत्वं न प्राप्नोति ॥ १८ ॥ अध्येतॄणामध्ययने
महाविघ्नानि भवन्ति ॥ १९ ॥ वणिजां वणिक्पथो विनश्यति
॥ २० ॥ कृषिकराणां कृषिरल्पफला भवति ॥ २१ ॥ तेषां प्राय-

---

क्रमयति अध्वानं गच्छति पृष्ठतो(तस्त)दनुकश्चिद्व्रजतीति । पलायमानम-पश्यन् क्रोधनिविष्ट आक्रमतीव मन्यते । जाग्रदपि मां दरमिदगणोर्नि पृष्ठतः ? । अन्यदपि एवं रूपं चोदयति उष्ट्रदर्शनादि ? ति च ॥ ४-१३ ॥

' एतैः खलु विनायकैराविष्टा ' एते ये विनायकैराक्रान्तास्तेषां किं भवतीत्याह—लक्षणवन्तो रणप्रचा इत्यादि प्रथमं लक्षणं पुरुषस्य स्त्रियाश्च ज्योतिषादिशास्त्रोक्तम् । आचारवतीनां गुरुशुश्रूषा चरमशय्या गुरोरुत्थानं गृहकृत्ये दक्षता ह्रीः क्षान्तिर्मनोवाक्कायसंयम इत्याचारसंयुक्तानाम् । अध्यापक इत्यादि आचार्यत्वमध्यापननिमित्तं गरीयस्त्वम् । अध्येतॄणां विद्यार्थिनाम् । वणिक्पथो वाणिज्यमेवा (वणिग्भावो विनिडभारो ?) वा ॥ "शालकटङ्कटादि विनायकाधिष्ठितानां लोष्टं मृद्गातीत्यादिरूपाणि राज्यं न लभन्त इत्यादि फलनाशा भवन्ति" ॥ १४-२१ ॥

' तेषां प्रायश्चित्तं ' दुरितबाधनमित्यर्थः । संयोगकारणमिति यावत् । मृगोधिवासः इलायदुन्यन्तको मृगनाभिकोपादेया गोचना गुग्गुलः प्रसिद्ध-

---

१-२ ० ग. च. । २ दक्ष. ग. च । ग. ङ. ट । ४-८ ग. च. । ९-६ ० घ । ७-८ ऽधिकं. ट ।

श्चित्तम् ॥ २२ ॥ मृगाखरकुलायमृत्तिकारोचना गुग्गुलाः ॥२३॥ चतुर्भ्यः प्रस्रवणेभ्यश्चतुरुदकुम्भानव्यङ्गानाहरेत् ॥ २४ ॥ सर्वगन्धसर्वरससर्वौषधीः सर्वरत्नानि चोपकल्प्य प्रतिसरदधिमधुघृतमिति ॥ २५ ॥ एतान् संभारान्सꣳसृज्य ऋषभचर्मारुह्यायैनꣳ—

सहस्राक्षꣳ शतधारमृषिभिः पावनं कृतम् ।
ताभिष्ट्वाभिषिञ्चामि पावमानीः पुनन्तु त्वा ॥

अग्निना दत्ता, इन्द्रेण दत्ता, सोमेन दत्ता, वरुणेन दत्ता, वायुना दत्ता, विष्णुना दत्ता, बृहस्पतिना दत्ता, विश्वैर्देवैर्दत्ताः, सर्वैर्देवैर्दत्ता ओषधय आपो वरुणसंमितास्ताभिष्ट्वाभिषिञ्चामि पावमानीः पुनन्तु त्वेति सर्वत्रानुपजति—

---

[3]ऋषभसेत्कास्ते सो ? गोषु तस्य चर्म चतुर्भ्यः प्रस्रवणेभ्यः परमनदीकच्छेषु प्रस्रवणानि भवन्ति । उदकुम्भान्नानाचिन्हानाहरेत् । एकैकस्मात्प्रस्रवणादेकैकमुदकुम्भं सर्वाणि गन्धवन्ति द्रव्याणि नैतु चन्दनादीनि तथा मधुरादिरसान् व्राह्यादीनोषधीस्तथारत्नानि पद्मरागादीनि उपकल्प्य समीपे कृत्वेत्यर्थः । चतुर्षूदकुम्भेषु सर्वगन्धादि तत्परिद्रव्यजातान्युप्य । संसृज्य वाप्युप्यते यदि संसृज्येति पाठः । ऋषभचर्मण्यारोह्यारोप्येत्यर्थः । अथैनमुपनयन्ति । सहस्राक्षं शतधारमित्यादिभिस्त्रिभिर्मन्त्रैरेकैकेनोदकुम्भेनाभिषिञ्चति । चतुर्थं मन्त्राभावात्तूष्णीमधः सर्वगात्रमित्यर्थः ॥ " तेषां प्रायश्चित्तं कुर्वीत— मृगाखरकुलायमृत्तिकाप्रभृतिसंभारान् संसृज्य ऋषभचर्मारुह्य विनायकाविष्टं सहस्राक्षं शतधारमिति पावमानीभिः । यत्ते केशेषु दौर्भाग्यमिति मन्त्रैश्च स्नपयन्ति । चतुर्भिः कलशैश्चान्यैः स्नानार्थं च समाहरेत् । अव्रणैरेकवर्णैश्च

---

१ मृगाखरकुलालमृत्ति, ग. च. । २ मण्या, ग. च. । ३ रिषभ, ग. च. । ४ सेत्कास्तेसो—तैतसो, घ. । ५ ननु ० ग. च. । ६ गोष, घ. । ७–८ अधिकं टीकेव प्रयोग इव वा, घ. ।

यत्ते केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्द्धनि ।
ललाटे कर्णयोरक्ष्णोरापस्तद् घ्नन्तु ते सदा ॥
भगं ते वरुणो राजा भगꣳ सूर्यो बृहस्पतिः ।
भगमिन्द्रश्च वायुश्च भगꣳ सप्तर्षयो ददुः ॥

इति ॥ २६ ॥ अधिस्नातस्य निशाया॰ सद्यः पीडितसर्षपतैल-मौदुम्बरेण स्रुवेण मूर्द्धनि चतस्र आहुतीर्जुहोति (ओꣳ) शालकटङ्कटाय स्वाहा । कूष्माण्डराजपुत्राय स्वाहा, उस्मिताय स्वाहा, देवयजनाय स्वाहेति ॥ २७ ॥ अत ऊर्ध्वं ग्रामचतुष्पथे

---

चतुः प्रस्रवणं प्रातः...सराण्युदकमाहरेत् । अशोष्यात्संगमात् । मृगाखुरकुलायमृत्तिका अश्वस्थानाद् गजस्थानाद्वल्मीकात्फलिनो वृक्षात् शुभसंगमाघ्रदाद् गोरोचनागन्धचन्दनसर्वौषधीः । सर्वरत्नानि च कुङ्कुमं कस्तुरिकां गुग्गुलं चाप्सु निक्षिपेत्...एभिः प्रकारैर्भद्रासने चतुः कलशान्स्थापयेत् । रक्तयुगां पुष्पमालां चन्दनेन विभूषयेत् । स्नानार्थं कलशे सर्वौषधिसर्वरत्न-पञ्चपल्लवतीर्थोदकगुग्गुलं कस्तुरिकामृगाधिवासमृत्तिकाकुलालय[ च ] मृत्तिका अश्वस्थानात् । वृक्षादित्यादि गोरोचन्दन गन्धचन्दन दधिमधुघृत-मेतत्समस्तं संभारान्संसृज्य कुम्भेषु निक्षिपेत्" ॥ २२ ॥ २३ ॥ २४ ॥ ॥ २५ ॥ २६ ॥

निशायां निशायां जुहोति संबन्धः । सद्यः पीडितशब्देनानन्तर्यम-कारणं क्रियासंबन्धगरीयस्त्वं शालकटङ्कटाय स्वाहेत्याद्याश्चतस्र आहुतीर्नि-शायां मूर्द्धनि तैलेन जुहोति ॥ सा परं तु प्राप्तं मया उच्यते ? ॥ २७ ॥

'अत ऊर्ध्वं' अतो ? प्रवासा(त्)पूर्वंगमचतुःपथे निगमचतुःपथे[ इ ]ति वा समो विकल्पः निगमोरण्यं ग्रामनगराभ्यामन्यत्वात् नीवेर्गच्छन्त्यस्मि-न्निति निगमः । ग्रामादिष्वन्यत्रैव चतुःपथे । सर्वतो मुखान् सर्वदिग्ग्राना-

१-२ अधिक टीकेव प्रयोग इव दा. ध. । ३ नद्यो, ग. च । ३-४ ० ८ । ९-६ ० घ. । ७-८ ० घ. ।

नगरचतुष्पथे निगमचतुष्पथे वा सर्वतोमुखान्दर्भानास्तीर्य नवे शूर्पे बलिमुपहरति फलीकृतांस्तण्डुलानफलीकृतांस्तण्डुलानामं मांसं पक्वं मांसमामान्मत्स्यान्पक्वान्मत्स्यान् आमानपूपान्पक्वानपूपान्पिष्टान्गन्धानपिष्टान्गन्धान् गन्धपानं मधुपानं मैरेयपानं सुरापानं मुक्तं माल्यं ग्रथितं माल्यं रक्तं माल्यं शुक्लं माल्यं रक्तपीतशुक्लकृष्णनीलहरितचित्रवासांसि माषकल्माषमूलफलमिति ॥२८॥ अथ देवानामावाहनं विमुखः श्येनो वको यक्षः कलहो भीरुर्विनायकः कूष्माण्डराजपुत्रो यज्ञाविक्षेपी कुलङ्गापमारो यूपकेशी सूपरक्रोडी हैमवतो जम्भको विरूपाक्षो लोहिताक्षो वैश्रवणो महासेनो महादेवो महाराज इति। एते मे

स्तानास्तीर्य शूर्पं प्रत्यग्रं यत् शूर्पं तदन्ते कृत्वा बलिं नैवेद्यमुपहरति । शूर्पेण पृणाति किमित्याह फलीकृतांस्तण्डुलानित्यादि मूलफलान्तमुपहरति वक्ष्यमाणाभ्यो देवताभ्यः । अत ऊर्ध्वं देवतानावाहयतीति वचनात्प्रथमं बल्युपहारं कृत्वा पश्चा[त्]देवताः संबन्धयेदिति गम्यते । तिलोदनं कृसर उच्यते । पिष्टगन्धं कुङ्कुमादि अपिष्टं च । गन्धपानं सुरभिगन्धपानमित्यर्थः । मधु माध्वीकं प्रसिद्धं मधुपानस्य पानं नि[पी]यतेऽनेनेति पानपात्रं सरक इरान्नं तद्विकार ( निवेयं कामिनिकम्. ग. ) ? सुरापैष्टी । एकध्या माधवी माल्या पुष्पाणि [१]मुक्तमग्रथितमित्यर्थः । [२]रक्तशुक्लत्वे श्र(ग्र)थितस्य च मुक्तस्य च विशेषणे रक्तादीनि वासांसि माषा अमाः सिद्धा असिद्धा वा विशेषानुपादानात् । कुल्माषाः प्रसिद्धाः । मूलफलानि आर्द्रकादीनि । अत ऊर्ध्वं देवतामावाहयेत् ॥ २८ ॥

तण्डुलमांसादि निवेद्यं प्रतिदेवतावाहनमुच्यते । द्विमुख, स्यन, प(व)क, चय, इत्यादि मंत्रुव्यन्ते देवतापदमुच्चार्य एहीति प्रतिपदं युञ्जीत । आवाह-

१ प', ग. च. । २ मुक्तमक्रन्थितानित्यर्थः, ग. च. । ३-४ ० घ. । ५ मूलमनुरुध्य तु विमुख श्येन बक यक्ष इत्येवं स्यात् ।

देवाः प्रीयन्तां प्रीता मां प्रीणयन्तु तृप्ता मां तर्पयन्त्विति ॥२९॥ अधिष्ठितेऽर्द्धरात्र आचार्यो गृहानुपतिष्ठते। भगवति भगं मे देहि. वर्णवति वर्णं मे देहि. रूपवति रूपं मे देहि. तेजस्विनि तेजो मे देहि. यशस्विनि यशो मे देहि. पुत्रवति पुत्रान्मे देहि. सर्ववति सर्वान्कामान्मे प्रदेहीति ॥ ३० ॥ अत ऊर्ध्वमुदित आदित्ये विमले सुमुहूर्त्ते सूर्यपूजापूर्वकमर्घ्यदानमुपस्थानं च—

नमस्ते अस्तु भगवन् शतरश्मे तमोनुद
जहि मे देव दौर्भाग्यं सौभाग्येन मां संयोजयस्व ॥

इति ॥ ३१ ॥ अथ ब्राह्मणतर्पणम् ॥ ३२ ॥ ऋषभो दक्षिणा ॥ ३३ ॥ इति द्वितीये चतुर्दशः खण्डः ॥ १४ ॥

देहीति श्रुतत्वात् । द्विसूत्र एतान्यन्ये [illegible] देवाः प्रीयन्तामित्यावाहनलोपः ॥ २९ ॥

अधिष्ठिते अर्द्धरात्रे [illegible] ( ? ) [illegible] नित्या ? तदा भगवतीत्यादयो गृहाणि [illegible] मन्त्रो भवतीत्यर्थः ॥ " अधिष्ठितेऽर्धरात्रे [illegible] आचार्यो गृहानुपतिष्ठति । [illegible] मध्यरात्रे [illegible] " ॥ ३० ॥

# पञ्चदशः खण्डः

यदि दुःस्वप्नं पश्येद्व्याहृतिभिस्तिलान् हुत्वा दिश उपतिष्ठेत् ।
बोधश्च मा प्रतिबोधश्च पुरस्ताद्गोपायताम् ।
अस्वप्नश्च मानवद्राणांश्च[1] दक्षिणतो गोपायताम् ॥
गोपायमानं च मा॑ रक्षमाणं च पश्चाद् गोपायताम् ।
जागृविश्च मारुन्धती चोत्तरतो गोपायताम् ॥
विष्णुश्च मे[2] पृथिवी च नागाश्चाधस्ताद्गोपायताम् ।
बृहस्पतयश्च मे[2] विश्वे च मे[2] देवा द्यौश्चोपरिष्टाद्गोपायताम् ॥१॥

विनायकाधिष्ठानां[3] तदधिकारमभिधायेदानीमनिष्टसूचकनिमित्ते तत्प्रमाधयितुमाह—' यदि दुःस्वप्नं पश्येत् ' दुरितसूचकमुष्ट्रखररोहणादि स्वप्नाध्यायोक्तरूपम् । यदि पश्येत् किं तर्हि तु व्याहृतिभिस्तिलान् हुत्वा का ? व्याहृतयः प्रवर्ग्यकल्पे दर्शिताः । अलौकिकीतिकर्त्तव्यता स्नात्वा अग्निं परिसमुह्य पर्युक्ष्य परिस्तीर्य जुहोति । तिलानामभिघारणं लोकतः सिद्धम् । दिश उपतिष्ठेत दिशः पूर्वाद्याः क्रमेण " बोद्धयेच्च्यादि[3] पथा यैतुरुपतिष्ठेतामामन्त्रे भवेत् ऐन्द्रयामि इत्यादिवत् । ननु गार्हप[त्य]वत् । बोधादयो नाभिधेया ननु दश इति इत्ययं ततः । ऐन्द्रहिमद इतिवर्त ? " । बोधादयो दिग्देवता दिश इत्युपचर्यते ॥ " दुःस्वप्नानि स्वप्नाध्यायोक्तानि नानाविधानि तत्र शान्तिं कुर्यात् दुःस्वप्नदर्श[न]संसूचितं सर्वारिष्टविनाशनार्थं दिव्यान्तरिक्षभौमत्रिविधोत्पातविनाशार्थं स्वगृह्योक्तेन विधिना घृताक्ततिलहोममहं करिष्ये । इमं स्तोमादि । अथ होमः । होमादनन्तरं दिश उपतिष्ठेत बोधश्च मा प्रतिबोधश्चेति षड्भिर्मन्त्रैः प्राच्यादिक्रमेणाधस्ताच्चोपरिष्टाच्च दिगुपस्थानं कुर्यात् । तूष्णीं समिदाधानम् । इति दुःस्वप्नशान्तिकरणानुक्रमः " ॥ १ ॥

१ णवं, ग. च. । २ मा, घ. । ३ विगतानामधिकार, घ' । ३–४ ० घ. ।
५–६ कनिष्ठं, घ. ।

एवꣳ यस्मिꣳश्चोत्पन्नेऽनर्थान् शङ्केत ॥२॥ व्याहृतिभिस्तिलान् हुत्वा तपः प्रतिपद्येत द्वादशरात्रꣳ षड्रात्रं त्रिरात्रमेकरात्रꣳ वा ॥३॥ यदि समुत्पातं मन्येत तद्वा ॥४॥ यदि पर्वसु मार्तिकं भिद्यते पार्थिवमसि पृथिवीं दृꣳहस्व योनिं गच्छ स्वाहेत्यप्सु प्रहरेत् ॥५॥ यद्यर्चा दह्येद्वा नश्येद्वा प्रपतेद्वा प्रभंजेद्वा प्रहसेद्वा प्रचलेद्वा,

'एवं यस्मिंश्चोत्पन्नेनानर्थान् शङ्केत व्याहृतिभिस्तिलान् हुत्वा तपः प्रतिपद्येत द्वादशरात्रं···त्रिरात्रमेकरात्रं वा' एवमिति दिगुपस्थानमतिदिश्यते यस्मिंश्च निमित्ते स्वप्ने वा रक्तवस्त्रस्त्रीपरिष्वङ्गादि जाग्रद्वा अशिरस्कच्छायादिदर्शने उत्पन्ने जातेऽनर्थान् । वचनं तपः प्रतिपद्येत । केचित्तपोऽनन्तरं दिगुपस्थानं मा भूत् । अनर्थगुरुलाघवापेक्षो दशरात्रादि कालबहल्पत्वे विकल्पः ॥ २ ॥ ३ ॥

'यदि समुत्पातं मन्येत तद्वा' यदि सम्यक् अशुष्कदारुणं वाऽतीवानर्थजनकमुत्पातं दुरितसूचकं मन्यते अवबुध्येत तदा किमित्याह तद्वेति तद्यत्पूर्वमुक्तं व्याहृतिभिस्तिलहोमाद्युपस्थानं च वा शब्दो(ब्द) एतद्वा तपसा द्वादशरात्रादिना सहेति । अथवा समुत्पाते तद्वा पुनर्मामैत्विति यदुक्तमक्षिस्पन्दनादौ ॥ "प्रत्यक्षोत्पातवृक्षवैकृत्यादिपादपा रुधिरादि स्रवन्ति" ॥४॥

'यदि पर्वसु' अमावास्यादौ मार्तिकं भिद्येत पार्थिवसमीत्यनेन मन्त्रेणाप्सु प्रहरेत् सर्वस्वं पूर्वमृन्मयभेद एतदेव असर्वस्वेन भवति तथाग्निमत एवात्राधिकारो न पष्ठीकल्पवदन?म् । अग्निवदतोपीति ॥ "कपालिकाद्यप्सु प्रहरेन्निक्षिपेदित्यर्थः" ॥ ५ ॥

तन्मतविशेषेषु नैमित्तिकं विशेषमाह–'यद्यर्चा दह्येत वे'त्यादिना अर्चाविष्णुरुद्रादीनां प्रतिमा दारुरुक्मड (क्मो) पलादिमयी गृहेर्च्ये (र्च्य) ते।

१ प्रभज्येद्वा. क. घ. । २ तु. च. । ३ जनकं ग. च. । ४ द्वम्, ग. । ५–६ अधिकं, घ. । ७–८ ० घ । ९ मदेव, घ । १०–११ ० घ. । १२–१३ अधिकं. घ । १४–० घ ।

स्थाल्या वा स्थालीमासिच्य दक्षिणोत्तरा वा स्थाली भिद्येतो-त्तरा वोपलाशे नियम्य द्वारवꣳशो वा स्फुटेत् । गौर्वा गां धयेत्, स्त्री वा स्त्रियमाहन्यात्, कर्त्तसꣳसर्गे, हलसꣳसर्गे, मुसलप्रपतने, मुसलꣳवाऽवशीर्येतान्यस्मिꣳश्चाद्भुत एताभिर्जुहुयात्—

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥
स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः ।
स्वस्ति पूषा असुरो दधातु नः स्वस्तिद्यावापृथिवी सुचेतुना ॥
स्वस्तये वायुमुपब्रवामहे सोमꣳ स्वस्ति भुवनस्य यस्पतिः ।
बृहस्पतिꣳ सर्वगणꣳस्वस्तये स्वस्तय आदित्यासो भवन्तु नः ॥
विश्वे देवा नो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये ।
देवा अवन्त्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वꣳहसः ॥
स्वस्ति नः पथ्यासु धन्वसु स्वस्त्यप्सु वृजने स्वर्वतः ।
स्वस्ति नः पथ्याकृतेषु योनिषु स्वस्ति राये मरुतो दधातु नः ॥

---

सन्ध्यागारे वलिहरणं धन्वन्तर्यादिभ्यः ( कं ) सा यदि दह्येत, स्वयमेव वा भिद्येत वातवाद्वा प्रमत्ताद्वा संघट्टनाद्वा धेनुर्वा स्यात् ? । स्थाल्या अविकृष्टायाः सकाशादुदकं तस्यामविकृष्टायां आसिञ्चेत तस्यामेव यदि पुन र्गलच्छेत । कृत्वा चोत्तरा वा यदि स्थाली भिद्येत । उत्तरा चोपलाशेव भिद्येत शिला वा वर्त्तकं भज्येत शिलायामुपरि भज्यमानं द्रव्यं गलेत शयने यस्य तस्य ... ! सन्धानावयवः द्वारं-वंशो वा स्फुटेद्भिद्येत प्रगृह्य वा कुर्यात् । गौर्वा गां धयेत् । स्त्री वा स्त्रियं हन्यात्प्रहरेत्कोणिकर्त्तसंसर्गो गर्त्तकर्त्त-कुर्वतां संसर्गो हलसंसर्गो कृष्यमाणे क्षेत्रे । मुसलहन्यमानेषु

[illegible]
[illegible]

त्रातारमिन्द्रं, मा ते अस्यां, विन इन्द्र, मृगो न भीमस्तं, शं॰ योरावृणीमह इति दशाहुतयः ॥ ६ ॥ जयप्रभृति समानम् ॥ ७ ॥ इति द्वितीये पुरुषे पञ्चदशः खण्डः ॥ १५ ॥

---

व्रीहिषु मुसलप्रपतने अवहन्तृसकाशात्प्रपतेत् । मुसलं वाऽवशीर्येत भज्येत । अथ वा घात उक्तवत्यां अन्यस्मिंश्चाद्भुते अर्थाद् भेदनादिभ्य उक्तेभ्योऽन्यद्यदनुक्तं समुद्भूतं राहुदर्शनादि तस्मिंश्चेति एताभिर्जुहुयाच्चैताभिः स्वस्ति न इत्याद्याभिर्वक्ष्यमाणाभिः प्रधानस्थाने आज्येनादेशाद्धविषा ॥ "अर्चा देवप्रतिमा। अर्चाग्रहणं सर्वत्र संबध्यते । नश्येद्वा आ ( अ ) कस्मान्नाशं याति । प्रपतेद्वा आसनात्प्रपतति । प्रभजेद्वा निमित्तं विना भज्यति । प्रहसेद्वा प्रतिमा हसति । प्रचलेद्वा स्थानात्स्थानान्तरं करोति । स्थाल्या वा स्थालीमासिच्य एकया स्थाल्या ? स्वयमन्यां स्थालीमासिञ्चति । दक्षिणोत्तरा वा स्थाली भिद्येत स्वयं परस्परमास्फाल्य भिद्येत । उत्तरा वोपलाशे नियम्य द्वारवंशो वा स्फुटेत् ' प्रसिद्धमेतत्सूत्रम् । गौं र्गा वा धयेत् परस्परं क्षीरपानं करोति । स्त्री वास्त्रियमाहन्यात् कर्त्तसंसर्गे परस्परं स्त्री मैथुनं करोति । हलसंसर्गे हलेन हलं संसर्ग करोति । मुसलेन मुसलम् । मुसलप्रपतने । आ (अ) कस्मात्प्रपतति । मुसलं वाऽवशीर्येत निमित्तं विना भज्येत । अन्यस्मिंश्चाद्भुते अद्भुतदर्शने एताभिर्जुहुयात् । यद्यर्चा दह्येद्वा इत्यादि निमित्तेषु एताभिर्वक्ष्यमाणाभिर्ऋग्भिराज्यं जुहुयात् " ॥ ६ ॥

पयः प्रभृतीनां तन्त्रोपलक्षणार्थं जयप्रदर्शनम् ॥ " "विधिना उपहार प्रोक्षणम् " ॥ ७ ॥

इति पूरणव्याख्याने द्वितीयपुरुषे पञ्चदशः खण्डः ॥ १५ ॥

# षोडशः खण्डः

सर्पेभ्यो विभ्यत् श्रावरायां तूष्णीं भौममेककपालꣳ श्रपयित्वाऽक्षतसक्तून् पिष्ट्वा स्वकृत इरिणे दर्भानास्तीर्याच्युताय ध्रुवाय भौमाय स्वाहेति जुहोति ॥ १ ॥

'सर्पेभ्यो विभ्यत्' विभ्यदित्यधिकरणमनर्थकम्। यद्यपि नित्यत्वात्सर्पभयस्य प्राणिनां तथापि चेदनित्यं विध्यर्थवादादानर्थक्यप्रसङ्गात्स्वर्गादिकामानामपिसर्वप्राणिनां नित्यमङ्गावात्सत एव क्रतवो नित्याः स्युः को नाम स्वर्गादीन्न कामयति (ते) यो न मुमुक्षुः कश्च सर्पान्न विभेता या(यो)न गारुडिकः। अपि च सर्पेभ्यो विभ्यदित्येवं प्रकारे भयमभिचर्यमनसश्च नित्यता नैमित्तिकता वा स्यात्। नच गृह्यान्तरे नित्यत्वादिह सो ? नित्यत्वं विन्य(भ्य)दिति विरोधात्। न च सर्पभयमुत्पातवदनर्थसूचकं येन तदर्थमनार्थ (मनर्थत्वं) सर्पबलिहरणस्य पश्चापश्चातक ? (पश्चात्तन्) निमित्तकमकुर्वन्न कामयति (ते) कं चेति ? किं तर्हि व्याधिवधकं दोपशमनार्थं क्रियते यद्यपि शान्तिकपौष्टिकेपि पारंपर्ये नित्यस्य कर्मणो विघ्नशमनत्वाद् उपकारकं तथापि नैव तन्नित्यम्। अर्थशास्त्र उक्तत्वात् तथाऽदृष्टकामादेरप्यनित्यत्वं स्यात्तदुपकारकत्वादेव। श्रावण्यां पौर्णमास्यामित्यर्थः। तूष्णीं परिधौ सपरिधौ परिलुप्यते तूष्णीं नवनीतोत्पवनं चेत्-वैष्णवे स्थ इति लुप्यन्ते स्वकृत इरिणेति देशनियमार्थः। दर्भानित्यादि समदर्भाणा मुपशूर्पे निधाय तस्मिन्नच्युतायेति स्वाहाकारान्तेन जुहोति सामर्थ्यात्पुरोडाशसक्तूनां बलिहरणे विनियोगात्॥ "आस्तीर्य शूर्पे सक्तून्बलिहरणार्थं मुक्त्वा सर्पेभ्यो विभ्यत्। यदा सर्पभयं भवति तेन श्रावण्यां भौममेककपालं श्रपयति पुरोडाशधर्मवर्जम्। क्षिप्रहोमधर्मेणाच्युताय जुहोति" ॥ १ ॥

१–३ ० घ.। २ श्रा, ग.। ४–५ ० घ.। ६ त्तत्त, ग, च.। ७–८ ० घ.। ९ ग, घ.। १०–११ अधिकं, घ.।

समीची नामासीति पर्यायैरुपतिष्ठते प्रतिदिशं द्वाभ्यां मध्ये ॥ २ ॥ अक्षतसक्तूना॑ँ सर्पबलि॑ँ हरति ईशानायेत्येके

सर्पोऽसि सर्पाणामधिपतिस्त्वयि सर्वे सर्पाः ।
बलिहारोऽस्तु सर्पाणां नमो [1]अस्तुषुर्मारीरिषुर्माहि॑ँसिषु-
र्मादा॑ँसि[2] सर्पाः ॥
[3]मानो अग्ने विसृजो अघाया विष्यवे रिपवे दुच्छुनायै ।
मा दत्वते दशते मादते नो मा रीषते सहसावन्परादाः ॥
सर्पोऽसि सर्पाणामधिपतिरन्नेन मनुष्या॑ँस्त्रायसेऽपूपेन सर्पान्॥
त्वयि सन्तं मयि सन्त मान्निषुर्मारीरिषुर्मा हि॑ँसिषु
मा दाङ्क्षु सर्पा[4]ः ॥

नमो अस्तु सर्पेभ्य इति तिसृभिश्च ॥३॥ ध्रुवामुं ते परिददामीति [5]सर्वामात्यान्नामग्राहमात्मानं च[6] ॥ ४ ॥

---

समीची नामासीति दिगुपस्थानम् । [:] अक्षत सक्तुबलिहरणानि शूर्पे एव ददाति । सर्पेभ्यः सर्वं बलिं हरति ॥ "स्वकृत इरिणे गत्वा अक्षतसक्तून् पिष्ट्वा सर्पोऽसि सर्पाणामधिपतिरित्यादिभिः षड्भिर्मन्त्रैः । अक्षतसक्तूनां सर्पबलिं हरति । उभयतो द्विः परिषेकः" ॥ २ ॥ ३ ॥

सर्पोसीति तिसृभिर्नमोस्तुसर्पेभ्य इति तिसृभिर्बलिं हृत्वा ध्रुवाम ते परिददामीति सर्वामात्यान् यजमानस्य ध्रुव यज्ञदत्त ते परिददामि ध्रुव विष्णुमित्र ते परिददामि । इति नाम गृहीत्वा सर्वामात्यान्परिददाति ममेत्य निश्चये कर्त्तृत्वं दर्शयति ॥ "ध्रुवं ते परिददामीति नामग्राहं यजमानस्य सर्वामात्यान्ददाति । यजमानं चामात्येभ्य एतेन धर्मेण" ॥ ४ ॥

---

१ माक्षिषु, घ । २ क्षुं० घ. । ३–४ ० ग. । ५–६ सर्पान्यजमानस्य नामग्राहं चामात्येभ्य. ग. च. । ७ य, ग. च. । ८–९ अधिकं, घ. । १०–११ अधिकं घ. ।

एतेन धर्मेण चतुरो मासान्सर्पबलिँ हुत्वा विरमति ॥ ५ ॥ तूष्णीमपि शूद्रा प्रक्षालितपाणिः ॥ ६ ॥ इति द्वितीये षोडशः खण्डः ॥ १६ ॥

---

'एतेन धर्मेण चतुरो मासान्सर्पबलिं हुत्वा विरमति'-एतेनैवेति तूष्णीं सौममेककपालमित्यादिरतिदिश्यते । परिगतं चतुरो मासानिति कालात्यन्तसंयोगे द्वितीया ॥ ५ ॥

'तूष्णीमपि शूद्रा प्रक्षालितपाणिः' सा च तूष्णीमेतत्कर्म कुर्यात् प्रारब्धस्य हि समाप्तिनयनं पुण्यमेवं च सायं प्रातर्होमादिषु नित्येषु पुरस्ताद्यदि असन्निधाने कर्तरि शूद्रापि यजेत् जुह्वत् (ती) किं पुनः सवर्णा पत्नीति ॥६॥

इति पूरणव्याख्याने षोडशः खण्डः ॥ १६ ॥



---

१ ट, ग. च. । २ तत्त, ग. च. । ३ जुहुयात्, घ. ।

# सप्तदश: खण्ड:

अयूथिके भयार्त्ते कपोते गृहान् प्रविष्टे तस्याग्नौ पदं दृश्येत[1] दधानि सक्तुषु घृते वा देवाः कपोत इति प्रत्यृचं जपेज्जुहुयाद्वा

देवाः कपोत इषितो यदिच्छन्दूतो निर्ऋत्या इदमाजगाम ।
तस्मा अर्चाम कृणवाम निष्कृतिꣳ शं नो अस्तु द्विपदे शं चतुष्पदे ॥
शिवः कपोत इषितो नो अस्त्वनागा देवाः शकुनो गृहेषु
अग्निर्हि विप्रो जुषताꣳ हविर्नः परिहेतिः पक्षिणो नो वृणक्तु ॥
हेतिः पक्षिणी न द[2]भात्यस्या[3]नोऽग्र्यां पदं कृणुते अग्निधाने ।
शं नो गोभ्यश्च पुरुषेभ्यश्चास्तु मानो हिꣳसीदिह देवाः कपोतः ॥
यदुलूको वदति मोघमेतद्यत्कपोतः पदमग्नौ कृणोति ।
यस्य दूतः प्रहित एष एतत्तस्मै यमाय नमो अस्तु मृत्यवे ॥

---

अयूथिके सर्पबलिव्यवहितमद्भुतप्रकरणं तत्रैवाद्भुतविशेषमाह । 'अयूथिक' इति ननु किमर्थमद्भुतसर्पबलिरुच्यते । ऊ[4] प्रागद्भुतात्प्रकारान्न नित्याधिकारे च स्यात् । एवं तर्ह्यद्भुतशमनकर्मवत्सर्पबलिना उत्पन्स्यमानदोषशमत्वज्ञापनार्थमद्भुतप्रकरणमाद्यसर्पबल्या तत्क्रमं नु (म्रू) मः । अयूथिके यूथाद् भ्रष्टे भयार्त्ते श्येनादिभ्यस्त्रस्ते कपोते गृहान्प्रविष्टे तस्याग्नौ पदं दृश्यते सक्तुषु वा । अग्नौ अग्न्यगारे सक्तुषु अन्तर्गोष्टे पदं दृश्यते । तत्र देवाः कपोत इति प्रत्यृचं जपेत् जुहुयाद्वापदादर्शने चैतद्भवति । गृहप्रविष्टे उलूके यदुलूको वदतीति मन्त्रवर्णात् ॥ "यदा अयूथिको यूथभ्रष्टो भयार्तो भयपीडितः कपोतः प्रधानगृहं प्रविशति महान्[5] भयकारी स्यात् । तत्राग्नौ अग्न्यागारे पदं दृश्येत दधानि दधिविषये सक्तुषु सक्तूनां मध्ये एतेषु स्थानेषु पदं दृश्यते ।

---

१ ताध्वनि. ग. च. २ दधाति. च । दध्नानि, ग । ३ न्यादृता ग. राष्ट्र, च. । ४–५ ० घ. । ६ दृश्येत. घ. । ७ दृश्येत, घ. । ८ पदार्थं. घ । ९ भवति. ग. च. । १०–११ अधिक. घ ।

ऋचा कपोतं नुदत प्रमोदमिषं मदन्तः परि गां नयध्वम् ।
सᳫंयोपयन्तो दुरितानि विश्वा हित्वा न ऊर्जं प्रपतात्पतिष्ठः ॥

इति ॥ १ ॥ पदमादाय दक्षिणा प्रत्यग् हरन्ति ॥ २ ॥ सहाधिकरणैर्यन्ति ॥ ३ ॥ स्वकृत इरिणे पदं न्यस्याध्यधि ॥ ४ ॥ धाम्नो धाम्न इति तिसृभिः परोगोष्ठं मार्जयन्ते ॥ ५ ॥ अनपेक्षमाणाः प्रत्यायन्ति ॥ ६ ॥ अग्न आयूᳫंषि पवसे अग्निर्ऋषिरग्ने पवस्वेति प्रत्येत्य जपन्ति ॥ ७ ॥ इति द्वितीये सप्तदशः खण्डः ॥ १७ ॥

---

अथ कर्मक्रमः प्राणायामकरणं देवाः कपोत इति पञ्चर्चजपः । जपानन्तरमेभिः पञ्चभिर्मन्त्रैः स्रुवेणाज्यं जुहोति " [ अयं भागोभाष्यटीकाया इव प्रतीयते ] ॥ १ ॥

'पदमादाय दक्षिणा प्रहरन्ति'–मन्थविधाने व्याख्यातम् । प्रत्येत्याग्न आयूंषि पवस इति तिस्र ऋचो जपन्ति ॥ [1]ततो दध्यादिस्थानस्थितं पदमादाय दक्षिणा प्रत्यग् हरन्ति । नैर्ऋत्यायां [2] दिशि गच्छन्ति सहाधिकरणैर्यन्ति । अधिकरणानि स्थाल्यादीनि । स्वकृत इरिणे स्वभावजपरे [3] अध्यधि । उपरिपदं न्यस्यति । धाम्नो . मार्जयन्ते–परस्य द्वेपस्य यं गोष्ठं तं परोगोष्ठम् । अनपे–पृष्ठतोऽनपेक्षमाणाः । अग्न.. जपन्ति । गृहं प्राप्य जपन्तीत्यर्थः । जपन्ति वचनादध्वर्युब्रह्मयजमानाः " ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

॥ इति पुरणव्याख्याने द्वितीयपुरुषे सप्तदशः खण्डः ॥ १७ ॥



---

१–२ अधिक न. घ । ३–४ अधिक घ. ।

## अष्टादशः खण्डः

षडाहुतं प्रतिपदि पुत्रकामः ॥ १ ॥ पयसि स्थालीपाकꣳ श्रपयित्वा तस्य जुहोति—

ब्रह्मणाग्निः सꣳविदानो रक्षोहा बाधतामितः ।
अमी वा यस्ते गर्भं दुर्णामा योनिमाशये ॥
यस्ते गर्भममी वा दुर्णामा योनिमाशये ।
अग्निष्टं ब्रह्मणा सह निष्क्रम्यादमनीनशत् ॥
यस्ते हन्ति पतयन्तं निषत्स्नुꣳ यः सरीसृपम् ।
जातꣳ यस्ते जिघाꣳसति तमितो नाशयामसि ॥
यस्त्वा स्वप्नेन तमसा मोहयित्वा निपद्यते ।
प्रजाꣳ यस्ते जिघाꣳसति तमितो नाशयामसि ॥
यस्त्वा भ्राता पतिर्भूत्वा जारो भूत्वा निपद्यते ।
प्रजाꣳ यस्ते जिघाꣳसति तमितो नाशयामसि ॥
ये ते घ्नन्त्यप्सरसो गन्धर्वा गोष्ठाश्च ये ।
क्रव्यादꣳ सुरं देविनं तमितो नाशयामसि ॥
यस्त ऊरू विहरत्यन्तरा दम्पती शये ।
योनिꣳ यो अन्तरारेढि तमितो नाशयामसि ॥

षडाहुतं काम्याधिकारेऽद्भुतं शांतीन् भुक्त्वेदानीं तमेव काम्याधिकारमाह—तत्राहुतीनां कर्म प्रतिपदि पुत्रकामः । पयसि स्थालीपाकं श्रपयित्वा तस्य जुहोति प्रधानस्थाने । ब्रह्मणाग्निः संविदान इति प्रतिद्वादश ऋचः । तासामाद्याभिः षड्भिः—स्थालीपाकस्य जुहोति उत्तराभिराज्यस्य । अथ

१ पा. घ. ।

यथेयं पृथिवी मह्यमुत्ताना गर्भमादधे ।
एवं तं गर्भमाधेहि दशमे मासि सूतवे ॥
विष्णोः श्रेष्ठेन रूपेणास्यां नार्यां गवीन्याम् ।
पुमाꣳसं पुत्रमाधेहि दशमे मासि सूतवे[१] ॥
पाकयज्ञान्समासाद्य एकाज्यामेकबर्हिर्षि ।
एकꣳ स्विष्टकृतं कुर्यान्नाना सत्यपि दैवते नाना सत्यपि दैवते ॥

॥ ४ ॥ इति द्वितीयपुरुषेऽष्टादशः खण्डः ॥ १८ ॥

इति मैत्रायणीयमानवगृह्यसूत्रे द्वितीयपुरुषाख्यो भागः ।
सूत्रं च समाप्तम् ॥

---

पानीये श्रपयन्ति । प्रधानस्थाने नैजमेषः परापतेति प्रभृतिभिस्तिस्र आहुतयः जयप्रभृति पुनरुक्ते सद्येष्वेतेष्वपि समान उक्ता आग्नीषोमीयादिषु स्थालीपाकेषु ॥ "एवं संवत्सरं कर्म कुर्यात् । एवं कुर्वतः । यदि पुत्रो न जायते तत्र नैजमेषं यथा पाडाहुतमिति वचनात् । संवत्सरं प्रतिपदि प्रतिपदि पयसि अस्य नैजमेषकर्मणः समृद्ध्यर्थम्" ॥ ४ ॥

"अथ प(पा)रिभाषिकं सूत्रम् । पाकयज्ञान्समासाद्य यस्मिन्कर्मणि बहवः प्रधानाः सन्ति तत्र एकाज्या एकबर्हिषः । एकं स्विष्टकृतं कुर्यात् । नाना सत्यपि दैवते । बहुदैवते बहुप्रधाने कर्मणि एतानि पूर्वोक्तानि एकतन्त्रं कुर्यात्" ॥

# वर्णानुक्रमेण मानवगृह्यसूत्रगता—

## धातवः

अक्ष् पु. २ खं. ८—६. ।

अञ्ज् पु. १ खं. २—२२. । खं. २२—२

अद् पु. १ खं. ९—२३. ।

अर्च् पु. २ खं. १७—१. ।

अर्ह् पु. १ खं. १—१६. । खं. २—९. । खं. ९—२—९. । खं. १०—२ । खं १६. ५. । पु २ खं. २—५. ।

अव् पु. १ खं. ४—४ (४). ८ (४). । खं. १०—८. । खं. २०—३. । पु. २ खं. ११—१४. । खं. १५—६. ।

अश् पु. १ खं. ३—४. । ख. ९—७. । ख. २२—११. । पु. २ खं. १६—३ (२) खं. ३—९. । खं. १२—२१ । ख १३—२. ५. (२)

अस् पु. १ ख. १—१०—१६ (२) २४ । खं ९ ३—११. १२. १६. । ख. ४-२ (८). ४ ८. । खं. ५—४ (३) । खं ९—५. ९ १५. १७. २४. २७. । ख. १०—६ १३. १५ (४) । ख. ११—८. १२ २१. २४ (२). । ख १२—५. । खं. १४—१६. । ख १७—३. ५. । खं. १८—६. । ख. १९—४. । खं. २१—६. । खं २२—४. ५. (२) ६ (२). ११. १७. (४). २०. । पु. २ खं १—९. । ख २—११ १९ २३. २७. (२) । खं. २—६. । ख. ३—५. । खं ७—३. । खं. ८—४ (३) ६. (३) । ख. ९—४. । खं. ११—६. ८. १०. १९ (२). । ख. १२—६. । खं १४—३१. । खं. १५—५. । खं. १६—२. ३ (५) । खं. १७—१ (४).

आप् पु. १ ख. २३—११. । पु. २ ख. ११—११. १२. । ख. १४—१८. ।

आस् पु. १ ख. ९—११. । खं १०—१५. । ख. १५—१. । खं. २२—५. १३. । पु. २ खं. २—१३. ।

इ. पु. १ खं. १३—८ । खं. २१—८. । पु. २ खं. १—९. । ख. १७—३. ।

इन्ध् पु. १ खं. ३—६. ।

इष्. पु. १ खं. २—६. । ख ४—३ । ख ९—२० । खं. १०—७—११. खं. ११—१८. । खं. १७—६ । खं. २०-४. । पु २ खं. ६—१. । खं. १६—१ (२) ?

ईक्ष् पु १ खं. १—८. । खं. ९—७. । खं. १०—१२. १३. । खं. १४—१०. । पु. २ ख. २—९ (२) १०. ११. । ख. ४—४. ।

ईड् पु. २ खं. ७—५ । खं. ११—१२.

उच् पु १ खं १—१३ । खं. १०—१. २. । ख ११—२. । ख. १—४. ६. । पु. २ खं. १—१८ । ख २—१. ५ ।

ख. ४–३. । ख. ११–१७. ।
उन्द पु. १ खं. २१–३. (२
ऊह् पु. १ ख. १–१६ । ख. ४–६. ।
ख १० २. ॥ पु. २ ख. २–५ ।
कृ पु. १ खं. २–८–१२. ख. ४–१.
५. १७. । ख. ६–२ । ख ७–९.
ख. ९–२०–२०. । ख. १०-५ ७.
१५. १६. । ख १२–२. । ख.
१३–६. । ख. १४–१२. १७ । ख.
१५–१. । ख १६–१ (२) २. ।
ख. २१–३. १२ १३ ॥ पु. २ खं.
१–१. । ख. २–९. । ख. ३–१. ।
ख. ४–३. । खं. ६–४. ६. ७. । ख.
७–४. । खं. ८–४. (२). ६ (३). ।
ख. ९–१. ३ ११. । ख. १०–२. ।
ख. १४–२६. । ख. १५–१ (३).
कृत् पु. १ ख. ८–११. । ख. १०–८. ।
ख. २०–२. । ख. २२–२. ३. ॥
पु. २ खं. ४–५. ८. १०. ।
कृप् पु. १ खं. ३–१०. । खं. ९–३. ७. ।
खं. १०–१९. । ख. ११–७. ख.
२२–२१. ॥ पु. २ खं. ६–४. । ख.
१४–२५ ।
कृप् पु. १ ख. ९–१० । ख. १०–३.
७. । खं. ११-८. ॥ पु. २ खं. २-६. ।
क्रम पु. १ खं. १–१५. । ख. २–२. ।
ख. १०–७ (२). । ख. ११–१८. ।
खं. १३–९. १८. (२). ॥ पु. २
खं. ४–३. । ख. ६–४ (२). । ख.
१४–१२. ।
क्रुध् पु. १ ख. ३–४. ।
( क्षल् पु. १ ख. ९-१३. । खं. १७-७.
॥ पु. २ ख. २–८. । ख १२–२१.)
खन पु. २ ख. ५–५. ।
ख्या पु. १ ख. ५–१. ॥ पु. २ ख.
६–१. । ख. १३–१. । ख. १४–१. ।
गद् पु. १ ख. २–४. ।
गम् पु. १ ख. ३–४. । खं. ४–२ (४)
ख. २२–११. । खं. १०–१०. । ख.
२२–२. ॥ पु. २ खं. १–८. । ख.
४–३. । खं. ७–१. ५. । ख. ९–२ ।
ख. ११–१८. ख. १३–६. । ख.
१७–१. ।
गाह् पु. १ ख. ४–१६. । ख. ५–२. ।
गुप् पु. १ ख. २२–५. ॥ पु. २ ख.
९–१०. । ख. १५–१ (७.). ।.
गै. पु. १ खं. १०–१५ (२).
ग्रह् पु. १ ख. ४–२ (२). । ख. ७–१०
(२). । खं. ८–६. ९. । ख. ९–४.
(२). ८. १३. । खं. १०–६ (२)
१५ (५). । ख. २०–४. । खं. २२-५.
(४.) १४. ॥ पु. २ ख. ११-७. (२). ०।
घृ पु. २ ख. २–१७. २१. ।
चक्ष् पु. २ ख. १३–४. ।
चम् पु. १ ख. ९–१७. । खं. १२–१५. ।
चर् पु. १ खं. १–१३. । १७. । ख. २-६.'
खं. ३–४–५. । खं. ११–२५. । ख.
१३–४. १४. । ख. १४–१४. । ख.
२१–६. । खं. २२–२. (२). । ११.
२०. ख. २३–१८. ।

पु. २ खं. २–२६.। ख, ४–१० ।
ख. १०–३. ।
चि पु. १ ख. २१–६. ।
चित् पु. १ ख. ९–२३.। ख. १४-१६.।
छिद् पु. २ खं. १४–९. ।
जन् पु. १ खं. ४–२ (२).।ख. १४-१६ (२).। ख १७–१.। खं. १८–६. ॥
पु. २ ख. १८–२. (३).
जप् पु. १ ख. १–२२. । ख. २–३. ।
ख. ३–१.। ३–१४.।खं. ४–४.। ८.।
ख. ५–२.।ख ८–१०.।ख. ९–८.।
ख. १०–१३. १४. १९.।
ख. १२-६.।ख. १३–९. १६. १७.।
ख. १४–१०. १६. । ख. १७–६. ।
ख. २२-२ ६-१०.॥पु. २ ख. १७-१.७.।
जल्प् पु. १ ख. १–९. ।
जागृ पु. १ ख. १–२. ।
जीव् पु. १ ख. ९–२७.।ख. ११–१२.।
ख. १७-५. । ख. १८–६.। ख. २२–११.॥ पु. २ ख ७–८ । ख ८–४.
जुप् पु. १ ख. २–२. । ख. ७–११. ।
ख. १०–१३.।ख. १३–१५ ।ख १४ १६.। खं. २२-१० ॥पु. २ ख. ११–१९ (२) । [illegible]
ख. १७-१. ।
[illegible]

पु. २ खं. १४–२९. ।
तॄ पु. १ खं. १३–१६. ।
त्रै पु. १ ख. २१-४.॥पु २ खं. १६-३ ।
दश् पु. २ ख. १६–३ (२). ।
दम् पु. २ खं. १७–१. ।
दह् पु. २ ख. १५ –६. ।
दा पु. १ खं. १–३. । ख. ७–१२. ।
खं. ८–६ (२). ८. ९. । ख १०–१० (२). १९. ।खं. ११–१२ (२). २३. ।
खं. १२-१. ।खं १३-१. ।
ख. १६-३. । खं. १७–१. ६ (४). ।
ख. १८–२. । ख. २०–७. ।
खं. २१–१२. । ख. २२–३ (१०) ७. १६. ॥ पु. २ ख. ९ २. ९. ।
ख. १३–९ (२) । [illegible] २० (७) ।
दास पु. १ ख. ९–८. ।
दिश् पु. १ ख. ९–१२ । [illegible] ॥
पु. २ खं. १३–६ (१) ।
दृश् पु. १ ख. १–२०. । [illegible]
[illegible]

। ख. १४–३१ (२). । ख. १७-५ (३). । खं. २२-१२.१७. । खं. १८-६. ॥ पु. २ खं. १–१३. । ख. ४–५. । ख. ७–१. २. ३. ४. । खं. ८–६ (२). । ख. ११–२. ९. १०. । खं. १३–६. ।

भ्रस्ज् पु. १ खं. ११–२. ।

मन् पु. १ खं. ५-५. । खं. १०-१०. । ख. २३–१८. ॥ पुं. २ खं. ६–५. । ख १४–१३. । ख. १५–४. ।

मन्त्रि पु. १ खं. २–९. । ख. १२–१. । ख. १३–२. ४. ८. । २१–२. ८. १०. । खं. २३–१८. ॥ पु. २ खं. ७–८. । खं. ११–१२. ।

मा पु. २ खं. १५–१६. ।

मुच् पु. १ खं. २–४ (२). । खं. ४–९. । ख. ९–२७. । खं १०–१०. । खं. ११–१२. २३. । ख. २३–२८. ॥ पु. २ ख. २–२४. ।

मुष् पु. १ ख. २१–७. ।

मृ पु. २–१४–१७. ।

मृज् पु. १ खं. १–१८. २४. । खं. ११–२६. । ख. १३–३. ॥ पु. २ ख. २–२७. । खं. ७–३. । ख. १०–११. । ख. १७–१. ।

मृद् पु. २ खं. १४–४. ।

मृश् पु. १ ख. १–१९. । खं. ९–२२. । खं. १४–१७. । खं. १८–४ (३)

म्लुच् पु. २ खं. १–१०. ।

यज् पु. १ ख. २–२०. । ख. ९–२८. ३०. । खं. १०-९. । ख. ११-१२. । ख. १८–८. ॥ पु. २ खं. २–१९. । ख. ३–५. । खं. ६–४. । खं. १०–१. ७. ८. ।

यत पु. २ खं. २–१२. । खं. ३–४. । ख. ४–७. ।

यम् पु. १ ख. ७-८-१०.११. । खं. ८-३. । ख. ९–१८. । खं. १०–८. । खं. ११–३ ४. १०. । खं. २१–७. । ख. २२–३. ॥ पु. २ खं. ८–६. ।

या पु. १ ख. २–२. ३. । खं. १३–७. १८. ।

यु पु. १ खं. ९–१४. । खं. २२–२. ॥ पु. २ खं. १–५. ।

युज् पु. १ खं. २–३. (३) । खं. ३–६. । ख. ४–५. । ख. १०–१३. । खं. १३–१. २ (२). । खं. १९–४. ॥ पु. २ खं. ३–८. । ख. १३–८. । खं. १४–३१. ।

रध् पु. २ खं. ९–७. ।

रभ् पु. २ खं. १–१४. । ख. ४–३. ।

रम् पु. २ खं. १६–५. ।

रिच् पु. २ ख. ७–५. ।

रिष् पु. १ खं. २–१३. । ख. ९–२७. । खं. १३–१७. । ख. २२–७. १०. । ॥ पु. २ खं. १६–३. ।

रुह् पु. १ खं. १–६. । खं. ३–४. ६. । खं. १०–१७ (३) । खं. १३–६–(१०).

खं. १४–२. ।
लभ् पु. २ खं. ११–११. । खं. १४–१४. । खं. १९–१६. ।
लिख् पु. २ खं. १४–६. ।
लुप् पु. २ खं. १–१३ (२).
वप् पु. १ ख. ८–७. । खं. ११–१२. । खं. २१–३. ६. (९). ७. १०. १४. । ॥ पु. २. खं. १–१९. ।
वर्ज् पु. १ खं. १–११. ।
वस्त्रि पु. १. खं. १–९. ।
वह् पु. १ खं. २१–२. । खं. ७–७. । खं. १०–९. १९. खं. ११–१२. ॥ पु. २ खं. १–८. । ख. २–१९ । खं. ९–४. । खं. ११–४. ।
वस् पु. १ खं. १४-६. ॥ पु. २ खं. २-४. । खं. ३–७. । खं. ११–१७. ।
विद् पु. १ खं. ८–९. ॥ पु २ खं. ९–४. ।
विद्ल्ट. पु. १ खं. २–६. । खं. ७–३. ।
विध् पु. २ खं. ८–४. ।
विश् पु. १ खं. १–४. । खं. ८–२. । खं. ११–१९. । खं. १३–१९. । खं. १४–७–८. । खं. २२–११. ॥ पु. २ खं. ७–४. ।
वृ. पु. १ खं. ९–६. । खं. ७–४. ॥ पु. २–खं १३–६. । खं. १९–६. ।
वृत् पु १ खं. ६–१. । खं. १३–७. । खं. २१–७. । खं. २२–९. ॥ पु. २ खं. १३–६. (२).
वृध् पु. २ खं. १–१४.
व्यध् पु. १ खं. ११–९ (२). ।
व्ये पु. १ खं. ९–२७. । खं. १०–८. खं. २२–३. ८. ।
व्रज् पु. १ खं. २–१८. । खं. ११–९. ॥ पु. २ खं. ६–८. । खं. १४–१३. ।
शङ्क् पु. २ खं. १९–२. ।
शम् पु. २ खं. १–६. । खं. ७–४ (२). । खं. ८–६. ।
शॄ पु. २ खं. १९–६. ।
शीङ् पु. १ खं. २३–९. १७. ॥ पु. २ खं. १३–३. । खं. १८–२ (२). ।
शुध् पु. १ खं. २१–७. ।
शो. पु. २ खं. १६–६. ।
श्रा पु. २ खं. २–३. । खं. ९–९. ।
श्रि. पु. १ खं. ९–१६. ।
श्रु. पु. १ खं. १–१९. । खं. २२–११. ।
श्लिष्. पु. १ खं. २१–११. ।
श्वस् पु. १ खं. ४–९. ।
सच् पु. २ खं. ११–१९. ।
सज् पु. १ खं. ४–२. । खं. ८–९. । खं. ११–१८. ॥ पु. २ खं. ८–९. । ख. १४–२६. ।
सद् पु. १ खं. १३–१९. ।
सृज् पु. १ खं. २–४. । खं. ४–७. ९. । खं. ७–७. । खं. १४–१९. ॥ पु. २ ख. ८–४ । खं. १६–३. ।
सिच् पु. १ खं. ८–११ ॥ पु. २ ख. १–६. । खं. ७–२. । खं. ११-९-११ (२). १८. । खं. १४–२६ (२). । खं. १९–२. ।
सिध् पु. १ खं. १८–२. ॥ पु. २. । ख.

११–१४.।
स्रु पु. १ खं ११–६.।
सृज् पु. १ ख. २–४.। ख ४–७. ९.। खं. ७–७.। खं. ९–२३ (२).। खं. १४–१९.॥ पु. २ ख ८–४.। ख. १६–३.
सो. पु. १ ख. ११–२०.।
स्कन्द् पु. १ खं. ३–४.।
स्तॄ पु. १ खं. ९–१९.। ख १०–२. ३. ४.॥ पु. २ खं. २–५. ६ ७.। ख. १४–२८.।
स्था. पु. १ खं. १–१७.। खं. ४–५.। ख. ९–८ । खं. १०–१६ (२). १७.। ख. ११–२९.। खं. २२–११ १२ (२).॥ पु. २ ख. २–२६.। खं. ११-१२-१७. (२).। खं. १४-३०.। खं. १५–१.। खं. १६–२.।
स्ना. पु १ खं. १–१३. १४.॥ पु. २. ख. ६–५.। ख. १४–२६.।
स्पन्द् पु १ खं. ३–४,।
स्पृश् पु. १ ख ३–४.। ख. ९–१२.।
स्फुट् पु २ खं १५–६.।
स्रस् पु. १ खं. २२–६.।
स्रु. पु. २ ख. ९–४.। ख. ११-४.।
हन् पु. १ खं ४–६.। ख ७–१.। खं. ९–२०.। ख. १९–४.॥
पु. २ ख. ७–१.। खं. ८–६। खं. १४–२६-३१.। ख. १५-६.। खं. १८-२.।
ह्रस् पु. २ खं. १५–६.
हृ. पु. १ ख. १–१९.। खं. ३–६.। ख. ७–९.। ख. ९–७.॥ पु. २ खं. २–२९.। खं. ५–३. ४.। खं. १४–२४. २८.। ख. १८–२.।
हाङ् पु. २. ख. ७–५.।
हि पु. २ ख १–७. ८.। खं. ११-१८.।
हिस्. पु. १ खं. २१–५.॥ पु. २ खं. १६–३ (२).। खं. १७–१.
हु. पु. १ ख. ३–४.। खं. ४–२.। खं. ६–२.। खं. १०–८. १०. ११.। खं. ११–१२. २३.। खं. १३–१५.। खं. १४–११.। खं. १७–२. ३.। खं. १९–२. ३.। ख. २३–२. ६ १३.॥ पु. २ ख. २–१३ (२). १४. १८ २२. २३. २४.। खं ३–१. ११.। खं. ४–५.। ख. ६–५.। खं. ७–१.। खं. ८–४.। ख. ९–४. १२. १३.। ख. १०–२.। ख. ११–७. १९ । ख. १३–६.। खं. १४-२७.। खं. १५-६.। ख. १६-१.। ख. १७-१.। ख १८-२.।
रे पु. १ खं. १४–५.॥ पु. २ खं. १-६.। ख. १३-६ (२)। ख. ८-२.।

—— ❦ ——

श्रीरस्त्वत्र.

# वर्णानुक्रमेण मानवगृह्यसूत्रगताः ।

## शब्दाः

आद्यन्तर् पु. १ ख. १८–१. ।

आधाय पु. २ खं. २–२३. ।

आनडुह पु. १ खं. ११–१९. । खं. १४–७. १२. ।

आनीय पु. १ ख. ९-६. । खं. १०-१६. । खं. २२-३-१२. ॥ पु. २ खं. २-३. ।

आपातिक पु. २ ख. १२–१७. ।

आपोहिष्ठीया पु. १ खं. १–२४. । खं. ६–४. । ख. ११–२६. ॥ पु. २ खं. २–२७. ।

आप्यायमान पु. २ ख. १–१३. ।

आभजन्ती पु. १ खं. २२–१०. ।

आम पु. २ खं. १४–२८ (२). ॥

आमन्त्र्य पु. १ ख. २–१८. ॥ पु. २ ख. २–१३. ।

आम्नात पु. १ खं. २–३. ।

आयुध पु. १ ख. २०–३. ।

आयुष् पु. १ खं. १–२१. । ख. ३–१. २. । खं. ४–४. ८. । ख. ५–४. । खं. १०–१६. । खं. ११–१२. । ख. १३-१९. । ख. १७-३. । ख. २१-२. ६ (३). ७. । ख. २२–१२. ॥ पु. २ ख. १–१३. । ख. ८–९. । खं. ८–६ ( ३ ). । ख. १३–६. । ख. १८–७. ।

आयुष्मत् पु. १ ख [illegible] । ख [illegible] १९. । खं. १२–१. । ख [illegible] ॥ पु. [illegible] ।

आयुष्यहोम पु. १ ख [illegible] ।

आयोजन पु. २ खं. १०–७. ।

आरभ्य पु. १ खं. १–२२. । ख[illegible] २२–६. ।

आरम्भण पु. १ खं. ४–१८. ।

आरोह्य पु. २ खं. १४–२६. ।

आर्द्रपाणि पु. १ ख. ४–१२. ।

आर्षेय पु. १ ख. ९–१२. ।

आवपन्तिका पु. १ खं. ११–१२. ।

आवसथ पु. १ खं. १४–६. ।

आवाहन पु. २ खं. १४–२९. ।

आविष्ट पु. २ खं. १४–१४. ।

आविस् पु. १ खं. ४–४. ८. ॥ पु [illegible] खं. ७–१. ।

आवृत् पु. २ खं. ४–२. । ख. ९–८. [illegible]

आवृत्य पु. १ खं. २–२. ।

आश्वमेधिक पु. १ खं. २३–१४. ।

आश्वयुजी पु. २ ख. ३-४. । खं. ६-२. [illegible]

आषाढी पु. २ खं. ८–९. ।

आष्ट्री पु. २ ख. १५–१. ।

आसन पु. १ ख ८–१. ।

आसन्दी पु. १ खं. ९–९. ।

आसिच्य पु. २ ख. [illegible] ।

आस्तीर्य पु. १ ख. ८–३. । खं. [illegible] ।

[illegible]

[illegible]

ख. १९–९. ६. । ख. १६–१. २. ३ (२). ४. । ख. १७–१ (२). ६. ७. । ख. १८–२. ।

इत्यन्त पु. १ ख. ८–९. ।

इत्यादि पु. १ खं. ११–१४

इद पु. १ ख. ४–२ (२). । ख. १९–३ । ख. २१–२. ।

इदम् पु. १ खं. २–२. । ख. ३–१. । खं. ५–४. । ख. ७–९. । ख ८–३. ९. । ख. ९–८. । ख. १०–२. ८. १० (५). १५ (२). १७. । खं. ११–४. ९. १२ (२). २०. २३ । ख. १२–१ (३). खं. १३-१०. १५. १७. १८. । ख. १४–८ (२). ९ (२). १० (२). १५. । ख. १७–६. । खं. २१–६ (२). ७. । ख. २२–३ (२). १०. १८ (२). ॥ पु. २ खं. १–८. । खं २–३. । ख. ७–१. ४. ८. । ख. ९–५. । ख. ११–७. ११ (३). १७. । खं. १३–६. । ख. १४–३. . ख. १५ ६. । ख. १७–१ । ख १८–२ ४ (३) ।

इध्म पु. १ ख. २३–१५. ॥ पु. २ ख [illegible] ३. । ख ६ -४. ।

[illegible]

(२). । ख. १९–६. (३). ।

इन्द्रपुरुष पु. २. ख. १२–१२. ।

इन्द्राग्नि पु. १ खं. २२–५. ।

इन्द्राणी पु. १ ख. १०–१७. । ख. ११–९. ॥ पु. २ ख. १०–२. ९. ।

इन्द्राबृहस्पति पु. १ ख. ९–२७. ।

इन्द्रिय. पु. १ ख. ३–१. ।

इरा पु. १ ख. १४–६. ॥ पु. २ ख ११–१७. ।

इरिण पु. २ ख. १–१०. । ख. १६–१. । ख. १७–४. ।

इरिणलोष्ट पु. १ ख. ७–९. ।

इव पु १ ख. १–१४. । ख ४–२ (२). । खं. ९–८. । ख. १०–१६. । ख. १४–१२. । खं २२–१२. ॥ पु २ ख. ८–४. । ख. ११–१९ ।

इषीका पु. १ ख. ११-५ ।

[illegible]

एकवृत पु. २ खं २–२ ।
एकव्रत पु. १ ख २–३. ।
एकाष्टका पु. २ ख. ८–४. ।
एकैक पु. १ खं. ६–३. । खं ९–७. ११. । ख. ११–८. ।
एजत् पु. २ ख. ७–१. ।
एडक पु. २ खं. १३–६ ।
एतद् पु. १ खं. १–३ । खं. २–६. ७. । ख. ३–४. । खं. ४–३. । खं. ८–९. । ख. ९–५. । खं. १०–५. १६. । खं. ११–७. १८. २२. । ख. १२–२. ५ । ख. १४–२०. । खं. १८–४. । खं १९–३. ४. । खं. २१–४. ५. ८. १३. । ख २२–५ ॥ पु–२ खं. १–१३. । खं. २–२३. ३०. । खं. ८–४. । खं. ९–४. । खं. १०–७ (२). । खं. ११–१६–१९. । ख. १३–६. । खं १४–३. १४. २६. (२) २९. । ख. १५–६. । खं. १६–५. । खं. १७–१ (३ . ।
एधस् पु. १ ख. १–१६. । ख. ११–२४. ॥ पु. २ खं. २–२१.
एव पु १ ख. ३–१. ३ (२). ४ (२). । ख. ९–१२. । ख. १०–७. १६ । ख ११–४. १९. । ख. १२–२. । ख. १३–१७. १८ । खं १४–७. । ख. २२–११. २०. । ख. २३–४ १३. १९. ॥ पु. २ ख १–५. ८. । खं. २–१३. । ख. ३–१४. । ख. ४ –१३. । ख. १०–२. ।
एवम् पु. १ ख २–५ १३ (२). । ख. ३–१. ५. । ख १०–१७ (२). । ख. ११–१३. । ख. २२–१७ (२). १८. । खं २३-४. १३. १९. ॥ पु. २. खं. ८–८. । ख. ९–१४. । ख. ११–११. । ख. १२ -२. । खं. १९–२. । ख. १८–४. ।
ऐन्द्र पु. २ ख. २–१३. ।
ऐन्द्राग्न पु. २ खं. ३–३. ।
ओजस् पु १ खं. २–३ ।
ओदन पु. २ ख. ९–५. ८ ।
ओम् पु. १ खं. २–३. । ख. ४–४. ८. । ख. ५–२. । ख. ९–२० २३. । ख. २२–१२ ॥ पु २ खं. २–१३. । खं. १४–१७. ।
ओषधि पु. १ ख. ५–५. । खं. १६–१. । खं. २१–४. । ख. २३–१८. ॥ पु. २ खं. ६–२. । खं. १०–८. । खं. १२–२ (२). । खं १४–२६. ।
ओषधी पु १ ख. ११–६. । ख. १४–१६. ।
औदुम्बर पु. २ ख. १४–२५ ।
औद्वाहिक पु २ ख. १–१. ।
कट पु. २ ख १–५. ।
कण्ठ पु. १ खं. १६–१. ।
कनिष्ठमधन पु. २ ख. ५–२. ।
कनीनिका पु १ खं. ११–८. ।
कन्या पु. १–८. १०. । खं. ८–२. ९. ११. । खं. १०–५. १५. । खं. ११–६. १२. ॥ पु. २ ख १४–१३. ।

१६ (३). । खं. १९—६. । खं. १७—१ (३). । खं. १८—२ (८). ४. ।

तडाग पु. २ खं. १०—८. ।

[illegible] पु. १ खं. १४—९. ॥ पु. २ खं. २—३. । खं. १४—२८ (२). ।

[illegible] पु. १ खं. ११—१. । खं. १६—३. । खं. २०—९. । खं. २३—१२. । पु. २. खं. १—२. ।

[illegible] पु. १ खं. ८—४. । खं. १३—१७. ॥ पु. २. खं. ७—७. । खं. ११—२. ।

[illegible] पु. १ खं. ७—९. । खं. १०—३. । खं. १३—८ (२). । खं. २१—८. ॥ पु. २ खं. २—६. ।

[illegible] पु. १ खं. १—२१. । पु. २ खं. ४—१. ।

[illegible] पु. १ खं. १६—१६ (२). ॥ पु. खं. ४—९. ।

[illegible] पु. २ खं. १०—७. ।

[illegible] पु. २ खं. ९—१४. ।

[illegible] पु. १ खं. १०—७. ।

[illegible] पु. १ खं. १—१८ (२). । खं. ३. ७. । खं. १४. १६. (२). । खं. २२-७. ॥ पु. २—खं. १३—६. । खं. १९—३. ।

[illegible] पु. २ खं. ७—१. ८. । खं. १८-२. ।

[illegible] पु. १ खं. १९—४. ॥ पु. २ खं. १४—३१. ।

[illegible] पु. १ खं १३—१२. ।

[illegible] पु. २ खं. ११—१२. ।

[illegible] पु. १ खं. २२—७. ।

तल्प पु. २ खं. ७—८ (३). ।

तामिस्र पु. २ खं. ८—२. ।

तार्क्ष्य पु. २ खं. १९—६. ।

तावत् पु. २ खं. १०—२. । १३—९. ।

तिथि पु १ खं. १०—९ (२). ॥ पु. २ खं. १९—१. ३. ।

तिल पु. १ खं. १४—९. ॥ पु. २ ख. १९—१. ३. ।

तिलपिष्ठ पु. १ खं. २१—१२. ।

तिल्व. पु. २ खं. ११—१२. ।

तीर पु. १ खं. ९—२. ।

तीर्थ पु १ खं. ७—२ । खं. १३—१४ ( २ ). ।

तीर्थसद् पु. १ खं. १३—१४. ।

तु. पु १ खं. ४—१४. १९. । खं. १३—७. ८. । खं. २१—१३. । खं. २२—१७.

तुन्दिल पु. २ खं. १०—२.

तुष्टुवस् पु. १ खं. १—२१. ।

तूष्णीम् पु. १ खं. ११—८. । खं १४—१२. ॥ पु. २ खं. २—९ ( २ ). १०. १३. । खं. ४—२. । खं ११—१२. । खं. १६—१. ६. ।

[illegible] पु. १ खं. २—९. । खं. ३—२. । खं. ६—३. । खं. १०—१९ । ख. २२—६. ।

तृण पु. १ खं. ९—२३. ॥ पु. २ खं. १०—२. ।

तृतीय पु. १ ख ३. ७. । खं. १६—१.

## श्रीमैत्रायणीयमानवगृह्यसूत्रस्य-

## श्रीमदष्टावक्रभाष्ये प्रमाणतया गृहीतग्रन्थानां-

## नामावलिः



१ अत्रिः
२ आग्नेयसूत्रम्
३ आपस्तम्बः
४ आपस्तम्बधर्मशास्त्रम्
५ आश्वलायनगृह्यम्
६ उद्योतनः
७ कठः
८ कल्पकारः
९ काठकगृह्यम्
१० काठकपरिशिष्टम्
११ कात्यायनः
१२ गायत्रीकल्पः
१३ गृह्यान्तरम्
१४ गौतमः
१५ छान्दोग्यम्
१६ तैत्तिरीयकम्
१७ दक्षस्मृतिः
१८ पञ्चमवेदः
१९ पाणिनिः
२० पुराणम्
२१ बैजवापः
२२ भट्टकुमारः
२३ मनुः
२४ मानवसूत्रम्
२५ ( याज्ञवल्क्यः )
२६ यास्कः
२७ वसिष्ठः
२८ वाजसनेयः
२९ शाखान्तरम्
३० शाबरभाष्यम्
३१ शिदिरः
३२ श्रुतिः
३३ सावित्रीकल्पः
३४ स्मृतिः
३५ स्मृत्यन्तरम्
३६ हारीतः



# मैत्रायणीयमानवगृह्यसूत्रभाष्यशुद्धिपत्रम्.

| अशुद्धम् | पृष्ठम् | पङ्क्तिः | शुद्धम् | अशुद्धम् | पृष्ठम् | पङ्क्तिः | शुद्धम् |
|---|---|---|---|---|---|---|---|
| संहत | २ | १ | सꣳहत | ये ने | १८ | २२ | येने |
| सप्त । मु | २ | १ | सप्तमु | गुरुश्च | १९ | १२ | गुरुश्चा |
| व्रह्म | ३ | १४ | ब्राह्म | विशेपादुरु | १९ | १२ | विशेपाद्गुरु |
| ते । उपवनादि | ४ | १९ | ते उपवनादिच | जनं | १९ | १४ | जन |
| धारयेत् | ४ | २३ | धारयीत | ईत्यम्य | २१ | ९ | इत्यम्य |
| यवः | ५ | ७ | यवम् | चरते | २३ | २४ | चरिते |
| द्यचनिमित्तजस्त्वे | ५ | १७ | दनिमित्ततइ | कर्न्त्रैक्य | २५ | २० | कर्त्रैक्य |
| परिल्पवेत | ५ | २१ | प्लवेत | हंसूर्य | २६ | ४ | हꣳसूर्य |
| शामे | ६ | ६ | श्यामे | हसूर्य | २६ | ७ | हꣳसूर्य |
| लिङ्गांत् | ६ | १५ | लिङ्गात् | नुपज | २६ | २३ | नुपज |
| अपोऽ | ७ | १० | अपो अ | प्रतिष्ठिना | २७ | ३ | प्रतिष्ठिता |
| रिह ह | ७ | १६ | रिह स्वधृति-रिति ह | च । | २७ | ५ | च— |
| | | | | सब | २७ | २० | संव |
| | | | | दृष्यते | २७ | २३ | दृश्यते |
| शद्वः | ९ | ४ | शब्दः | छन्दासि | २८ | २ | छन्दाꣳसि |
| शद्वे | ९ | ६ | शब्दे | लंविद्यु | २८ | ४ | लꣳविद्यु |
| शद्वा | १० | २२ | शब्दा | वलिक | २८ | १४ | वलीक |
| निपिच | ११ | ६ | निपद्य | अकालि | २८ | १६ | आकालि |
| मात्राणा | ११ | २१ | मात्राणा | भाव्येत | २८ | १८ | भाव्येत |
| जगति | १३ | १ | जगती | दिश म | २९ | २ | दिशꣳम |
| वैशस्य | १३ | १ | वैश्यस्य | । त्रीश्रा | २९ | ६ | त्रीꣳश्रा |
| र्थां म्ता | १५ | १६ | र्थांम्नाँ | छन्दासि | २९ | ७ | छन्दाꣳसि |
| कारः क | १६ | १७ | कारः, क | णींगर्त्री | २९ | ८ | णीꣳगर्त्री |
| म्यां शा | १७ | २ | म्याꣳशा | अहं | २९ | १९ | म्यहं |
| नंवा | १८ | ४ | नꣳवा | यितृ | ३० | ३ | पितृ |
| मुम्येभि | १८ | २१ | मुम्योऽभि | | | | |

| | | | |
|---|---|---|---|
| ९—६० | ५१ | २६ | ९—६—० घ |
| नां स्वसा | ५२ | २ | ना ऽस्वसा |
| दितिं | ५२ | ३ | दितिꣳ |
| भूयासं सु | ५२ | ७ | भूयासꣳ सु |
| द्विति | ५२ | १४ | दितिं |
| उक्ता | ५२ | १६ | उक्त्वा |
| स्पर्शम् | ५२ | १९ | स्पर्शनम् |
| यथापि | ५३ | १९ | यथापिता |
| करणस्या | ५४ | २० | करणं स्यात् |
| दक्षिणांस्त | ५५ | ४ | दक्षिणाꣳस्त |
| रविं | ५७ | ५ | रयि |
| यथेद्र | ५७ | ९ | यथेद |
| दद | ५७ | १८ | ददद् |
| प्रात्यद् | ५८ | ८ | प्रत्यद् |
| नरदष्टि | ५९ | ११ | जरदष्टि |
| रायस्यो | ५९ | १० | रायस्पो |
| पर्यन्नी | ६० | ८ | पर्येनि |
| नन्तर | ६१ | ७ | नन्तर- |
| लाजा | ६१ | १७ | लाज [इति |
| तेन | ६२ | २० | तेन परिधाप्य |
| मंत्न | ६३ | २२ | मंनद्द |
| अग्न | ६३ | २३ | अज्ञ |
| लिङ्गान्नु | ६४ | २३ | लिङ्गानु |
| मद्भचे | ६६ | ६ | मद्भचे |
| मन्त्र | ६६ | ६ | मन्त्र प |
| मन्त्री | ६६ | ८ | मन्त्रपद्री |
| कमन्तु | ६६ | १७ | कमंतु |
| चर्मद | ६५ | २१ | चर्मणि द |
| अ नु | ६६ | २ | अनु |
| आपोही | ६६ | २१ | आपोहि |
| रिमां स | ६७ | २ | रिमाꣳस |
| स्त्वं वि | ६७ | ३ | स्त्वꣳ वि |
| त्रीश्ये | ६७ | ५ | त्रिश्ये |
| ज्यके | ६७ | १६ | ज्य के |
| श्रुतो | ६८ | २ | श्रुतो |
| युक्के | ६९ | २ | युङ्क्ते |
| कर्त्तकं | ६९ | २३ | कर्त्तृकं |
| कंर्त्तृ | ७० | १५ | कर्त्तृ |
| कर्तुको | ७० | १९ | कर्त्तृको |
| वाग्निभु | ७१ | १० | वाग्निमु |
| य वृक्षे | ७१ | १६ | ये वृक्षे |
| प्रत्यक्ष | ७२ | १६ | प्रत्यक्षम् |
| व्युत्का | ७२ | १९ | व्युत्क्रा |
| व्राह्मणा | ७२ | २३ | व्राह्मण |
| जीवत्ती | ७४ | ७ | जीवन्ती |
| पश्चाद | ७४ | १५ | पश्चाद्रा |
| तुहो | ७४ | १६ | तुहे |
| उत्पर्ग | ७४ | १८ | उत्पद्म |
| ध्रुवा | ७४ | २१ | ध्रुव |
| दा वि | ७६ | २ | दाः वि |
| ध्याना | ७६ | ५ | ध्यानाः |
| विश्वेद्रै | ७६ | ८ | विश्वेद्रै |
| यद्दद | ७६ | १७ | यद्दद् |
| स्या | ७६ | २० | स्या |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| लिङ्ग | १७२ | २४ | लिङ्ग (ङ्गो) | शर्नि | १८७ | १० | शनैं |
| द्म | १७२ | २४ | द्म(द्दोऽ) | कृष्टचोत्तरा | १८८ | १९ | दक्षिणोत्तरा |
| रा. | १७२ | २४ | राः[रान्त] | त्क्रोति | १८८ | २२ | कर्त्ते |
| गाभिरस्ति | १७२ | २५ | गाभिर(गाद्)स्ति | तन ) | १९० | १२ | तन ) |
| | | | | मवति | १९० | २१ | भवति |
| बलि | १७३ | ७ | बलिं | नम् । [:] | १९१ | १४ | नम् । ततः, |
| मश्रीत | १७६ | ३ | मश्रीत | शुद्रा | १२९ | ८ | शूद्रा |
| व म | १७७ | १५ | वावग | पुणप | १९२ | ९ | पुण्य |
| तीर्नि | १८३ | २० | तीनि | | | | |

प्रस्तावनायाम्.

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| परा | १ | ३ | परंपरां | उद्दृ | ८ | ८ | उद्ध |
| सवि | २ | १९ | स वि | उद्दृ | ८ | २३ | उद्ध |
| पश्प | ५ | १३ | पस्प | मत्रान्नु | १० | १६ | मन्त्रानु |
| हत्यां | ६ | २३ | हत्याहः | मन्त्रिन | १२ | २७ | मन्त्रित |

**शुद्धिपत्रं समाप्तम् ।**



# GAEKWAD'S ORIENTAL SERIES.

Published under the Authority of the Government of His Highness the Maharaja Gaekwad of Baroda

AT THE

CENTRAL LIBRARY, BARODA (India).

GENERAL EDITOR

BENOYTOSH BHATTACHARYYA, M. A., Ph D.

---

## Select Opinions.

"The Series as a whole will bring notable accession to our knowledge of the immense and wonderful Sanskrit Literature. The volumes are excellently printed and edited and the notes and introductions are scholarly and useful.

(Dr.) F. W. THOMAS, LIBRARIAN, INDIA OFFICE.

The editions have been executed with the greatest care. The prefaces are learned and informing They are worthy of the State which published them.

(Mahamahopadhyaya Dr.) Haraprasad Shastri, M.A., C. I. E., Hon. D Litt.

The inclusion of Prakrit works in the series is an excellent idea. Owing to the practical monopoly of Sanskrit in India, the study of the Prakrits has been too much neglected there, though these mediaeval vernaculars as connecting links between Sanskrit and the innumerable dialects of modern India, are of great philological, and to some extent literary importance. The Maharaja has certainly to be congratulated on his plan of bringing out this series.

—LONDON TIMES, LITERARY SUPPLEMENT.

The inexhaustible wealth of In[illegible] these volumes. T[illegible] the 'Gaekwad's Oriental S[illegible] catalogues which at [illegible] Rama's reveal [illegible] and [illegible] Ve[illegible] [illegible] interest

—[illegible]

# GAEKWAD'S ORIENTAL SERIES

[illegible]

## BOOKS PUBLISHED

1. **Kāvyamīmāṁsā**: a work on poetics, by Rājaśekhara (880-920 A.D.): edited by C. D. Dalal and R. Anantakrishna Sastry, 1916. Reissue, 1924 ... Rs. 2-4

*This book has been set as a text-book by the Benares Hindu University and Patna University.*

The first two numbers are valuable works, and were hitherto quite unknown to me. The Introduction to *Kāvyamīmāṁsā* is an interesting and an important contribution to our knowledge of ancient India.

(Sir) George A. Grierson.

2. **Naranārāyaṇānanda**: a poem on the Paurāṇic story of Arjuna and Kṛṣṇa's rambles on Mount Girnar, by Vastupāla, Minister of King Vīradhavala of Dholka, composed between Samvat 1277 and 1287, i. e. A. D. 1221 and 1231: edited by C. D. Dalal and R. Anantakrishna Sastry, 1916 .. .. .. .. .. .. ... 1-4

3. **Tarkasaṅgraha**: a work on Philosophy (refutation of Vaiśeṣika theory of atomic creation) by Ānandajñāna or Ānandagiri, the famous commentator on S'aṅkarâcârya's Bhâṣyas, who flourished in the latter half of the 13th century: edited by T. M. Tripathi, 1917 ... 2-0

4. **Pârthaparâkrama**: a drama describing Arjuna's recovery of the cows of King Virâta, by Prahlâdanadeva, the founder of Pâlanpur and the younger brother of the Paramara king of Chandrâvatî, (a state of Mârwâr), and a feudatory of the kings of Guzerat, who was a Yuvarâja in Samvat 1220 or A. D. 1164: edited by C. D. Dalal, 1917 ... 0-6

5. **Râstraudhavaṁs'a**: an historical poem (Mahâkâvya) describing the history of the Bagulas of Mayûragiri, from Râstraudha, king of Kanauj and the originator of the dynasty, to Nârâyana Shah of Mayûragiri by Rudra Kavi composed in S'aka 1518 or A. D. 1596: edited by Pandit Embar Krishnamacharya with Introduction by C. D. Dalal, 1917 ... ... ... ... .. ... .. 1-12

6. **Liṅgânus'âsana**: on Grammar, by Vâmana, who lived between the last quarter of the 8th century and the first quarter of the 9th century: edited by C. D. Dalal, 1918 .. ... ... ... 0-8

7. **Vasantavilâsa:** an historical poem (Mahâkâvya) describing the life of Vastupâla and the history of Guzerat, by Balachandrasûri, (from Modheraka or Modhera in Kadi Prant, Baroda State), contemporary of Vastupâla, composed after his death for his son in Samvat 1296 (A. D. 1240) edited by C D Dalal, 1917 .. ... 1-8

8. **Rûpakasatkam:** six dramas by Vatsarâja, minister of Paramardideva of Kalinjara, who lived between the 2nd half of the 12th and the 1st quarter of 13th century edited by C. D Dalal, 1918... ... 2-4

9. **Mohaparâjaya:** an allegorical drama describing the overcoming of King Moha (Temptation), or the conversion of Kumârapâla, the Chalukya King of Guzerat, to Jainism, by Yas'ahpâla an officer of King Ajayadeva, son of Kumârapâla, who reigned from A. D. 1229 to 1232 edited by Muni Chaturvijayaji with Introduction and Appendices by C. D. Dalal, 1918 ... .. ... 2-0

10. **Hammiramadamardana:** a drama glorifying the two brothers Vastupâla and Tejahpâla and their King Viradhavala of Dholka, by Jayasimhasûri, pupil of Virasuri, and an Âcârya of the temple of Munisuvrata at Broach, composed between Samvat 1276 and 1286 or A D. 1220 and 1239 edited by C D. Dalal, 1920 .. ... 2-0

11. **Udayasundarikathâ.** a romance (Campû, in prose and poetry) by Soddhala, a contemporary of and patronised by the three brothers Chchittarâja, Nâgârjuna and Mummunirâja, successive rulers of Konkan composed between A. D 1026 and 1050 edited by C. D Dalal and Pandit Embar Krishnamacharya 1920 . .. .. 2-4

12. **Mahâvidyâvidambana:** a work on Nyâya Philosophy, by Bhatta Vâdîndra who lived about A. D 1210 to 1274. edited by M. R Telang 1920 . . .. .. .. .. .. 2-4

13. **Prâcinagurjarakâvysangraha:** a collection of old Guzerati poems dating from 12th to 15th centuries A. D edited by C. D. Dalal. 1920 . .. . .. .. .. ... 2-4

14. **Kumârapâlapratibodha** a biographical work in Prakrta, by Somaprabhâcârya composed in Samvat 1241 or A D 11[illegible] edited by Muni Jinavijayaji 1920 .. .. .. .. .. 7-8

15. **Ganakârikâ** a work on Philosophy (Pasupata School) by Bhâsarvajña who lived in the 2nd half of the 10th century edited by C D Dalal 1921 . . ... .. ... ... ... 1-4

16. **Sangitamakaranda** a work on Music by Narada edited by M. R. Telang 1920 .. ... .. .. ... .. ... 2-0

17. **Kavindrâcârya List:** List of Sanskrit works in the collection of Kavindrâcârya, a Benares Pandit ([illegible] A.D.) edited by R. Anantakrishna Shastry, with a foreword by Dr Ganganatha Jha 1921 0-12

18. **Vârâhagrhyasûtra:** Vedic ritual (domestic) of the Yajurveda edited by Dr. R. Shamasastry. 1920 ... ... ... ... 0-12

19. **Lekhapaddhati:** a collection of models of state and private documents, dating from 8th to 15th centuries A. D.: edited by C. D. Dalal and G. K. Shrigondekar 1925 .. ... ... .. ... 2-0

*Lekhapaddhati* opens a new line; we know almost nothing on the art of writing letters in Ancient India.

—SILVAIN LEVI.

As many of the documents are in an imperfect Sanskrit betraying the native dialect of the writers, they throw considerable light upon the vocabulary of Old Guzerati, and they yield precious information as to the internal administration and social conditions of the kingdom of Guzerat

—J. R. A. S.

This unique work has been edited very ably by the second Editor with an interesting preface, five appendices, a list of important persons and of prominent places, and a full Anglo-Sanskrit glossary. It contains numerous original specimens of all kinds of letters, deeds and documents in Sanskrit, and also quotations from the classical authors. It contains also many vernacular words and phrases, most of which are now obsolete. In order to ascertain the meaning of these obsolete words the learned second Editor had to travel over districts and to mix freely with the villagers. Thanks to his untiring zeal, we have at last been presented with a fairly good glossary which clears up the meaning of most of these terms which have hitherto baffled the endeavours of many an erudite scholar.

—CALCUTTA REVIEW.

The difficulties the editors encountered in interpreting this language can well be imagined, and they were very fortunate in being able to obtain assistance from the old men in the villages

—J. A. O. S.

20. **Bhavisayattakahâ or Pañcamîkahâ:** a romance in Apabhrams'a language by Dhanapâla (*circa* 12th century) edited by C. D. Dalal, and Dr. P. D. Gune, 1923 .. ... ... ... ... 6-0

A very useful and valuable contribution of that exceedingly important and still imperfectly known stage of linguistic evolution which linked the older Prâkrts to the modern vernaculars

—J. R. A. S.

21. **A Descriptive Catalogue of the Palm-leaf and Important Paper MSS in the Bhandars at Jessalmere,** *compiled by C. D. Dalal, and* edited by Pandit L. B. Gandhi, 1924 ... ... ... ... 3-4

## BOOKS IN THE PRESS

1. **Nyâyapraves'a:** the earliest work on Buddhist logic, by Dinnâga, with commentaries of Haribhadrasûri and Pârs'vadeva edited by A. B. Dhruva, M. A., LL. B., Pro-Vice-Chancellor, Hindu University, Benares and Pandit Vidhusekhara Bhattacharyya.

2. **Sâdhanamâlâ:** Vol. II, edited by Benoytosh Bhattâchâryya, Ph. D. General Editor, Gaekwad's Oriental Series. Illustrated.

3. **Nâtyas'âstra:** Vol. II edited by M. Ramakrishna Kavi.

4. **Kalpadrumakos'a:** standard work on Sanskrit Lexicography by Kes'ava edited by Pandit Ramavatara Sarma Sahityacharya of Patna.

5. **Advayavajrasangraha:** consisting of twenty short works on Buddhist, philosophy by Advayavajra, a Buddhist savant belonging to the 11th century A. D. edited by Mahâmahopâdhyâya Dr. Haraprasad Shastri, M. A., C. I. E., Hon. D. LITT.

6. **Mânasollâsa** or Abhilasitârthacintamani, Vol. II, edited by G. K. Shrigondekar, M. A.

7. **A Descriptive Catalogue** of MSS in the Central Library, Baroda Vol. II (S'rauta, Dharma and Grhya Sutras) compiled by the Library staff.

8. **A Descriptive Catalogue of MSS in the Jain Bhandars at Pattan** edited from the notes of the late Mr. C. D. Dalal, by Pandit L. B. Gandhi. 2 vols.

9. **Bhâvaprakâs'ana** of S'âradatanaya an ancient work on Dramaturgy; edited by Pandit Ramaswami Sastry, Central Library, Baroda and His Holiness Yadugiri Yatiraja Swami, Melkot.

10. **Prajñopâyavinis'cayasiddhi** of Anangavajra and **Jñânasiddhi** of Indrabhûti two important works belonging to the little known Vajrayâna school of Buddhism (8th century A. D.) edited by Benoytosh Bhattacharyya, Ph. D., General Editor, Gaekwad's Oriental Series.

11. **Siddhântabindu:** on Vedânta philosophy by Madhusûdana Sarasvatî with commentary of Purusottama edited by P. C. Divanji, M. A. LL. M.

* * * * * *

**The Baroda Library Handbook.** By Newton Mohun Dutt, Curator of Libraries, Baroda State. With Introduction by H. E. the Dewan of Baroda. 84 pages royal 8vo. 15 illustrations. Bibliography. 1926 ... Rs 1-0

For the British provinces and the Indian States where the library movement is in its infancy, or is non-existent, this *Handbook* will be helpful, suggestive and stimulating. —*Bombay Chronicle*, 14. 3. 26.

---